Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# शास्त्र संदेशमाला

संकलक: पू. मु. श्री विनयरक्षितविजय म.सा.

२१




प्रकाशक
शास्त्रसंदेश, नवसारी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# शास्त्रसंदेशमाला-२१

## शतक-कुलक-भावना-चर्चाग्रन्थनिकरः

## ભાગ-૨૧

સંકલન

પ.પૂ.આચાર્ય ભગવંત શ્રીમદ્
વિજય રામચંદ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી
પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના
શિષ્યરત્ન
પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક

**શાસ્ત્રસંદેશ**

૩, મણિભદ્ર એપાર્ટમેન્ટ, સુભાષચોક,
આરાધના ભવન માર્ગ, ગોપીપુરા, સુરત-૧

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

શાસ્ત્રસંદેશમાલા-૨૧
શતક-કુલક-ભાવના-ચર્ચાગ્રન્થનિકરઃ

પ્રથમ આવૃત્તિ : વૈશાખ સુદ-૬, વિ.સં. ૨૦૬૫

કિંમત : રૂ. ૭૦ (પડતર કિંમત)

પ્રમાર્જના-શુદ્ધિ :
પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા.
પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા.
પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ.
પંડિતવર્ય શ્રી રતીભાઈ ચીમનલાલ દોશી

ટાઈપ સેટીંગ :
શ્રી સાંઈ કોમ્પ્યુટર્સ, અમદાવાદ-૪૬

આવરણ ડિઝાઈન :
ખુશી ડિઝાઈન્સ, અમદાવાદ-૧

મુદ્રક :
શિવકૃપા ઓફસેટ પ્રીન્ટર્સ, અમદાવાદ-૪

વિશેષ નોંધ :
શાસ્ત્રસંદેશમાલાના ૧ થી ૨૪ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યમાંથી કરવામાં આવેલ છે. તેની નોંધ લેવા વિનંતી.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

આભાર.... !

અનુમોદનીય.... !

અનુકરણીય....!

# શાસ્ત્રસંદેશમાલા ના

એકવીસમા ભાગના પ્રકાશનનો સંપૂર્ણ લાભ

**શ્રી શ્વેતાંબર મૂર્તિપૂજક તપગચ્છ ઉદય કલ્યાણ આરાધક જૈન સંઘ ટ્રસ્ટ**

**જીનાજ્ઞા આરાધના ભૂમિ**

મહાવીરનગર, દહાણુકરવાડી,
કાંદીવલી (વેસ્ટ) મુંબઈ-૬૭

**તરફથી શ્રી સંઘના જ્ઞાનદ્રવ્યની નિધિમાંથી લેવામાં આવેલ છે. તેની અમો હાર્દિક અનુમોદના કરીએ છીએ..! શ્રી સંઘ તથા ટ્રસ્ટીગણના અમો આભારી છીએ.. !**

-શાસ્ત્રસંદેશ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# પ્રકાશકીય

ચાર વર્ષ પૂર્વે પૂર્વના પૂર્વાચાર્ય -પુણ્યાત્માઓએ પદ્યમાં પ્રરૂપેલા ૪૦૦ થી વધારે પ્રકરણોના ૭૦,૦૦૦ હજાર શ્લોક પ્રમાણ સાહિત્ય શાસ્ત્રસંદેશમાલાના ભાગ ૧ થી ૨૦ રૂપે પ્રકાશિત કરેલ. તે પછી પણ પૂજ્યશ્રીએ આ સમયગાળા દરમ્યાન મળેલ બીજા ૧૩૭ પ્રકરણોના ૧૮,૦૦૦ હજાર શ્લોક પ્રમાણ સાહિત્ય સંકલન કરી આપેલ છે તે આજે ભાગ ૨૧ થી ૨૪ સ્વરૂપે પ્રકાશિત કરીએ છીએ.

આ ચાર ભાગમાં ૨૧માં ભાગમાં શતક, કુલક, ભાવના અને ચર્ચાને લગતા ગ્રંથો, ૨૨માં ભાગમાં આચાર, પ્રારંભિક, નામમાલા અને વ્યાકરણના ગ્રંથો, ૨૩માં ભાગમાં કાર્મગ્રન્થિક અને લોકપ્રકાશીય ગ્રંથો અને ૨૪માં ભાગમાં પૂ.આ.શ્રી હેમચન્દ્રસૂરીશ્વરજી કૃત નામમાલાઓના ગ્રંથોનો સમાવેશ કરેલ છે.

આ ચાર ભાગની પણ પ્રમાર્જન - શુદ્ધિ પૂર્વની જેમ જ પૂજ્યશ્રીઓએ કરી આપેલ છે તે માટે અમો તેઓશ્રીના આભારી છીએ.

નાદુરસ્ત તબિયત અને આંખોની નબળાઈ સાથે દરરોજ ૫ થી ૬ કલાક અધ્યયન કાર્ય ચાલુ રાખી આ ચાર ભાગનું સંપૂર્ણ પરિમાર્જન પંડિતવર્ય શ્રી રતીભાઈ ચીમનલાલ દોશીએ કરી આપેલ છે તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વના ૨૦ ભાગની જેમ આ ચાર ભાગમાં પણ અલગ અલગ સંઘોએ પોતાના જ્ઞાનનિધિમાંથી લાભ લીધેલ છે તેની અમો ભૂરિ ભૂરિ અનુમોદના કરીએ છીએ.

-શાસ્ત્રસંદેશ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ अनुक्रमणिका ॥


| अनु. | नाम | श्लोक | पाना नं. |
|---|---|---|---|
| १. | अध्यात्ममतपरीक्षा | २०० | १-१८ |
| २. | जैनविहारशतकम् | १०२ | १९-३५ |
| ३. | नीतिधनदशतकम् | १०३ | ३६-५२ |
| ४. | वैराग्यधनदशतकम् | १०८ | ५२-७० |
| ५. | श्रुङ्गारधनदशतकम् | १०३ | ७०-८७ |
| ६. | श्रृङ्गारशतकाव्यम् | १२१ | ८८-१०७ |
| ७. | दृष्टान्तशतकम् | १२१ | १०८-११८ |
| ८. | गुरुस्थापना-शतकम् | १०३ | ११८-१२६ |
| ९. | मूर्खशतकम् | २६ | १२७-१२९ |
| १०. | जंबूस्वामि कुलकम् | १९ | १२९-१३० |
| ११. | गुरुमहात्म्यं कुलकम् | १० | १३१ |
| १२. | इरियावहिकुलकम् | १३ | १३२-१३४ |
| १३. | चैत्यवन्दनकुलकम् | २७ | १३४-१३६ |
| १४. | प्रत्याख्यानकुलकम् | २५ | १३६-१३८ |
| १५. | प्रत्याख्यानकुलकम् | ७ | १३९ |
| १६. | तपकुलकम् | २६ | १३९-१४१ |
| १७. | श्रावकव्रतकुलकम् | २८ | १४२-१४४ |
| १८. | सार्धर्मिकवात्सल्यकुलकम् | २४ | १४४-१४६ |




For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir


| अनु. | नाम | श्लोक | पाना नं. |
|---|---|---|---|
| १९. | धर्म्माधर्म्मविचारकुलकम् | १८ | १४६-१४८ |
| २०. | वैराग्यरङ्गकुलकम् | ३० | १४८-१५० |
| २१. | उपदेशकुलकम् | ३४ | १५१-१५३ |
| २२. | विसयनिंदाकुलयं | ५० | १५४-१५८ |
| २३. | भावनाकुलकम् | २२ | १५८-१६० |
| २४. | हितशिक्षाकुलकम् | १२ | १६०-१६१ |
| २५. | त्रिषष्टिध्यानकथानककुलकम् | ३७ | १६१-१६४ |
| २६. | जीवायुप्पमाणकुलयं | ५ | १६५ |
| २७. | उपदेशतरङ्गिणी | १२९ | १६५-१८० |
| २८. | धर्मोपदेशश्लोकाः | १२६ | १८०-१९० |
| २९. | कुशलोपदेशकोश | ७७ | १९१-१९७ |
| ३०. | श्रुतस्तव | २७ | १९७-१९९ |
| ३१. | शृङ्गार-वैराग्य-तरङ्गिणी | ५२ | २००-२०८ |
| ३२. | शृङ्गारमण्डनम् | १०८ | २०८-२२० |
| ३३. | नानावृत्तकप्रकरणम् | ८१ | २२१-२२७ |
| ३४. | बालावबोधप्रकरणम् | ११६ | २२८-२३८ |
| ३५. | सुगुरु-गुण-संथव-सत्तरिया | ७५ | २३९-२४५ |
| ३६. | द्वाविंशतिपरिषहाः | २८ | २४५-२४७ |
| ३७. | द्वादशभावना | १४ | २४८-२४९ |




For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir


| अनु. | नाम | श्लोक | पाना नं. |
|---|---|---|---|
| ३८. | द्वादशभावना | ४४ | २४९-२५३ |
| ३९. | द्वादश भावनाः | १३३ | २५३-२६६ |
| ४०. | धर्माराधन-शिक्षा | ५१ | २६७-२७१ |
| ४१. | आराधनाप्रकरणम् | ७० | २७१-२७७ |
| ४२. | नमस्कारमाहात्म्यम् | २१८ | २७७-२९६ |
| ४३. | नवपदमाहात्म्यगर्भितप्रकरणम् | १३५ | २९६-३०७ |
| ४४. | योगसार | २०६ | ३०७-३२४ |
| ४५. | संबोधसत्तरि | १२५ | ३२४-३३५ |
| ४६. | आगम अष्टोत्तरी | ११५ | ३३५-३४५ |
| ४७. | प्रमालक्षणम् | ४०६ | ३४५-३७९ |
| ४८. | श्रीमहावीरविज्ञप्ति द्वात्रिंशिका | ३२ | ३७९-३८४ |
| ४९. | षोडश-श्लोकी | १७ | ३८५-३८६ |
| ५०. | सङ्घपट्टकः | ४० | ३८६-३९३ |
| ५१. | चर्चरी | ४७ | ३९३-४०१ |
| ५२. | वैराग्य कल्पलत्ता | १८७ | ४०१-४१८ |
| ❖ | परिशिष्ट-१ | | १-१२ |
| ❖ | परिशिष्ट-२ | | १३-१४ |


❖ टोटल श्लोक संख्या - ३८४६

❖ संपूर्ण पृष्ठ संख्या - ८+४१८+१४



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# શાસ્ત્રસંદેશનું નવલું નજરાણું "પદ્યાનુક્રમણિકા સંપુટ"

- આ સંપુટમાં ચાર ભાગ છે.
- પ્રથમ ભાગમાં આગમના ૪૪ ગ્રંથો અને સંવેગરંગશાલાની પદ્યાનુક્રમણિકા છે.
- દ્વિતીય ભાગમાં પ્રાકૃતના ૩૭૩ ગ્રંથોની પદ્યાનુક્રમણિકા છે.
- તૃતીય ભાગમાં સંસ્કૃતના ૨૦૫ ગ્રંથો અને લોકપ્રકાશની પદ્યાનુક્રમણિકા છે.
- ચતુર્થભાગમાં ત્રિષષ્ટિશલાકાપુરુષચરિત્ર અને વૈરાગ્યકલ્પલતા-રતિની પદ્યાનુક્રમણિકા છે.
- આ સંપુટમાં ૭ પરિશિષ્ટો છે.
- આ સંપુટમાં ટોટલ ૬૨૬ ગ્રંથોનો સમાવેશ કરેલ છે.
- આ સંપુટમાં ટોટલ ૧,૭૭,૦૦૦ શ્લોકનો સમાવેશ કરેલ છે.
- આ સંપુટના ટોટલ ૧૫૭૦ પેજ છે.
- આ સંપુટની કિંમત ૧૫૦૦/-રૂપિયા છે.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यायविशारदमहामहोपा.श्रीयशोविजयकृता

# ।। अध्यात्ममतपरीक्षा ।।

पणमिय पासजिणिंदं वंदिय सिरिविजयदेवसूरिन्दं ।
अज्झप्पमयपरिक्खं जहबोहमिमं करिस्सामि ।। १ ।।

अज्झप्पं णामाई चउव्विहं चउव्विहा य तव्वन्ता ।
तत्थ इमे अत्थुज्झिय णामेणज्झप्पिआ णेया ।। २ ।।

जा खलु सहावसिद्धा किरिआ अप्पाणमेव अहिगिच्च ।
भण्णइ परमज्झप्पं सा दंसण – णाण – चरणड्ढा ।। ३ ।।

ण विणा रागद्दोसे अज्झप्पस्सेह किंचि पडिकूलं ।
परदव्वं उवगरणं किं पुण देहुव्व धम्मट्ठं ।। ४ ।।

उवधिसहिओ ण सुज्झइ सतुसा जह तन्दुला ण सुज्झन्ति ।
इय वयणं पक्खित्तं दूरे दिट्ठंतवेसम्मा ।। ५ ।।

जा उवगरणे मुच्छा आरम्भो वा असंजमो तस्स ।
तह परदव्वम्मि रई सा किण्ण तुहं सरीरेऽवि ।। ६ ।।

तह परदव्वम्मि रई परिणामो रक्खणाणुबन्धो वा ।
दुहओ तणुसममुवहिं पासन्तो किं ण लज्जेसि ।। ७ ।।

जो किर जयणापुव्वो वावारो सो ण झाणपडिवक्खो ।
सो चेव होइ झाणं जुगवं मणवयणकायाणं ।। ८ ।।

झाणं करणपयत्तो ण सहावो तण्ण जेण सिद्धस्स ।
इहरा ठाणविभागो कह सुक्कज्झाणभेआणं ।। ९ ।।

जा खलु सरागचरिया सा वि य उस्सग्गमग्गसंलग्गा ।
मोत्तुं अववायपदं अइप्पसंगी परविसेसो ।। १० ।।

णणु बज्झंगं साहणमववाओ अन्तरंगमुस्सग्गो ।
जा पुण सरागचरिया समुच्चिआ णेव सुद्धाए ।। ११ ।।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पडिसिद्धसेवणं पुण णो अववाओ फुडो अणायारो ।
ता वत्थाई गन्थो णो उस्सग्गो ण अववाओ ॥ १२ ॥

उवकुणइ जह सरीरं सुद्धुवओगं तहेव उवगरणं ।
जम्हा तओ मुणीणं सुए अणेगे गुणा भणिआ ॥ १३ ॥

जइ उवहिभारगहणं इट्ठं दुज्झाणवज्जणणिमित्तं ।
तो सेयं थीगहणं मेहुणसण्णाणिरोहट्ठा ॥ १४ ॥

एयं विदूसगाणं वयणं मयणंधवयणमिव मोहा ।
अण्णह समोवहासो देहाहाराइगहणे वि ॥ १५ ॥

रागस्स व दोसस्स व उद्दिस्स सुहासुहे सुहासुहया ।
जइ पुण विसयापेक्खा कह होज्जा तो विभागो सिं ॥ १६ ॥

नामं ठवणा दविए रागो दोसो अ भावओ चउहा ।
कम्मं जोग्गं बद्धं बज्झन्तमुदीरणोवगयं ॥ १७ ॥

णोकम्मदव्वराओ णायव्वो वीससा पओगा य ।
संझाइकुसुंभाई दोसो दुट्ठव्वणाईओ ॥ १८ ॥

जं रागदोसकम्मं समुइण्णं जे तओ अ परिणामा ।
ते भावरागदोसा वुच्छमिहं णयसमोआरं ॥ १९ ॥

कोहो माणो दोसो माया लोभो अ रागपज्जाया ।
संगहणयमयमेयं दोसो माया वि ववहारा ॥ २० ॥

उज्जुसुअस्स य कोहो दोसो सेसेसु णत्थि एगन्तो ।
कोहो च्चिय लोहो च्चिय माणो माया य सद्दस्स ॥ २१ ॥

परदव्वम्मि पवित्ती ण मोहजणिया व मोहजण्णा व ।
जोगकया हु पवित्ती फलकंखा रागदोसकया ॥ २२ ॥

वत्थाइ णेव गन्थो मुणीण मुच्छं विणेव गहणाओ ।
तह देहपालणट्ठा जह आहारो तुह वि इट्ठो ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जह देहपालणट्ठा जुत्ताहारो विराहगो ण मुणी ।
तह जुत्तवत्थपत्तो विराहगो णेव णिद्दिट्ठो ॥ २४ ॥

अणसणसहावजोगा जह असणं अणसणन्ति जुत्तमिणं ।
जुत्तं तह वत्थाई सहावओऽतप्परिणयस्स ॥ २५ ॥

एवं च सचेलाणं, कह सुतुत्तं भवे अचेलत्तं ?
इय पभणंतस्स तुहं, को णियघररक्खणोवाओ ॥ २६ ॥

जइ चेलभोगमेत्ता ण जियाचेलक्क परीसहो साहू ।
भुंजन्तो अजियखुहापरीसहो तो तुमं पत्तो ॥ २७ ॥

जह जलमवगाहन्तो भण्णइ चेलरहिओ सचेलो वि ।
तह थोवजुण्णकुत्थियचेला वि अचेलया साहू ॥ २८ ॥

उवयारेण अचेला सेसमुणी सव्वहा जिणिन्दा य ।
खंधाओ देवदूसं चवइ तओ चेव आरब्भ ॥ २९ ॥

एएण जइ अचेला जिणिन्दजिणकप्पिआइआ सुमुणी ।
तो एसो च्चिय मग्गो णण्णो त्ति पराकयं वयणं ॥ ३० ॥

जिणकयमेव य कम्मं जइ कायव्वं तओ तुहं इहयं ।
उवएससिस्सदिक्खागुरुवयणाईहि किं कज्जं ॥ ३१ ॥

निरतिसयाणं कप्पो, थेराण हिओ ठिओ अ तत्थेव ।
पडिवज्जउ जिणकप्पं, पंचहिं तुलणाहिं जुत्तो जो ॥ ३२ ॥

वेज्जुवदिट्ठं ओसहमिव जिणकहिअं हिअं तओ मग्गं ।
सेवंतो होइ सुही इहरा विवरीअफलभागी ॥ ३३ ॥

अणिगूहन्तो सत्तिं, भुंजन्तो वि जह णो चयइ मग्गं ।
अणिगूहन्तो सत्तिं, तह उवगरणं धरन्तो वि ॥ ३४ ॥

कारणिगं जह वत्थं तह आहारो वि दंसिओ समए ।
एगं चिच्चा अवरं गिण्हंताणं णु को भावो ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अविजियहिरिकुच्छाणं जइ णूणं संजमे ण अहिगारो ।
ता कह अजिअदिगिच्छातण्हाणं तत्थ अहिगारो ? ॥ ३६ ॥

अह हिरिकुच्छाहि सयाऽहिरिकुच्छसहावभावणा णो चे ।
तण्हाछुहाहि ता कह तदभावसहावसंबुद्धी ॥ ३७ ॥

उस्सग्गववायाणं मित्तीए अह ण भोअणं दुट्ठं ।
उस्सग्गववायाणं मित्तीइ तहेव उवगरणं ॥ ३८ ॥

एएणुवगरणेणं पच्चक्खाणस्स दव्वओ भंगो ।
इय कप्पणावि विहवाजुव्वणमिव णिप्फला णेया ॥ ३९ ॥

सिद्धन्तसिद्धधरणं उवगरणं तं मुणीण सुहकरणं ।
अह होई पावहरणं इय अम्हं बिन्ति आयरिया ॥ ४० ॥

पुच्छा दियंबराणं केवलमज्झप्पिआण उवहासो ।
अम्हाणं पुण इहयं दोण्हवि पडिआरवावारो ॥ ४१ ॥

पंचसमिओ तिगुत्तो सुविहियववहारकिरियपरिकम्मो ।
पावइ परमज्झप्पं साहू विजिइन्दियप्पसरो ॥ ४२ ॥

लुंपइ बज्झं किरियं जो खलु आहच्चभावकहणेणं ।
सो हणइ बोहिबीअं उम्मग्गपरूवणं काउं ॥ ४३ ॥

सव्वं सहावसज्झं णिच्छयओ, परकयं च ववहारा ।
एगन्ते मिच्छत्तं, उभयणयमयं पुण पमाणं ॥ ४४ ॥

अब्भन्तरबज्झाणं बलिआबलियत्तणं ति जइ बुद्धी ।
णणु कयरं अबलत्तं वेचित्तं वावि वेसम्मं ॥ ४५ ॥

णिप्फत्ती व फलट्ठा अणिययजोगो फलेण वा सिद्धि ।
पढमे समसामग्गी बिइए वावारवेसम्मं ॥ ४६ ॥

तइए दोण्ह वि समया चउत्थपक्खो पुणो असिद्धो त्ति ।
तेण समावेक्खाणं दोण्ह वि समय त्ति वत्थुठिई ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णिच्छयओ सकयं चिय सव्वं णो परकयं हवे वत्थु ।
परिणामावंझत्ता ण यवंझं दाणहरणाइ ॥ ४८ ॥

दिन्तो व हरन्तो वा ण य किञ्चि परस्स देइ अवहरइ ।
देइ सुहपरिणामं हरइ व तं अप्पणो चेव ॥ ४९ ॥

ण य धम्मो व सुहं वा परस्स देयं ण यावि हरणिज्जं ।
कयणासाऽकयभोगप्पमुहा दोसा फुडा इहरा ॥ ५० ॥

भत्ताइपोग्गलाण वि ण दाणहरणाइ होइ जीवस्स ।
जइ तं सं चिय हुज्जा तो दिज्जा वा अवहरिज्जा ॥ ५१ ॥

जोगवसेणुवणीया इट्ठाणिट्ठा य पोग्गला जे हु ।
अण्णा ते जीवाउ जीवो अण्णो अ तेहिन्तो ॥ ५२ ॥

तम्हा सपरविभागो पोग्गलदव्वम्मि णत्थि णिच्छयओ ।
भोगाभोगविसेसा ववहारा चेव सपरत्तं ॥ ५३ ॥

पुण्णपयडीण उदए भोगो भोगंतरायविलएणं ।
जइ णियवित्तेणं चिय तो भोगो किण्ण किविणाणं ॥ ५४ ॥

जो परदव्वम्मि पुणो करेइ मूढो ममत्तसंकप्पं ।
सो कह आयसहावं गिद्धो विसएसु उवलहइ ॥ ५५ ॥

णाहं होमि परेसिं ण मे परे णत्थि मज्झमिह किंची ।
इय आयभावणाए रागद्दोसा विलिज्जन्ति ॥ ५६ ॥

तो परिणामाउ च्चिय बन्धो मोक्खो व णिच्छयणयस्स ।
णेगंतिया अणच्चंतिया पुणो बाहिरा जोगा ॥ ५७ ॥

सिद्धी णिच्छयओ च्चिय, दोण्हं संजोगओ अ छेयत्तम् ।
कत्थइ दोण्ह वि उवओगो तुल्लवं चेव ॥ ५८ ॥

तुल्लत्तमवेक्खाए णियमा समुदायजोगमहिगिच्च ।
किरिया विसिस्सए पुण नाणाउ सुए जओ भणियं ॥ ५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जम्हा दंसणनाणा संपुण्णफलं न दिंति पत्तेयं ।
चारित्तजुआ दिंति हि विसिस्सए तेण चारित्तं ॥ ६० ॥

एवं ववहाराउ बलवन्तो णिच्छओ मुणेयव्वो ।
एगमयं ववहारो सव्वमयं णिच्छओ वत्ति ॥ ६१ ॥

अहिया जइ तुह किरिया अहियं नाणं पि तस्स हेउ त्ति ।
कारणगुणाणुरूवा कज्जगुणा णेव विवरीया ॥ ६२ ॥

अह जइ सव्वणयमयं विणिच्छओ इगमयं च ववहारो ।
तो सो सयलादेसो विगलादेसो कहं होउ ॥ ६३ ॥

मुक्खामुक्खविभागो इच्छामित्तेण णत्थि एगंतो ।
जइ अत्थि तो वि नाणे चरणं सारो ति तं मोक्खं ॥ ६४ ॥

सव्वणयमयत्तं पुण सव्वेसिं संमओ जओ विसओ ।
ण य णिच्छयस्स तेणं सयलादेसत्तमेगस्स ॥ ६५ ॥

जेणं सयलादेसो अभेयवित्तीइ णिच्छयाधीणो ।
तेणेव सो पमाणं न पमाणं होइ ववहारो ॥ ६६ ॥

जमणुवयारो वि बलं कस्सइ णेगंतियं हवे तं पि ।
एगस्स मुक्खभावे णियमा अवरोवयारो त्ति ॥ ६७ ॥

णिच्छयणयस्स विसयं भावं चिय जे पमाणमाहंसु ।
तेसिं विणेव हेउं कज्जुप्पत्तीइ का मेरा ॥ ६८ ॥

खाओवसमिगभावो सुद्धो हेउ सुहस्स खइअस्स ।
तब्भावेण कया पुण किरिया तब्भाववुड्ढिकरी ॥ ६९ ॥

धिइसद्धासुहविविइसविण्णत्ती तत्तधम्मजोणित्ति ।
तल्लद्धधम्मभावा वड्ढइ भावंतरं तत्तो ॥ ७० ॥

एवं पवड्ढभावो कमेण गुणठाणसेढिमारुहिय ।
पक्खीणघाइकम्मो कयकिच्चो केवली होइ ॥ ७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नणु जइ सो कयकिच्चो अट्ठारसदोसविरहिओ देवो ।
ता छुहतण्हाभावा जुज्जइ कम्हा कवलभोई ॥ ७२ ॥

तो सक्का वुत्तुं जे छुहतण्हाई जिणस्स किर दोसा ।
जइ तं दूसेज्ज गुणं साहावियमप्पणो कंवि ॥ ७३ ॥

दूसइ अव्वाबाहं इय जइ तुह सम्मओ तयं दोसो ।
मणुअत्तणं वि दोसो ता सिद्धत्तस्स दूसणओ ॥ ७४ ॥

अह जइ जिणस्स खइअं सुक्खं दुक्खं विरुज्झए तेणं ।
तो सामण्णाभावे विसेससत्ता कहं जुत्ता ? ॥ ७५ ॥

तो वेअणिज्जकम्मं उदयप्पत्तं कहं हवे तस्स ? ।
ण य सो पदेसउदयो समयम्मि विवागभणणाउ ॥ ७६ ॥

आवस्सयणिजुत्तीइ पयडिपसत्थोदयोवएसेणं ।
णज्जइ ता सुहयाउ असुहप्पडिवक्खवयणेणं ॥ ७७ ॥

तत्तत्थसुत्तभणिया एक्कारस जं परीसहा य जिणे ।
तेणवि छुहतण्हाई खइअस्स सुहस्स पडिकूलं ॥ ७८ ॥

अस्सायवेअणिज्जं छुहतण्हाईण कारणं जाण ।
पज्जत्तिसत्तितदुदयजलितंतज्जलणदित्ताणं ॥ ७९ ॥

नणु छुहतण्हा तण्हामोहुदउप्पत्तिआ रिंस व्व ।
भण्णइ अण्णा तण्हा अण्णं दुक्खं तयट्ठं ति ॥ ८० ॥

मोहाभिणिवेसेणं चउहि वि उमकोट्ठयाइहेऊहिं ।
पगरिसपत्ता तण्हा जायइ आहारसण्ण त्ति ॥ ८१ ॥

असणाइम्मि पवित्ति एत्तो च्चिय तं विणा सुसाहूणं ।
ण जहुत्तविहिविहाणे अइआरो हंदि णिद्दिट्ठो ॥ ८२ ॥

एयं विणा ण भुत्ती मेहुणसण्णं विणा जह अबंभं ।
एय वयणं पि परेसिं एएण पराकयं णेयं ॥ ८३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ण हु सा उचियपवित्ती णेव य सुपसत्थझाणहेउ त्ति ।
आहारो व्व अबंभं अण्णह तुह होइ णिद्दोसं ॥ ८४ ॥

आहारचिंतणुब्भवमेयं आहारसण्णमासज्ज ।
वड्ढइ अट्टज्झाणं इट्ठालाभेण मूढाणं ॥ ८५ ॥

तत्तो माणसदुक्खं लइह जिओ कंदणाइ कुव्वंतो ।
लद्धुं इट्ठविसयं रईइ चिंतेइ अविओगं ॥ ८६ ॥

तो मोहणीज्जखयओ तब्भवदुक्खाणुबंधविरहेणं ।
लहइ सुहं सव्वण्णू चएइ णो पुण छुहं चइउं ॥ ८७ ॥

घाइं व वेअणीयं इय जइ मोहं विणा ण दुक्खयरं ।
पयडं पडिरूवाउ ता अण्णाओ वि पयडीउ ॥ ८८ ॥

अणुकूलं पडिकूलं च वेअणं लक्खणं सुहदुहाणं ।
ण हु एसो एगंतो अपमत्तजइसु तयभावा ॥ ८९ ॥

अधुवाण सुहदुहाणं भोगो भोगेण कम्मबंधो अ ।
ण हु एसो एगंतो अपमत्तजइसु तयभावा ॥ ९० ॥

अण्णाणजं तु दुक्खं नाणावरणक्खएण खयमेइ ।
तत्तो सुहमकलंकिअकेवलनाणाऽपुहब्भूयं ॥ ९१ ॥

ण य सुक्खं दुक्खं वा देहगयं इंदिउब्भवं सव्वं ।
अण्णाणमोहकज्जे पमाणसिद्धे हु संकोए ॥ ९२ ॥

एत्तो च्चिय बहुदुक्खक्खएण तेसिं छुहाइवेअणियं ।
णिंबरसलवु व्व पए अप्पं ति भणंति समयविऊ ॥ ९३ ॥

ण य तं कवलाजोग्गं वेअणिअं अग्गिमंदयाभावा ।
ण य दड्ढरज्जुकप्पं वेअणिअं हंदि सुअसिद्धं ॥ ९४ ॥

ण य केवलनाणाई छुहाइपडिबंधगं जिणिंदस्स ।
दाहस्सिव मंताई इय जुत्तं तंतजुत्तीए ॥ ९५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खिज्जइ बलं छुहाए ण य तं जुज्जइ अणंतविरियाणं ।
इय वुत्तं पि ण सुत्तं बलविरियाणं जओ भेओ ॥ ९६ ॥

बंधो परपरिणामा सो पुण नाणा न वीयमोहाणं ।
जोगकया वि हु किरिया तो तेसिं होइ णिब्बीया ॥ ९७ ॥

जोगं विणा वि किरिया सहावओ जइ कहण्ण तह सो वि ।
तुल्लं किर वेचित्तं तह तुल्लमबुद्धिपुव्वत्तं ॥ ९८ ॥

एवं सहाववाणी कह जुत्ता जेण तेसि वयजोगो ।
हेऊ दव्वसुअस्सा पओअणं कम्मखवणा य ॥ ९९ ॥

ण य वयणपयत्तेणं खेअस्सोदीरणं जिणिंदस्स ।
इहरा सुहस्स पावइ तं ण वा अण्णपयडीणं ॥ १०० ॥

ण य तं विरियविरहियं जायइ अपवत्तणव्व करणं ति ।
केवलसहावपक्खे सुगयस्स मयं अणुण्णायं ॥ १०१ ॥

खेओ णोईरिज्जइ केवलिजोगेहि तो विणु पमायं ।
तुल्लुदयहेउपभवो दीसइ पुण सो वि तत्तुल्लो ॥ १०२ ॥

भुत्तीइ सुहुप्पत्ती तं पुण जोगादुदीरियं होज्जा ।
एसा परजुत्तिलया एएण पकंपिया णेया ॥ १०३ ॥

ण य दुप्पणिहाणं पि हु केवलिजोगाण होइ भुत्तीए ।
तं रागद्दोसकयं ते पुण तेसिं विलीणेति ॥ १०४ ॥

इय सत्तमाइफासगकोडिण्णाईण कवलभोईणं ।
णेव य दुप्पणिहाणं सुप्पणिहाणस्स माहप्पा ॥ १०५ ॥

हेऊ पमत्तयाए आहारकहेव णेव आहारो ।
होज्ज जईणईआरो अण्णह तीए व तेणावि ॥ १०६ ॥

णिद्दाए वि ण हेऊ भुत्ती सहयारमेत्तओ तीसे ।
जेण सुए णिद्दिट्ठा पयडी सा दंसणावरणी ॥ १०७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ण य तस्स थोवयाए जेण अणुण्णा तओ तओ दुट्ठा ।
णिद्दव्व दुट्ठया जं णिद्दाइ पसंगओ तस्स ॥ १०८ ॥

आहारो ण पमाओ भण्णइ अववाइओ त्ति काऊणं ।
अववाया वोलीणा वीयभयाणं जिणाण जओ ॥ १०९ ॥

पत्तं ममत्तहेऊ जुत्तं वोत्तुं पुणो ण देहु व्व ।
इहरा णिम्ममभावो जिणाण कह पाणिपत्ताणं ॥ ११० ॥

झाणतवोवाघाओ आहारेणं ति ते मई मिच्छा ।
झाणं सेलेसीए तवो अ ण विसिस्सते सिं ति ॥ १११ ॥

ओरालिअदेहस्स य ठिई अ वुड्ढी य णो विणाहारं ।
तेणावि य केवलिणो कवलाहारित्तणं जुत्तं ॥ ११२ ॥

परमोरालिअदेहो केवलिणं नणु हवेज्ज मोहखए ।
रुहिराइधाउरहिओ तेअमओ अब्भपडलं व ॥ ११३ ॥

संघयणणामपगइ केवलिदेहस्स धाउरहिअत्ते ।
पोग्गलविवागिणी कह अतारिसे पोग्गले होउ ॥ ११४ ॥

मोहविलएण नाणं णामुदया चेव तस्स पारम्मं ।
तो वण्णाइविसेसो तं होउ ण धाउरहिअत्तं ॥ ११५ ॥

ओरालिअत्तणेणं तह परमोरालिअं पि केवलिणो ।
कवलाहारावेक्खं ठिइं च वुड्ढिं च पाउणइ ॥ ११६ ॥

ण य मइणाणपसत्ती कवलाहारेण होइ केवलिणो ।
पुप्फाईअं विसयं अण्णह घाणाइ गिण्हिज्जा ॥ ११७ ॥

इरिआवहिआ किरिया कवलाहारेण जइ णु केवलिणो ।
गमणाइणा वि ण हवे सा किं तुह पाणिपिहिअ त्ति ॥ ११८ ॥

ण य परुवयारहाणी तेण सया जोग्गसमयणियएण ।
ण य वाहिसमुप्पत्ती हिअमिअआहारगहणाउ ॥ ११९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ण पुरीसाइ दुगुंछियमेसिं णिद्दड्ढमोहबीआणं ।
अइसयओ ण परेसिं विवित्तदेसे विहाणा य ॥ १२० ॥

जो पुण भुत्तिअभावो केवलिणो अइसउ त्ति जंपेइ ।
सो वायामित्तेणं साहेउ सुहं खपुप्फं पि ॥ १२१ ॥

एवं कवलाहारो जुत्तीहिं समत्थिओ जिणवराणं ।
पुव्वायरिएहिं जहा तहेव लेसेण उवइट्ठो ॥ १२२ ॥

तेणं केवलनाणी कयकिच्चो चेव कवलभोई वि ।
नाणाईण गुणाणं पडिघायाभावओ सिद्धो ॥ १२३ ॥

नाणस्स विसुद्धीए अप्पा एगन्तओ ण संसुद्धो ।
जम्हा नाणं अप्पा अप्पा नाणं व अण्णं वा ॥ १२४ ॥

एवं परमप्पत्तं नाणाइदुवारगं मुणेअव्वं ।
राव्वह परमप्पत्तं सिद्धाणं चेव संसिद्धं ॥ १२५ ॥

तस्स य सहावसिद्धा किरिया गुणकरणजोगमहिगिच्च ।
कम्मुवणीआवि हवे जुंजणकरणं तु अहिगिच्च ॥ १२६ ॥

अह सो सेलेसीए झाणाणलदड्ढसयलकम्ममलो ।
कणगं व सव्वह च्चिय लद्धसहावो हवइ सिद्धो ॥ १२७ ॥

तस्स वरनाणदंसणवरसुहसम्मत्तचरणनिच्चठिई ।
अवगाहणा अणंताऽमुत्ताणं खइयविरिअं च ॥ १२८ ॥

नाणावरणाईणं कम्माणं अट्ठ जे ठिआ दोसा ।
तेसु गएसु पणासं एए अट्ठ वि गुणा जाया ॥ १२९ ॥

थिरियावगाहणाउ पत्तेअं णामगोत्तकम्मखए ।
चरणं चिय मोहखए इय अट्ठगुण त्ति बिंति परे ॥ १३० ॥

नणु सिद्धंते सिद्धो नोचारित्ती अ णोअचारित्ती ।
भणिओ तो तस्स गुणो चारित्तं जुज्जए कम्हा ॥ १३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नणु इह देसणिसेहे णोसद्दो तेण तस्स देसस्स ।
अत्थु णिसेहो किरियारूवस्स ण सत्तिरूवस्स ॥ १३२ ॥

जइ किरियारूवं चिय चारित्तं णेव आयपरिणामो ।
तो किरियारूवं चिय सम्मत्तं णायपरिणामो ॥ १३३ ॥

जं पुण तं इहभवियं तं किरियारूवमेव णेअव्वं ।
अहवा भवो ण मोक्खो णो तम्मि भवे हिअमहवा ॥ १३४ ॥

ण य मोक्खसुहे लद्धे तयणुट्ठाणस्स हंदि वेफल्लं ।
तक्कारणस्स इहरा नाणस्स वि होइ वेफल्लं ॥ १३५ ॥

णेव पइण्णाभंगो अहिआवहिपूरणम्मि चरणस्स ।
सा वा किरियारूवे सुअकरणे जं करेमित्ति ॥ १३६ ॥

अह चरणमणुट्ठाणं तं ण सरीरं विणु त्ति जइ बुद्धी ।
तेण विणा नाणाई ता तस्स अहेउअं पत्तं ॥ १३७ ॥

किरिया खलु ओदयिगी खइयं चरणं ति दोण्हमह भेओ ।
सा तेण बज्झचरणं अब्भंतरयं तु परिणामो ॥ १३८ ॥

आया खलु सामाइए आया सामाइअस्स अट्ठो त्ति ।
तेणेव इमं सुत्तं भासइ तं आयपरिणामं ॥ १३९ ॥

ण य खइयं पि चरित्तं जोगणिरोहेण तं विलयमेइ ।
अण्णह विहलो पत्तो विरहो चारित्तमोहस्स ॥ १४० ॥

तेणं सुद्धुवओगो चरणं नाणाउ दंसणमिवण्णं ।
कारणकज्जविभागा सतंतमिय किण्ण सिद्धेसु ॥ १४१ ॥

एत्थ समाहाणविही जो मूलगुणेसु होज्ज थिरभावो ।
सो परिणामो किरिया जुंजणकरणं पडिच्छंतो ॥ १४२ ॥

अण्णह वक्कजडाणं चंडाणं चंडरुद्दपभिईणं ।
णेव सिया चारित्तं सुद्धुवओगे त्ति काऊणं ॥ १४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चरणं जइ उवओगो जिणाण ता हुंति तिण्णि उवओगा ।
दोसु अ अंतब्भावे ततिअस्स पकप्पणा मोहा ॥ १४४ ॥

सेलेसीए जत्तो निवित्तिरूवो स चेव थिरभावो ।
न य सो सिद्धाणं पि य जं तेसिं वीरियं नत्थि ॥ १४५ ॥

अंते य अंतकिरिया सेलेसी अकिरिय त्ति एगट्ठा ।
नाणकिरियाहि मोक्खो एत्तो च्चिय जुज्जए एयं ॥ १४६ ॥

नणु जोगनिरोहेणं चारित्तं सासयं परं होउ ।
अण्णह तेण न मोक्खो उब्भवकाले असंतेणं ॥ १४७ ॥

केई बिंति मुणीणं सहावसमवट्ठिई हवे चरणं ।
तं लद्धसहावाणं सिद्धाणं सासयं जुत्तं ॥ १४८ ॥

चरणरिउणो न जोगा अत्थसमाएण सव्वसंवरणं ।
सिद्धे तम्मि सहावे समवट्ठाणं ति सिद्धंतो ॥ १४९ ॥

उज्जुसुयणयमएणं सेलेसीचरमसमयभावि त्ति ।
अंतसमओ चिय जओ हेऊ हेउस्स कज्जम्मि ॥ १५० ॥

न य चरणमोहबन्धो सिद्धाणं अचरणाण संताणं ।
अविरइपच्चइओ सो अइप्पसंगो हवे इहरा ॥ १५१ ॥

जं च जियलक्खणं तं उवइट्ठं तत्थ लक्खणं लिंगं ।
तेण विणा सो जुज्जइ धूमेण विणा हुयासुव्व ॥ १५२ ॥

ण य निच्छयस्स नाणे अभेयवित्ति कहं चरणविरहे ।
संतं चिय पडिवज्जइ फलेणं जं सो असंतं पि ॥ १५३ ॥

नवि आया चरणं चिय आया सामाइअं ति वयणेणं ।
दवियाया भयणाए चरणाया सव्वथोवु त्ति ॥ १५४ ॥

एत्तो च्चिय सिद्धाणं खइयम्मि नाणदंसणग्गहणं ।
समत्तजाइगहणे बहूण दोसाण संकंती ॥ १५५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अम्हं णाभिनिवेसो सिद्धाणं अचरणस्स पक्खम्मि ।
तहवि भणिमो न तीरइ जं जिणमयमण्णहाकाउं ॥ १५६ ॥

जइ वि इमो सिद्धंतो इट्ठं केसिंचि तहवि सूरीणं ।
सिद्धाणं चारित्तं तेसि मए तं मएभिहिअं ॥ १५७ ॥

तेसिं सव्वा किरिया सहावसिद्धा पणट्ठकम्माणं ।
छण्हं पि कारगाणं एगट्ठे जं समावेसो ॥ १५८ ॥

ते पुण पनरसभेया तित्थातित्थाइसिद्धभेएणं ।
तत्थ य थीणं सिद्धिं ण खमइ खवणो अभिणिवेसी ॥ १५९ ॥

तस्स मयं थीसिद्धा जे पुव्विं चेव खीणथीवेया ।
एवं पुरिसणपुंसा थीपज्जाएण नो सिद्धी ॥ १६० ॥

चरणविरहेण हीणत्तणेण पावपयडीण बाहुल्ला ।
मणपगरिसविरहाओ संघयणाभावओ चेव ॥ १६१ ॥

तम्मिच्छं वेयखओ सरीरनिव्वत्तिनियमणियउ त्ति ।
चरणविरहाइआ पुण सव्वे तुह हेयवोऽसिद्धा ॥ १६२ ॥

णेगंतियमित्थीणं दुट्ठत्तं संजमोचिया लज्जा ।
तासिं चरित्तविरहे चाउव्वण्णो कहं संघो ॥ १६३ ॥

हीणत्तं पुण नाणं लद्धिं इड्ढिं बलं च अहिगिच्च ।
णो पडिकूलमसिद्धं तिरयणसारम्मि संतम्मि ॥ १६४ ॥

पावाणं पयडीणं थीनिव्वत्तीइ बंधजणणीणं ।
सम्मत्तेणेव खए णो तेसिं पावबहुलत्तं ॥ १६५ ॥

ण य तासिं मणविरियं असुहं व सुहं वि णेव उक्किट्ठं ।
तारिसणियमाभावा तेण हओ चरमहेऊ वि ॥ १६६ ॥

कीवस्स कप्पिअस्सिव इत्थिए कप्पिआई सिद्धी वि ।
ण विणा विसिट्ठचरियं तासिं तु विसिट्ठकम्मखओ ॥ १६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पावं तह इत्थित्तं ण य पुण्णफलाण केवलीण हवे ।
परमासुइभूयाणं ण य परमोरालिओ देहो ॥ १६८ ॥

एयमजुत्तं जम्हा विचित्तभावा विचित्तकम्मखओ ।
ण य इत्थित्तं पावं जिणाण पाएण णत्थि त्ति ॥ १६९ ॥

इय इत्थीणं सिद्धी सिद्धा सिद्धंतमूलजुत्तीहिं ।
एयं असद्दहंता चिक्कणकम्मा मुणेयव्वा ॥ १७० ॥

एयं परमरहस्सं एसो अज्झप्पकणगकसवट्टो ।
एसा य परा आणा संजमजोगेसु जो जत्तो ॥ १७१ ॥

आसण्णसिद्धियाणं जीवाणं लक्खणं इमं चेव ।
तेण ण पवित्तिरोहो भव्वाभव्वत्तसंकाए ॥ १७२ ॥

जो पुण भोए भोत्तुं इच्छइ तत्तो य संजमं काउं ।
जलणम्मि पज्जलित्ता इच्छइ पच्छा स निव्वाउं ॥ १७३ ॥

को वा जियवीसासो विज्जुलयाचंचलम्मि आउम्मि ।
सज्जो निरुज्जमो जइ जराभिभूओ कहं होही ॥ १७४ ॥

देहबलं जइ न दढं तह वि मणोधिइबलेण जइयव्वं ।
तिसिओ पत्ताभावे करेण किं णो जले पियइ ? ॥ १७५ ॥

बलकालसोयणाए अलसा चिट्ठंति जे अकयपुण्णा ।
ते पत्थिता वि लहुं सोइंति सुहं अपावंता ॥ १७६ ॥

जह णाम कोइ पुरिसो न धणट्ठा निद्धणो वि उज्जमइ ।
मोहाइपत्थणाए सो पुण सोए ति अप्पाणं ॥ १७७ ॥

जो पावं गरहंतो तं चेव निसेवए पुणो पावं ।
तस्स गरहा वि मिच्छा अतहक्कारे हि मिच्छत्तं ॥ १७८ ॥

चुयधम्मस्स उ मुणिणो सुट्ठुयरं किर सुसावगत्तं पि ।
पडियं पि फलं सेयं तरुपडणाओ न उच्चं पि ॥ १७९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संजमजोगे अब्भुट्ठियस्स संचत्तबज्झजोगस्स ।
ण परेण किंचि कज्जं आयसहावे णिविट्ठस्स ॥ १८० ॥

संविग्गो गीयत्थो बोहेउ परं पराइ करुणाए ।
अण्णो पुण तुसिणीओ पुव्विं बोहेउ अप्पाणं ॥ १८१ ॥

दव्वेण जो अणेगो गच्छे सो भावओ हवे एगो ।
एगागी गीओ च्चिअ कयाइ दव्वे अ भावे अ ॥ १८२ ॥

किं बहुणा इह जह जह रागद्दोसा लहुं विलिज्जंति ।
तह तह पयट्टियव्वं एसा आणा जिणिंदाणं ॥ १८३ ॥

अज्झप्पमयपरिक्खा एसा सुत्तीहिं पूरिया जुत्ता ।
सोहंतु पसायपरा तं गीयत्था विसेसविऊ ॥ १८४ ॥

## प्रशस्तिः

एतां वाचमुवाच वाचकवरो वाचंयमस्याग्रणी-
रस्या एव च भाष्यकृत्प्रभृतयो निष्कर्षमातेनिरे ।
एतामेव वहन्ति चेतसि परब्रह्मार्थिनो योगिनो,
रागद्वेषपरिक्षयाद्भवति यन्मुक्तिर्न हेत्वन्तरैः ॥ १ ॥

लावण्योपचयो यथा मृगदृशः कान्तं विना कामिनं,
भैषज्यानुपशान्तभस्मकरुजः सद्भक्ष्यभोगो यथा ।
अप्रक्षाल्य च पङ्कमङ्कसिचये कस्तूरिकालेपनं,
रागद्वेषकषायनिग्रहमृते मोघ(घः)प्रयासस्तथा ॥ २ ॥

आत्मध्यानकथार्थिनां तनुभृतामेता गिरः श्रोत्रयोः,
श्रीमज्जैनवचोऽमृताम्बुधिसमुद्भूताः सुधाबिन्दवः ।
एता एव च नास्तिकस्य नितरामास्तिक्यजीवातवः,
सन्तप्तत्रपुसम्भवद्रवमुचः पीडाकृतः कर्णयोः ॥ ३ ॥

आशाः श्रीमदकब्बरक्षितिपतिश्चित्रं द्विषद्भामिनी-
नेत्राम्भोमलिनाश्चकार यशसा यस्ताः सिताः प्रत्युत ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकः सैन्यतुरङ्गनिष्ठुरखुरक्षुण्णां चकार क्षमा-
मन्यस्तां हृदये दधार तदपि प्रीतिर्द्वयोः शाश्वती ॥ ४ ॥

स श्रीमत्तपगच्छभूषणमभूद्भूपालभालस्थल-
व्यावल्गन्मणिकान्तिकुङ्कुमपयः प्रक्षालिताङ्घ्रिद्वयः ।-
षट्खण्डक्षितिमण्डलप्रसृमराखण्डप्रचण्डोल्लसत्
पाण्डित्यध्वनदेकडिण्डिमभरः श्रीहीरसूरीश्वरः ॥ ५ ॥

स्वैरं स्वेहितसाधनीः प्रसृमरे स्वीयप्रतापानले
वाग्मन्त्रोपहृता विपक्षयशसामाधाय लाजाहुतीः ।
यो दुर्वादिकुवासनोपजनितं कष्टं निनाय क्षयं,
स श्रीमान् विजयादिसेनसुगुरुस्तत्पट्टरत्नं बभौ ॥ ६ ॥

धारावाह इवोत्रमय्य नितमां यो दक्षिणस्यामपि,
स्वैरं दिक्षु ववर्ष हर्षजननीर्विद्वत्पदाख्या अपः ।
तत्पट्टत्रिदशाद्रितुङ्गशिखरे शोभां समग्रां दधत्,
स श्रीमान् विजयादिदेवसुगुरुः प्रद्योतते साम्प्रतम् ॥ ७ ॥

यद्गाम्भीर्यविनिर्जितो जलधिरप्युल्लोलकल्लोलभृत्
राज्ञेसर्वमिदं निवेदयति किं व्याकीर्णलम्बालकः ।
तत्पट्टोदयपर्वतेऽभ्युदयिनः पुष्णाति पूष्णस्तूलां,
स श्रीमान् विजयादिसिंहसुगुरुः सौभाग्यभाग्यैकभूः ॥ ८ ॥
गच्छे स्वच्छतरे तेषां परिपाट्योपतस्थुषाम् ।
कवीनामनुभावेन नवीनां कृतीमादधे ॥ ९ ॥

सहस्रैर्मघवा हरश्च दशभिः श्रोत्रैर्विधिश्चाष्टभि-
र्येषां कीर्तिकथां सुधाधिकरसां पातुं प्रवृत्तां समम् ।
ते श्रीवाचकपुङ्गवास्त्रिजगतीविख्यातधामाश्रयाः,
कल्याणाद्विजयाह्वयाः कविकुलालङ्कारतां भेजिरे ॥ १० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हैमव्याकरणे कषोपल इवोद्दीप्तं परीक्षाकृतः,
पर्य्यैक्षन्त निबद्धरेखमखिलं येषां सुवर्णं वचः ।
ते प्रोन्मादिकुवादिवारणघटानिर्भेदपञ्चाननाः,
श्रीलाभाद्विजयाह्वयाः सुकृतिनः प्रौढश्रियं शिश्रियुः ॥ ११ ॥

यत्कीर्त्तिश्रुतिधूतधूर्ज्जटिशिरोविश्रस्तसिद्धापगा-
कल्लोलप्लुतपार्वतीकुचगलत्कस्तूरिकापङ्किले ।
चित्रं दिग्वलये तयैव धवले नो पङ्कवार्त्ताप्यभूत्,
प्रौढिं ते विबुधेषु जीतविजया प्राज्ञाः परामैयरुः ॥ १२ ॥

येषामत्युपकारसारविलसत्सारस्वतोपासनाद्,
वाचः स्फारतराः स्फुरन्ति नितमामस्मादृशामप्यहो ।
धीरश्लाघ्यपराक्रमास्त्रिजगतीचेतश्चमत्कारिणः
सेव्यन्ते हि मया नयादिविजयप्राज्ञाः प्रमोदेन ते ॥ १३ ॥

तेषां प्राप्य परोपकारजननीमाज्ञां प्रासादानुगां
तत्पादाम्बुजयुग्मसेवनविधौ भृङ्गायितं बिभ्रता ।
एतन्न्यायविशारदेन यतिना निःशेषविद्यावतां
प्रीत्यै किञ्चन तत्त्वमाप्तसमयादुद्धृत्य तेभ्योऽर्पितम् ॥ १४ ॥

यद्युच्चैः किरणाः स्फुरन्ति तरणेस्तत्किं तमःसञ्चयैः,
स्वायत्ता यदि नाम कल्पतरवः स्तब्धैर्द्रुमैः किं ततः ।
देवा एव भवन्ति चेन्निजवशास्तत् किं प्रतीपैः परैः
सन्तः सन्तु मयि प्रसन्नमनसोऽत्युच्छृङ्खलैः किं खलैः ॥ १५ ॥

भिन्नस्वर्गिगिरिसानुभानुशशभृत्प्रत्युच्छलत्कन्दुक-
क्रीडायां रसिको विधिर्विजयते यावत्स्वतन्त्रेच्छया ।
तावद्भावविभावनैककुतुकी मिथ्यात्वदावानल-
ध्वंसे वारिधरः स्फुरत्वयमिह ग्रन्थः सतां प्रीतिकृत् ॥ १६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अज्ञातकविकृतम्

# ।। जैनविहारशतकम् ।।

उद्यन्माणिक्यमालाबहलतरमिलन्निर्यदङ्कूरपूर-
ध्वस्तध्वान्तप्रतानाप्रतिमविरचितानुत्तरोद्धानचैत्यम् ।
काञ्चिल्लक्ष्मीं जगाहे जलनिधिवसनाम्भोधिशायिप्रियाया-
श्चूडारत्नं महीय: शिरसि विनिहितं जह्नुनालीभुवेव (?) ।। १ ।।

आकाशे पारवश्यान्नलिनतनुरुहो निस्सहायावलम्बो
नित्यप्राचीप्रतीचीजलधिपुलिनभूसीमभूमभ्रमीभि: ।
अन्त:सञ्जातखेदादिव दिवसमणि: शक्नुवन्नाभिगन्तुं
कुत्रापि छद्मनाऽस्या जिनपतिवसते: क्षोणिमालम्ब्य तस्थौ ।। २ ।।

ब्रध्नेन स्थास्नुनेव प्रमथिततमसा येन चैत्येन नित्यं
व्यक्तिं भूमौ निशाह्नो: कथमपि न हृदा विन्दतां कौतुकेन ।
तल्लक्ष्मीं निर्निमेषं स्वनयनविषयीकुर्वतां कोविदानां
वृन्दं वृन्दारकाणामिव पुरि सुमनोवक्षसां भासते स्म ।। ३ ।।

आशासारङ्गचक्षु:समुदयसदनप्राङ्गणाध्वन्यदेश्य-
स्फूर्जज्ज्योतिर्वितानप्रकटितपरिधिभ्राजिजैनेन्द्रधाम्ना ।
उद्भिन्नैर्वैभवै: स्वैर्दशशतकिरणो येन मन्येऽभिभूत: ।
साम्यायाम्भोधिशय्यं परिचरति हरिं सोऽनुसायं समेत्य ।। ४ ।।

रुद्रस्याप्युत्तमाङ्गे हठकृतवसतेर्बिभ्रतोऽपि त्रिशूलं
लक्ष्मच्छिद्रेण राज्ञ: सममपि महसां राशिमादाय विद्य: ।
प्रासादं पद्मजन्मा प्रवणमणिगणाकीर्णमेनं व्यधत्त
स्यान्नैवं चण्डरश्मेरिव हिमकिरणस्यास्य किं न प्रताप: ।। ५ ।।

कोकानामिन्दुकान्ताप्रहरविरहिणामश्रुभिर्व्याकुलानां
बन्धूनां याचतां स्वां वसतिमनुदिनं तत्कृपालुर्धरायाम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उद्यन्माणिक्यवप्रोपधिपरिधियुगाधाय मूर्तिं द्वितीयां
विघ्नः प्रासाददम्भाद् गगनमणिरसौ निर्मिमीते स्म वासम् ॥ ६ ॥

त्वत्पादस्पर्शभाग्यैरभवमहमहो नन्दनोल्लासिलक्ष्मी-
र्विस्फूर्जद्भद्रशालो घनकनकमयः देवराजाभिगम्यः ।
शम्भो ! चैतन्यभूयं प्रवितर किमदो वक्तुकामः सुमेरु-
र्मन्ये प्राकारदम्भादररियुगगरुत्कुण्डलीभूय भेजे ॥ ७ ॥

मूर्छद्गर्जानिनादप्रबलजलभरानन्तराम्भोदमाला-
माद्यद्विद्युद्विलासैः स्फुरुदुरुकिरणैः सोदरत्वं दधानः ।
रौप्यैश्चैत्यैरनुच्चैः स्फुरति परिवृतः सर्वतो यो विहारः ।
प्रोन्मीलत्कुन्दवृन्दैरिव परिकलितश्चम्पको जृम्भमाणः ॥ ८ ॥

निर्याताम्भोदरोधप्रसृमरकिरणप्रस्फुरत् शारदीन-
श्यामारामोपयन्तुर्विशदिमललितज्योत्स्नया स्पर्धमानैः
क्षुद्रैश्चैत्यैः परीतः कमपि नयनयोर्यस्तनोति प्रमोदं
प्रोत्फुल्लत्पुण्डरीकैरिव कनकमयः कुड्मलः शातपत्रः ॥ ९ ॥

पारावाराम्बरेयान्तरनिचितकृतस्याप्तभूमीन्दुगेहो
नीचैःप्रस्थापितस्याशनिमणिपटलीक्लृप्तपाटस्य दम्भात् ।
उश्मः(?)संसाररङ्गाङ्गणनटनजुषां यातनाः कुर्वतीनां
सप्तानां दुर्गतीनां प्रतिघघनमनाः यः प्रहर्तुं प्रवृत्तः ॥ १० ॥

क्षिप्तैर्यत्पादकाधःकनकनिधिघटैरित्यमुष्मिन्नव्ये
जाते जैनेन्द्रगेहे प्रणयतु सुजनोऽमुं परावृत्य कश्चित् ।
कुक्ष्यन्तर्लब्धलीलैरिव सुतमणिभिर्वाहिनी कान्तकाञ्ची
मन्ये तैरेव कुम्भैः समजनि भुवने पद्मगर्भेति नाम्ना ॥ ११ ॥

विस्फुर्जद्वज्रराजीं जिनपतिसदनोद्दामपादप्रपञ्चां
यस्मिन् संभाव्य भव्या इति निजमनसा तर्कमातन्वते स्म ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वासां दुर्गतीनां विदलयितुमना भूधराणामिवायं
वज्री श्रीमद्विहारः सममुदितरुषा प्राहिणोद् वज्रलेखाः ॥ १२ ॥

भास्वत्स्वर्णाद्रिमुख्यान्निजविभवभरैः स्पर्धमानांस्त्रिलोकी
जैत्रान्निर्जित्य जिष्णुः क्षणमिह निखिलान् वीरमानी विहारः ।
पातालं पादकेनासममहिमजुषा स्वात्मना भूमिलोकं
शृङ्गैरभ्रंकषैः स्वैर्निखिलदिवमिवाक्रम्य मन्येऽधितस्थौ ॥ १३ ॥

दीपैर्गेहेषु भेद्यैर्गिरिगहनगुहास्वौषधीभिर्बिलेषु
व्यालस्फूर्जन्मणीभिः शशिमिहिरकरैर्नक्तमह्नीति खिन्नम् ।
नालंभूष्णुर्निवस्तुं क्वचिदपि तमसां सङ्करः कांदिशीको
यस्मिन् मन्ये शरण्ये शरणमिव गतो नीलभित्तिच्छलेन ॥ १४ ॥

यस्मिन् विस्मेरलीलाचलदलपटलारब्धकेलीमराली-
निस्यन्दिस्यन्दबिन्दून्मिषितकुमुदिनीगौरिमस्पर्धिधर्मा ।
रेजे सोपानपङ्क्तिः पवितुमिव विभोर्नित्यभक्त्या नभस्त
उच्चैरुच्चैस्तरङ्गीभवदमलपया जह्नुकन्योत्ततार ॥ १५ ॥

प्रीत्या पौरन्दरीयालयपरपदवीचन्द्रशालां विशाला-
मारोढुं कामुकानां वृषभरसुभगं भावुकानां जनानाम् ।
निर्वर्ण्यागण्यनानामणिगणकलितस्फीतसोपानदम्भा-
च्चक्रे निश्रेणिकेवावनिबलिनिलयस्वर्ललामेन येन ॥ १६ ॥

उद्वेलानन्दपाथोनिधिबलपयःशुद्धभावावरुद्धा
यस्मिन्नभ्येत्य भक्तिं भगवति विदधत्यङ्गभाजां समूहाः ।
तेषां न स्यात् कदाचित् कुगतिगतिरिति व्याहरन् यो विहारो
रेखाश्चक्रे किमष्टोत्तरशतगणिताः स्वीयसोपानदम्भात् ॥ १७ ॥

त्वत्पादाम्भोजभक्तिप्रणयनवशतः सर्वतस्तुङ्गभावा
धुर्यत्वं दानभाजां वसतिरपि पुनर्यावदाशावसानम् ।
लेभेऽस्माभिः पुनस्त्वं प्रणयजिनमहानन्दलीलानिवासं
जानीमो दिग्गजेन्द्रा इति गदितुमदश्चित्रदम्भाद् भजन्ते ॥ १८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रासादे तोरणान्त:परिलिखितवपु:शालभञ्जीप्रसून-
श्रेणीसन्दर्भमालाङ्कितकरकमला यत्र लीलायते स्म ।
शङ्के स्वायंवरस्रक्व लितकरतला सिद्धिशातोदरीयं
तिष्ठत्यस्मिन् वरीतुं वरमभिलषितं सञ्चरद्यज्जनेषु ॥ १९ ॥

प्रेङ्खन्माणिक्यमालाबहलतरमिलल्लोललीलार्चिरम्भ:-
स्तोमप्रक्षालितोर्वीतलमलिनतमोजालजम्बालमाल: ।
प्राकारो धाम्नि शम्भोरवचनविषयवैभवं स्माऽऽबिभर्ति
स्वर्भाणोर्भीरुभानू रचितचय इव क्षोणिपीठेऽध्युवास ॥ २० ॥

दुर्जेयो जैत्रभावासहचरपटलीकीलनाव्याकुलानां
निर्णश्यत्प्राणभाजामिह निजशरणीभावमभ्यागतानाम् ।
एतद्द्वेष्यानिवान्तर्द(र्विद)लयितुमसावीहमानो विहार: ।
प्राञ्चद्वज्रोपलानां निचयपरिचितं निर्मिमीते स्म दण्डम् ॥ २१ ॥

निर्यज्ज्योतिर्जटालज्वलदनलशिखालोललीलायमान:
स्वीयप्राञ्चद्विभूषाविदलितनलिनीनायकाखर्वगर्व: ।
यस्मिन्नुद्दामरत्नप्रकरपरिचितो मण्डपो दीप्यते स्म
शङ्के सङ्केतगेह: सहमिलितुमद: कामुकै: सिद्धिलक्ष्म्या: ॥ २२ ॥

स्फूर्जद्गर्जन्नभस्योन्नतसजलमीलन्नूतजीमूतमाला-
धिक्कारिध्वानघण्टाबधिरितभुवनो मण्डपोऽस्मिंश्चकासे ।
मन्ये स्वर्लोकभूमीतलबलिनिलयक्षीरसिन्धूद्वहाया:
उत्तालं सूत्रधार्या: कनकमणिमयी नर्तितुं रङ्गशाला ॥ २३ ॥

अन्तर्नीलोपलश्रीस्फुरदरुणमणीश्रेणिसंदर्भगर्भा
यस्मिन् ज्योतिस्तरङ्गीभवदमलपयश्चान्द्रभूमी बभासे ।
मन्ये मत्तालिमाला बहलतरदलल्लोललीलादलाली
शोणाम्भोजन्मपुञ्जा शिवहरिणदृश: खेलितुं केलिवापी ॥ २४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वं निर्मथ्य सारं कनकशिखरिणा दत्तवानेष शेषं
गुप्तं यत् किञ्चिदास्ते तदपि पुनरितो विष्णुरादातुकामः ।
तद् दुःखं मे कृपालो व्यपनय निखिलं वक्तुमित्याजगाम
क्वाप्यस्मिन् दुग्धपाथोनिधिरिव विधुरः स्फाटिकोर्वीमिषेण ॥ २५

प्रासादे कुम्भ-भद्रासन-शफरयुगा-ऽऽदर्शक-स्वस्तिकाद्यै-
रष्टाभिः सान्द्रचन्द्रोपलदलकलितैर्वस्तुभिर्भद्रकृद्भिः ।
दध्रे काचिद् विभूषा शिवपुरनिगमाध्वन्यलीलाधराणां
प्रत्यूहव्यूहबाधं सममिव जगतीजन्मनां कर्तुकामैः ॥ २६ ॥

दुर्जेयान् पञ्चबाणप्रबलतममदाद्वैतदुष्टाष्टकर्म-
द्वेषाज्ञानानुरागासहचरनिवहान् हेलयैवाभिभूय ।
नानामाणिक्यवर्णस्फटिकसमुदयोत्तम्भितस्तम्भदम्भात्
कीर्तिस्तम्भान् जयाङ्कान् जिनगगनमणिः स्थापयामास मन्ये ॥ २७ ॥

आलम्बा अन्धसंसृत्यवटनिपततां सर्वथा बोभवामोऽ-
धःकर्तुं शक्तिमन्तो नरकपरि[ग]तान् कुम्भिकानां समूहान् ।
क्रान्त्वा कुम्भीरधस्ताद् घनकनकमयाः स्तम्भवारा विहारे
स्फूर्जन्निर्यत्करैः स्वैर्जगति मतिमतां व्याहरन्तीति मन्ये ॥ २८ ॥

यस्मिन्नुत्तुङ्गपीनस्तनकलशशिखाऽऽभोगभुग्नाङ्गभागाः
स्वर्णस्तम्भावनद्धा विदधति कुतुकं नेत्रयोः शालभञ्ज्यः ।
मन्ये यत् पौरनीलोत्पलदलनयनावैभवेनाभिभूता-
स्तत्साम्यं प्राप्तुकामा इव सुरललना देवदेवं भजन्ते ॥ २९ ॥

मुक्ताप्रालम्बलम्बीकृतकरकमलाः सालभञ्जीसमूहा
लीलायन्ते जिनेन्दोर्वसतिविलिखिताः स्तम्भसम्बद्धकायाः ।
अभ्येत्यैतास्त्रिदश्यः परिभवितुमदः सन्ततीरीहमानाः
मन्ये पुर्याः पुरन्ध्रीविभवभरजिता मन्त्रमाराधयन्ति ॥ ३० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वाङ्गीणानुरूपानणिमलवणिमाद्वैतवादाभिभूत-
स्वर्वामा मालिकाभिः शरदमृतकरप्रत्यनीकाननाभिः ।
जित्वा बन्दीकृताः किं जिनवृषभगृहस्तम्भलीलायितानां
व्याजात्यां चालिकानां भुजगपरिवृढप्रौढपारिप्लवाक्ष्यः ॥ ३१ ॥

यस्यां संस्पर्धमाना निजविभवभरैर्वर्णिनीवर्ण्यवर्णा-
निर्वर्ण्यानन्यचित्रीकृततनुलतिकाः पुत्रिकाणां मिषेण ।
आजग्मुः कर्तुकामा रहसि हृदि निजे तज्जयोपायमन्त्रं
शङ्के सम्भूय भूमीवलिसदनदिविस्मेरदम्भोरुहाक्ष्यः ॥ ३२ ॥

त्रैलोक्याजेयमोहत्रिपुररिपुरिपुद्वेषविद्वेषभाजां
संप्रापय्यातिदृप्तानिह जगति यशःशेषभूयं समूहान्
प्रासादे सालभञ्जीकरकमलचलच्चामरच्छत्रराजी
व्याजात् तद्राजचिह्नान्ययमिव भगवानग्रहीदाग्रहेण ॥ ३३ ॥

काश्चिच्चङ्गेरिकाभिर्विलिखितवपुषो व्यग्रहस्ता विहारे
पाञ्चाल्यस्त्वत्पदाम्भोरुहपरिचरणात् स्वर्गवासं प्रपन्नाः ।
आप्तेन्दो ! देहि बद्धाञ्जलय इव महानन्दसौख्यश्रियं नो
जानीमो वक्तुकामा इति विबुधवशाः स्वर्गलोकादुपेयुः ॥ ३४ ॥

मोहालस्योन्मदिष्णुप्रतिभटपटलैस्ताड्यमाना प्रचण्डै-
र्दण्डाघातैरखण्डैर्विषयसुखमयैः क्वाप्यशक्ता निवस्तुम् ।
यस्मिंश्चित्रीकृतोर्वीतलबलिनिल[य]स्वस्त्रयाणां मिषेण
प्रासादस्यावनीन्दोरिव शरणमगात् कान्दिशीका त्रिलोकी ॥ ३५ ॥

श्यामत्वाश्लिष्टमास्यं वपुरपि सविषं दुर्दिनं कारिता च
शून्याकाशे निवासो जगति मदयशो देव ! निर्णाशमेति ।
अन्तःसम्बद्धशोणोपलदलविलसन्नीलभित्तिच्छलेना-
श्लिष्यद्विद्युत्कलत्रो गदितुमिति घनः शीलयामास शम्भुम् ॥ ३६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुर्वाणा स्पर्धिभावं सहमहिमविभावैभवैः स्वैरसह्यैः
स्वर्णाद्रिश्वेतरोचिदिवसमणिमुखा नैष जैत्राङ्ककारान् ।
श्रीमज्जैनो विहारः परिभवपदवीं तान्निनीषुर्विशेषा-
न्मन्ये सैन्यं ससज्ज क्वचन विलिखिताऽनीकिनीकैतवेन ॥ ३७ ॥

रोचीरोचिष्णुसान्द्रामृतकिरणमणीधोरणीसंनिबद्ध-
प्रासादाधित्यकायां प्रतिमितरजनीनायको निर्बभासे ।
उद्वेलोल्लोललोलज्जलपटलमिलद्दुग्धपाथोधिवसु-
र्जातभ्रान्त्या विमुग्धः किमु मिलितुमना आजगामेन्दुसूनुः ॥ ३८ ॥

उद्दण्डाखण्डचण्डद्युतिमणिकिरणश्रेणिसङ्कीर्णभित्ति-
र्निर्वर्ण्य स्पर्धमानं स्वपरमविभवैर्द्वादशात्मीयबिम्बम् ।
दृप्तस्तं जेतुकामो जिनवृषभगृहोऽभ्रङ्कषैः शेखरैः स्वैः
रोषात् संरुध्य तस्यानिलपथपदवीं तस्थिवानेष मन्ये ॥ ३९ ॥

निर्धूतामुक्तमुक्तासरनिकरलसत्कण्ठपीठोपकण्ठ्योऽ-
न्योऽन्येनोत्पीडिपीनस्तनकलशयुगात् कान्तकान्तोर्ध्वकायाः ।
शोभन्ते शालभञ्ज्यस्त्रिदशपतिपुरीयत्पुरी निर्जितश्री-
स्तस्याः संसेवनायाप्सरस इव निजाः प्राहिणोन्मेनकाद्याः ॥ ४० ॥

प्रासादे शेखराणामुपरि विरचितस्वर्णकुम्भावलीनां
सार्धं प्रेङ्ख[द्]ध्वजेनासितनभसि बभे सङ्गतार्चि[र्वि]भाभिः ।
सङ्गोऽभूद् वाहिनीनामिव दिवि तिसृणां स्मेरहैमाब्जराजी-
निस्यन्दिस्यन्दपिङ्गीकृतकमनसुता सूर्यजा जाह्नवीनाम् ॥ ४१ ॥

प्रासादे स्वर्णकुम्भा दधति दिविरुचिं बर्हिबर्हप्रबर्हा
माङ्गल्यस्मेरदूर्वाङ्कितजलकलशाः सूचयन्तः शिवानि ।
सिद्धेः सम्प्रस्थितानामिव पथि मथिताऽनेकदुष्कर्ममर्म-
ध्यानार्चिर्मालिकीलाहुतविषयिहविःशेमुषीभूषितानाम् ॥ ४२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुक्त्वा संसारकारां शिवपुरगमने वः समीहा यदि स्या-
दभ्येताभ्येत लोकाः सपदि तदखिलं लीलया कर्त्तुमीशे ।
श्रद्दध्वं चेन्न विष्णोः पदि विधृतकरः स्पर्शनं चित्रभानोः
कुर्वेऽदः किङ्किणीनां क्वणनकपटतो भाषते जैनगेहः ॥ ४३ ॥

कुत्राप्युल्लेखकर्मीकृततुरगगजस्पन्दनोन्मत्तपत्ति-
श्रेणीलीलायमानप्रबलबलयुतोऽलङ्कृतो नैकरत्नैः ।
श्रीमत्प्रासादचक्री निचिततमतमःकन्द[रा]या इवासौ
द्वारं निर्वाणपुर्या इव वहतितमां दण्डमुद्धाटनाय ॥ ४४ ॥

आलम्बीकृत्य कश्चित् प्रसरति भुवने निम्नगानाथनेर्मी
वान्यः पातालमूलं गलदवधितया स्वैरलीलायमानः ।
वाहस्त्रिस्त्रोतसोऽन्यो नभसि विगलितालम्बसञ्जातखेदः
प्रेङ्खोलद्वैजयन्तीपटपटुकपटाद् यं समालम्ब्य तस्थौ ॥ ४५ ॥

रम्भाभिः श्रीभिरीशैः कविगुरुविबुधैर्नैकसन्तानकल्पै-
र्गौरीभिर्जिष्णुवृन्दैः समुदितपुरुषेपूत्तमैः शेवधीशैः ।
सङ्ख्यातीतैरितीवानणुनिजविभवैर्निर्जराणां नगर्या
विश्वावस्वोकसारा किमु हसितमदः केतुना निर्मिमीते ॥ ४६ ॥

तुङ्गिम्ना ज्योतिषा वा परमसुखमया वात्मना स्पर्धमानान्
सर्वान् जैत्रीककारानभिभवपदवीं लम्भयित्वाऽभियातीन् ।
प्रासादः सार्वभौमः स्वशिरसि वहते स्माग्रहग्रन्थिबद्ध-
प्रेङ्खल्लीलापताकापटमिव विजयोद्दीपकोद्दामचिह्नम् ॥ ४७ ॥

प्रेङ्खोलत्किङ्किणीनां मधुरिमललितध्वानदत्तावधानं
नादन्ते नो पिबन्ते न च तृणपयसी वीक्ष्य सारङ्गशावम् ।
एणाङ्कः प्राप चित्ते मुदमिति यदसौ पानवल्भे न कुर्वन्
गन्ता पञ्चत्वमन्ते ननु भवति पुरां कक्षितिर्मे यशश्च(?श्च) ॥ ४८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूमौ द्वीपान्तरे वा निखिलबलिगृहे वासगेहे मघोनो
भूतो भावी भवन् वाऽपरिमितमहिमा मत्सदृक्षोऽत्र कश्चित् ।
भ्रातस्त्वं याहि पश्येत्युपहृतवचनो निक्वणैः किङ्किणीनां
मैत्र्यं कृत्वेव कान्त्या मिथ इति मिहिरं प्रेषयत्याप्तगेहे ॥ ४९ ॥

कैवल्योत्फुल्लनीलोत्पलदलनयना दूरदेशाधिवासा-
मौत्सुक्यादीहमानं सहृदयनिवहा भावमन्तर्वहन्तः ।
यत्शृङ्गे किङ्किणीनां बहलितनिनदैः प्रीतिसन्देशमस्या
विद्यः सम्प्रापयन्त्युत्कलिकितहृदया अन्तराकृत्य चैत्यम् ॥ ५० ॥

पातालं शैलमौलीन् जलनिधिपुलिनान् वाहिनीनां प्रवाहान्
तारामार्गं दिगन्तान् घनगहनगुहाः पौरहूतांश्च गेहान् ।
प्रासादे किङ्किणीनां निनदसमुदयाः सर्वतः पूरयन्तः
श्रीमच्चैत्यावनीन्दोस्त्रिभुवनविजयोद्दीपिनी घोषणेव ॥ ५१ ॥

यस्मिन्नुन्निद्रसान्द्रद्युमणिमणिगणोत्कीर्णकुड्यौद्यदर्चिः-
स्तोमस्तम्बेरमारिप्रतिहततिमिरोन्मत्तमातङ्गराशेः ।
लीलाशय्यालिकायां जिनरजनिपतेर्मुक्तिमत्तेभगत्या
गर्भागारस्य दम्भादिव विरचयितुं नैकधाः स्वैरकेलीः ॥ ५२ ॥

तावद् भर्ता पुराणः स वसति जलधौ दृप्तयादोभिरुग्रैः
शेते वा दुष्प्रसह्यः स्मरघनसमये नागराजाधिशय्यः ।
मुद्रास्तव्याकुलास्यां सरसिजशशिनोर्यामि चेत् तात ! लक्ष्म्या
धात्रेतीवार्थितेन स्वसुखवसतये जैनधाम व्यधायि ॥ ५३ ॥

उन्मीलच्चञ्चुचित्रीकृतकुमुदवनानन्दनाम्भोजबन्धु-
स्तोमैः संसेवितेनामररमणपुरीलेख्यलीलायितेन ।
वाचां पारप्रयातैर्विभवसमुदयैश्चैत्यभूमी मघोना
मन्ये निर्जित्य बन्दीकृत इव सुमनोभूधरश्चित्रदम्भात् ॥ ५४ ॥



For Private And Personal Use Only

कं वा संसक्तनीलोत्पलदलविलुलन्मालिकालब्धलीलैः
कुम्भैराशावसानप्रसृमरकिरणाकीर्णचान्द्रावनद्धैः ।
यस्मिन्नक्षत्रताराग्रहमिलदुदयावृत्तिमार्गावलग्नै-
रभ्युद्गच्छत्सहस्रामृतकिरणमिव व्योम संजायते स्म ॥ ५५ ॥

अन्तःसञ्जातकौतूहलकलित इवानन्तमप्यन्तरिक्षं
श्रीमज्जिनेन्द्रगेहः परिमितविषयीभावमानेतुकामः ।
अन्योन्याश्लिष्यदुद्यद्दिवसमणिमणीधोरणीधूतनूता-
नन्तध्वान्तप्रसर्पद्द्युतिकृतपरिधिभ्राजि दण्डं बिभर्ति ॥ ५६ ॥

स्त्यानीभूतामृतांशुद्युतिहरशिखरिस्फीतकर्पूरपारी-
मुक्ताक्षोदावदाता घनपवनचलत्केतवो यत्र रेजुः ।
निक्वाणैः किङ्किणीनामवनिबलिगृहस्वर्गिणां जह्नुकन्या
मन्येऽनेकप्रवाहा इह समुपगताः कुर्वते किंवदन्तीः ॥ ५७ ॥

निस्तन्द्रज्योतिरुद्यद्विधुमणिललितोत्तुङ्गशृङ्गान्तराले
वातूलोल्लोलकेतूल्लिखितमकरिकाबिम्बिकायश्चकासे ।
आरुह्यात्मीययानं मकरमिव विभोर्गेहमार्गेण गङ्गा
भूमीगङ्गां सगोत्रां मिलितुमिव महीमुत्तरन्ति नभस्तः ॥ ५८ ॥

यस्मिन्सान्द्रेन्द्रनीलोपलकृतशिखरश्रेणिलीलाविनिर्यद्-
राजज्योतिःप्ररोहैः परिवृतमभितो भासते केतुवासः ।
शङ्के संरूढशष्पाङ्कितपुलिनतला सिद्धसिन्धुर्वहन्ती
चित्ते रङ्गत्त्रियामापतिहरिणशिशोर्भ्रान्तिरित्याविरासीत् ॥ ५९ ॥

वक्षःपीठान्मुरारेः स्मितनलिनवनात् स्वःसदां वासगेहात्
प्राणेशात् कौमुदीनामनणुमणिगणात् श्रीमतां वा समूहात् ।
आदायाम्भोजयोनिः सरसिजसदनां भिन्नभिन्नप्रतिष्ठा-
मेकत्रायं दिदृक्षुः कुतुकितहृदयः किं विहारं व्यधत्त ॥ ६० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेगेनानन्ततारापथचरणवशादन्तरुद्भूतखेदो
भावादालम्बनस्य स्वनिपतनभिया बान्धवोऽम्भोरुहाणाम् ।
यस्मिन्नुत्तुङ्गशृङ्गाङ्गणशिखरशिखाभोगसंलग्नरोचि-
र्व्याजेनेवावलम्बं निजकरनिकरैराददानो विहस्तः ॥ ६१ ॥

प्रासादेन प्रसर्पन्निजकरनिकरैः स्पर्धिभावं दधानो
न्यच्चक्रे लीलयाऽसौ बहलकमलया तं पुनर्जेतुकामः ।
तुङ्गिम्ना वा श्रियाऽस्मात् कमपि गुरुतरं भ्राम्यतीवेक्षमाणो
नैवं चेत् किं नु पूर्वापरजलधिभुवि भ्राम्यति द्वादशात्मा ॥ ६२ ॥

प्रासादेनाप्तभर्तुः परमसुषमया लोकचक्षुश्चकोर-
ज्योत्स्नालीलां दधत्या मरुदवनिधरो धिक्कृतिं लम्भितोऽसौ ।
कर्तुं तस्मै प्रसत्तिं पुनरपि किमसौ सर्वतः क्षुद्रचैत्य-
प्रस्थश्रेणीमिषेण व्यरचयदुपदां रत्नसानून्यमूनि ॥ ६३ ॥

भूमीपीठावकुण्ठीकृतकठिनहठध्वान्तसन्तानहेतु-
र्यस्मादंशैः प्रवृद्धस्तमपि खरकरं स्वीयभासा जिगाय ।
तस्मादेतत्पुरस्तात् किमणुरहमिहेत्युद्भवद्भूरिभीतेः ।
पीयूषान्तःप्रवाहैः रजनिवरयिता निःसृतैः स्विद्यतीव ॥ ६४ ॥

यस्मिन् कुत्रापि नीलोपलकृतशिखरान्निसृताभांशुदूर्वा-
नव्याङ्कुरभ्रमेणानणुमणिघटितानेकवाहच्छलेन ।
राज्ञा मुक्तावनावात्मन इव तुरगा रक्षितास्ते दशैवा-
शेषाशालङ्घनायै किमुत परिमितास्तस्य नो चेद् भवेयुः ॥ ६५ ॥

यस्मिन्निर्यन्मरीचिप्रसृतिपरिचितानेकदिक्खञ्जनाक्षी-
सम्बद्धस्वर्णकुम्भा मरकतनिकरैः कल्पितोत्तानभित्तिः ।
शङ्गश्रेणीविहारो मदयति नयने प्राणिनां प्रावृषेण्या
विद्युद्गर्भेव वर्षोन्मुखसलिलनमन्नूतनाम्भोदमाला ॥ ६६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्तःसन्दर्भगर्भीकृतघनकनकोद्दीप्रदीपावमाना-
मानासामान्यनद्धारुणमणिशिखरैरम्बरं गाहमानः ।
सौवर्णाद्रेर्दिदृक्षां शिथिलयितुमहः कौतुकिप्राणभाजा-
मुच्चैरूहे प्रवृद्धस्त्रिभुवनतिलकीभूतजैनेन्द्रगेहः ॥ ६७ ॥

शीतांशो ! राजधानी क्वचिदपि तव नो संस्थितिः शून्यदेशे
राज्ञो दर्पं दधानो बलमपि तुरगास्ते दशैते कलङ्किन् ! ।
रात्रौ स्तेयीव चारी सकलगुणभृता किं मया लज्जसे न
स्पर्धिष्णुश्चैत्यराजस्तमिति किमु वदन्निक्वणैः किङ्किणीनाम् ॥ ६८ ॥

द्वैराज्यभाजिनित्योदयिरजनीकराम्भोजिनीजीवितेश !
द्वैतेनालोक्य शून्यं ग्रहसहितमरुन्मार्गमस्येर्ष्ययेव ।
प्रासादस्येव दम्भादहरहरुदयाद्वैतराज्या स्म धत्ते
बिम्बं पाथोजबन्धोरनणुगुणगणैर्गर्भिता रत्नगर्भा ॥ ६९ ॥

भूमीरामाललामत्रिभुवनजनताकीर्तितानन्तकीर्तिं
दृष्ट्वा जैनं विहारं हृदि समभिलषन्नेतदीयोपमानम् ।
दोषाभिव्यक्तिभावव्यपनयकरणाबद्धलीलाभियोगी
नित्यत्यागैर्वसूनां द्विजपतिमरुणः प्रीणयामास मन्ये ॥ ७० ॥

ज्योतिर्दण्डैः प्रचण्डैर्नभतलमिलितैस्ताडयन्तं निजं तत्-
स्पर्धिष्णुं श्रीविहारं स्वनयनयुगयोर्गोचरीकृत्य दृप्तम् ।
वह्निं निर्वर्तयित्वा किमु परिधिनिभात् सर्वतस्तं जिगीषु-
र्मध्ये संतिष्ठमानो ज्वलदनलतपः साधयत्यंशुमाली ॥ ७१ ॥

प्रासादे जैनचन्द्रे प्रसृतकरभराम्भःप्लवप्लावितायां
विस्फूर्जत्स्फाटिकोर्व्यां प्रतिमितशशभृन्मण्डलं द्योतते स्म ।
मुग्धः प्रोत्फुल्ललीलासरसिजसरसीविभ्रमभ्रान्तचेता
अङ्कप्रक्षालनायाऽऽत्मन इव वियतोऽवातरत् शीतकान्तिः ॥ ७२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शाणाग्रोल्लेखितान्तर्मणिमयमुकुरस्वच्छसच्छायकायो-
द्दामार्चिः पद्मरागोपलपटलकृताधित्यकालम्बिबिम्बः ।
प्रासादेनाभिभूतो ग्रहपथपथिकस्तं पुनर्निर्जिगीषुः
सोऽयं तस्मिन्निलीय स्म वसति किमदः सर्वदोषान् दिदृक्षुः ॥ ७३ ॥

निर्वर्ण्योर्जस्वलानां प्रकरपरिभवारम्भलुम्पाकशीलं
कीलश्रेणीकरालज्वलदनलमिलज्जातवेदप्रतापम् ।
वासागारं जिनेन्दोरिदमुदितभयव्याकुलीभूतचेताः
विद्मः प्राकारगुप्तं धृतपरिधिनिभात् स्वं व्यधत्तांशुमाली ॥ ७४ ॥

यातेऽन्यत्रावनीं मामपि परिभवतादन्धकाराभियाति-
र्मुक्तेति स्थावरां स्वामिह जिनपगृहच्छद्मना मूर्तिमेकाम् ।
आशाप्रान्तान्तरीपान्तरधनकुतुकालोकनोत्कण्ठिचेता
रङ्गन्मूर्त्याऽन्ययाऽसौ भ्रमति कमलिनीनायकः कौतुकीव ॥ ७५ ॥

अन्योन्येनाङ्गलग्नप्रसृतनिजकरैर्गाढमाश्लिष्य हर्षोत्-
कर्षैः श्रीमद्विहारः सविधिमभिसरत्पद्मिनीनायकेन ।
व्यक्तीकुर्वत् स्वमैत्र्यं गगनतलमरुद्वेगवेल्लत्पताका-
वेलान्तःकिङ्किणीनां मृदुमधुरवैः स्वागतं पृच्छतीव ॥ ७६ ॥

लीलाकल्लोलितान्तःप्रसृमरकिरणश्रेणिनिर्वर्ण्यवर्ण-
स्वर्णस्तोमावनद्धान्तरविविधमणीकर्मकिर्मीरितश्रीः ।
पातालक्षोणिपीठत्रिदिवविजयिनो यः पराभूय लक्ष्म्या
विद्मो वेल्लत्पताकापटकपटमयीं कीर्तिलेखां बिभर्त्ति ॥ ७७ ॥

उद्यच्चण्डांशुरोचीरुचिररुचिमणीस्वर्णसम्बद्धभित्ति-
र्निर्गच्छद्धूपधूमं विहसितसुमनःश्रेणिलीलाभिरामम् ।
तूर्यध्वानैरमानैर्निखिलमपि जगत् पूरयत् पौरहूतं
शेषैर्भाग्यैः सुराणामवनितलमिव प्रापदेतद्विमानम् ॥ ७८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रामन् पादेन शेषं दधदचल इवोत्तुङ्गताचङ्गिमानं
कामाधस्तिर्यगुच्चैः प्रसृतकरवरो रोमगुच्छाभिरामः ।
वाद्यद्घण्टाकलापप्रतिनिनदजितोद्गर्जदम्भोदनादः ।
प्रासादो दानवारिप्रकरपरिचितो यः करीवाबभासे ॥ ७९ ॥

भूर्मी स्रोतस्विर्नी यः शशिकरनिपतच्चन्द्रपाथःप्रवाहैः
संबिभ्रज्जैनमूर्तिं प्रमुदितकमलां चान्तरा स्वर्णकायम् ।
नानारत्नप्रशस्तप्रसृतरुचितनिस्फीतकल्लोलशाली
प्रासादः क्षीरपाथोनिधिरिव समभूद् वाद्यगम्भीरघोषः ॥ ८० ॥

आशासञ्चारिरोचिर्निचयविरचितानेकमाहेन्द्रनील-
स्तोमाग्रोल्लेख्यकर्माकृतगगनतलोत्तुङ्गशृङ्गश्चकासे ।
मन्ये यद्वर्त्मनाऽसौ निजचिरविरहव्याकुलाङ्गीं धरित्रीम्
त्रस्यत्सारङ्गनेत्रां मिलितुमवतरन्नम्बुमुक्जीवितेशः ॥ ८१ ॥

कान्त्या येनाभिभूयाखिलखरकिरणानात्मना स्पर्धमानान्
भीत्येकप्रासविष्णुक्रमकजशरणानुद्धृतांस्तानशेषान् ।
द्वेष्यान् सञ्जातरोषादिव घनमिलिताभीशुरज्जुप्रसारैः
संयम्यानन्यहैमान्निपनिवहनिभात्(? न्)रक्षिता जैनधाम्ना ॥ ८२ ॥

पारावारान्तरालान् सिकतिलपुलिनान् कन्दरान् गह्वरांश्चा-
शेषाशाः दन्दशूकाश्रयसुरसदनक्षोणिपीठप्रदेशान् ।
भ्रान्त्वा श्रान्तान्तरात्मा क्वचन न वसतेरात्मनो योग्यलाभात्
पिण्डीभूय प्रतापः किमिह भगवतो यन्मिषेणाधितस्थौ ॥ ८३ ॥

गन्ता नित्यास्तभावं शमनजनयिता चाक्षुषः स्वान् करांश्च
प्रत्यूषे प्राणभाजां प्रथयसि पुरतोऽर्थीव निव्रीडभानो !
निर्दोषेऽनाप्तदोषस्त्वमपि सह मया स्पर्धसे किङ्किणीनां
निर्ह्रादैर्भाषमाणः किमिति रचितवांस्ताडनायास्य दण्डम् ॥ ८४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

य: शम्भुर्वामदेव: शमनशमयिताऽप्यन्धकारातिहन्ता
पर्यन्यैर्नीलकण्ठ: शिखरपरिचितैर्नव्यनाट्यप्रियश्च ।
ईशानासूययान्त:सितघटकपटाद्वा चलद्वैजयन्ती-
व्याजान्मूर्ध्नीव धत्ते शशिसुरसरितोर्द्वन्द्वमासेन्दुगेह: ॥ ८५ ॥

ध्वान्तानि ध्वंसमानो धृतचयपरिधिर्गाहमानो विहाय:
विस्फूर्जद्व्योमकेतुर्निधिरिह महसां गर्विगन्धर्ववर्ग: ।
दोषाविर्भावभेत्तोपगतहरिपदोपास्तिनित्योदयश्री:
कुर्वाणो य: प्रबोधं किमवनिमगमन्मूर्तिमानंशुमाली ॥ ८६ ॥

पौष्पापानोन्मदिष्णुभ्रमदलिपटलश्यामलच्छायमध्या-
श्लिष्यल्लीलाबलाकाततियुगलमिलत्प्रावृषेण्याब्दमाला ।
रेजे यस्योपरिष्टात् त्रिभुवनविजयोद्धूतगर्वं दधानोऽ-
न्तर्मेघाडम्बरं यश्चलचमरयुगच्छत्रमूहे विभर्ति ॥ ८७ ॥

यस्मिन् पुष्पोपचार: क्वचन विरचित: सञ्चरच्चञ्चरीक-
श्रेणीझङ्कारगीतध्वनितपरिचितानेकवीणाविनोद: ।
सर्वो नक्षत्रताराग्रहनिवह इव श्वेतरोचिर्विभूषा-
सामान्यं याचमान: प्रभुमिव भजतेऽभ्येत्य नक्षत्रवीथ्या: ॥ ८८ ॥

उत्फुल्लत्पर्णमालागलदमलमधुस्यन्दलुभ्यद्द्विरेफं
प्रासादे पुण्डरीकं विलसति परित: क्लृप्तकान्तोपचारम् ।
स्वर्भाणोर्भीरुचेता निजमखिलपरीवारमादाय सार्धं
मन्ये यस्मिन्निलीय स्थितिमयमतनोत् कौमुदीनामधीश: ॥ ८९ ॥

उद्भ्राम्यद्भृङ्गरामासमुदयविविधानोकहोत्त्रिट्रनिर्यत्-
पौष्पौघस्यन्दबिन्दूपचितसुमनसां भाति यत्रोपचार: ।
निर्जित्याद्वैतवीरं कुसुमशरमहोपालगेतस्य शक्ते:
शस्त्राण्यादाय वासौकसि किमु भगवद्भूभुजा धारितानि ॥ ९० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आत्मीयाभातिरेकैर्विहसितविगलद्वारिवाहोपरोध-
स्मेरार्चि:शारदीनोदिततुहिनकरं यत्र शृङ्गं बभस्ति ।
भूमिभृत्पक्षभेत्तुः प्रबलबलभिदः स्वं लघूकृत्य भीत्या
शैलः शीतांशुमौलेरिव शरणमगादर्हतो वासधाम्नः ॥ ९१ ॥

ज्योतीराजीनिबद्धाग्रहनिवहचलत्केतुचक्रान्धकार-
च्छेत्तारश्चान्द्रवारा हरिपदपटलीस्वर्वहा वैजयन्त्यः ।
सन्त्येते मय्यनेके मदुपरि तदरेऽस्थाः कथं ताडनायै
कुर्वन्नुद्योगमर्हद्गृह इव कृतवान् दण्डमुद्दण्डमुच्चैः ॥ ९२ ॥

चञ्चद्झाङ्काररावाधरितसुरवधूधोरणीनृत्यगीत-
प्रोन्माद्यद्भृङ्गमालाकलितसुमनसां राशिरस्मिंश्चकासे ।
संप्रापं सौमनस्यं तव परिचरणादेतदुच्चैः पदं मां
देहि श्रीमज्जिनेन्दोरगमदिति महानन्दकाङ्क्षीह मन्ये ॥ ९३ ॥

शोचि:श्रेणीसनाभीकृतनिखिलमिलत्पद्मिनीप्राणनाथ-
स्वच्छन्दं करपल्लवं स्तनयुगस्यारामरम्योदरे ।
लक्ष्मीं वीक्षितुमागतस्य सुहृदः कामाभिषेकोत्सवे
रक्ताशोकनवप्रवालकलितं हैमं नु कुम्भद्वयम् ॥ १३ ॥

अद्याश्लिष्य निपीय गाढमधरं नीत्वा च वक्षःस्थलीं
प्रक्ष्यामि स्मितपूर्वकं प्रतिदिनं माऽसौ यथा पृच्छति ।
निर्धार्येति दिने न चेतसि निशि प्राप्ता गृहं प्रेयसो
बाला न क्षरमुत्तरं वितनुते पृष्ट्या प्रियेणादरात् ॥ १४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कान्तो नर्मणि नैपुणेन विदितस्त्वं शैशवद्वेषिणी
क्रीडाशैलशिरोमणिर्गृहमिदं रम्यो वसन्तोत्सवः ।
सख्यः कामकथोपचारचतुराः संभोगकालेऽधुना
मानो वा कलहोऽथवा यदि कदा तच्चेतसो निर्वृतिः ॥ १५ ॥

जन्मारभ्य न यावदद्य सुभगंमन्याक्रमो हापितः
स्वैरं तिष्ठतु कान्तया स रमतां मा मां नयध्वं बलात् ।
इत्थं जल्पति यावदेव सुमुखी तावत्क्षणादागतः
कान्तस्तल्पमलंचकार च वदन्कस्येदृशी संगतिः ॥ १६ ॥

अज्ञास्ते सुहृदालयोऽतिपिशुनास्त्वं कर्णयोर्दुर्बला
दृष्टे सागसि वल्लभे मृगदृशां मानः स्वयं जायते ।
लोको हासरसाकुलः परगृहे प्रेमोपभेदोद्यतो
ह्याखुर्दन्तमुखेन खण्डयति सत्यद्धाम्बरं हेलया ॥ १७ ॥

पृष्टः कातरतां विहाय शयने मानापराधौ कदा
जायेतामिदमुत्तरं कथितवान्स्मित्वा चिरं चिन्तय ।
बाले संप्रति नैतयोस्तु समयः श्रुत्वेति हासच्छला-
दालीभिः समकालमेव समयं दृष्ट्वा चिरात्तर्जनी ॥ १८ ॥

स्निग्धे तादृशि नौचिती परुषता दृष्टेऽवहित्था कथं
धीरं सस्मितमालपत्यनुदिनं निर्हास्यमास्यं कुतः ।
निद्राणं तनुरोम तिष्ठति पुरा तत्संनिधावादरा-
त्सख्यो मानमुदाहरन्तु कलहे बालोद्यमः कीदृशः ॥ १९ ॥

धैर्यं मुञ्च कुरुष्व मानममलं तद्गौरवस्यास्पदं
मानादेव गुणोदयः किमधिकं दासायते वल्लभः ।
उक्ते धेहि मनो निशम्य सकलं तूक्ता वयस्यास्तया
दत्तं नाम मनोऽन्यतो न विदितं दत्तं कथं दीयते ॥ २० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यामः पूर्वनिशोपभोगकथया नीतोऽपरो निद्रया
नीतः कोऽपि वयस्यया सह रताम्नायोपदेशक्षणात् ।
स्नानाकल्पविकल्पकल्पनविधेरन्यो दिनस्य क्षणा-
त्तल्पे वासकसज्जया युगसमो यामो निशायाः कृतः ॥ २१ ॥

आकल्पं विरचय्य तल्पममलं सज्जं विधायादरा-
दालीभिः कथया कयापि समयं वारान्बहून्पृच्छती ।
द्वारे निश्चललोचना परपदध्वाने तमेवागतं
मन्वाना निजमन्दिरे रसवशाद्धन्यस्य बाला वसेत् ॥ २२ ॥

गच्छ त्वं सखि वाचिकं लघुपदं नीत्वा नयैनं शठं
कुत्रास्ते नु वदन्निजेन सुहृदा केनापि तत्तद्वचः ।
गच्छामो यदि लाघवं ननु परा हासाय दीर्घानना:
का वा गौरवलाघवादिकलना वश्ये तथा वल्लभे ॥ २३ ॥

आकल्पो मलिनो भविष्यति मनाग्भूयोऽधुना धीयते
भुक्तं तल्पमथोज्झितं च सहसा सख्यः परिस्तीर्यताम् ।
संकल्पेन विधाय संगमसुखं जातावबोधा पुन-
र्धन्यः वासकसज्जया प्रतिपदं प्राणाधिकं स्मर्यते ॥ २४ ॥

पत्त्राली चिरलालिता करतलस्पर्शे कपोलाद्गता
लुप्तो रागपरिग्रहोऽधरतले तद्वाचिकालापतः ।
लीलातामरसं मलीमसमभूदुच्छ्वासतोऽधः पत-
त्संकेतालयतल्पकल्पनपरा तेऽध्वानमन्विष्यति ॥ २५ ॥

मानश्चेतसि नाथ ! वासकलहो नालिङ्गने मेति न
स्वैराभाषणमौनिता न शयने वैमुख्यबुद्धिश्च न ।
सीत्कारोऽधरखण्डने न सुरते मुग्धाक्रमो नेति ना
पुंभावं गतया हठादभिहितः स्त्रीत्वं गतः पुण्यवान् ॥ २६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धूपेनागुरुजन्मनाथ सुमनोमालाभिरत्यादरा-
द्दीपं दैवतमामनन्ति सुदृशामानर्च पत्युः पुरः ।
ज्ञानोन्मेषदृढप्रकाश भवतः कुर्वे प्रणामाञ्जलिं
सद्यः कज्जल(?) मुद्रमायमधुना कान्तो रतायोत्सुकः ॥ २७ ॥

मानेनासि सखि क्षमा शिशुरयं न प्राणनाथोऽपि ते
नास्माभिः सखि वञ्चितासि कतगस्ते खण्डिताया भ्रमः ।
भुक्तासीति न कथ्यते कथय तत्का नाम ते चातुरी
पत्त्राली न मलीमसा न मलिनो जातोऽङ्गरागः क्वचित् ॥ २८ ॥

युष्मासु स्वयमुत्थितासु शयने लुप्ते चिरान्मण्डने
मा लज्जस्व नवं लिखाम दयितो मां याचते स्मासकृत् ।
भावैरष्टविभागतोऽनु रचनाः प्रत्यूहमासादिताः
प्राप्तेयं नवमी कथं कथमपि प्रातस्ततोऽभूदहः ॥ २९ ॥

स्वादङ्कादवतार्य नूपुरयुगं न्यस्तं सखीपादयो-
र्मध्ये दीर्घनिनादिनी मणिमयी बद्धा दृढं मेखला ।
ज्योतिःपूरमुरःस्थले कृतनवं हारं प्रियप्राप्तये
मुग्धा गच्छति मन्दमन्दमुदितत्रासा जनावेक्षणात् ॥ ३० ॥

तल्पे जल्पितमल्पमेव तदनु व्याख्यातमन्तर्गृहे
पार्श्वद्वारमुदाहृतं प्रतिपदं व्यावृत्तमाराद्बहिः ।
सीमान्ते प्रतिदृष्टमध्वनि हठादाशङ्कितं प्रौढया
कान्तोत्सङ्गतले तयाखिलमलं तत्संहृतं वाचिकम् ॥ ३१ ॥

वैमुख्येन शयानयान्यरमणीनाम्ना समाहूतया
नाश्रावीति निमीलितं प्रलपितं मिथ्येति निद्राहृता ।
उद्यद्वेपथुना द्वयोर्यदचलत्तल्पं तदाभ्यां छला-
त्त्रस्यद्भ्यां च परस्परेण कलितं नीरन्ध्रमालिङ्गनम् ॥ ३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वारं वारमुदाजहार रमणी दृष्यन्तमेकान्ततो
दम्पत्योः कलहोपहाससमये कश्चित्सखीनां पुरः ।
रुष्टा तेन मनस्विनी नु सुभगंमन्यः प्रियो नाधुना
चित्ते मानमवीवसत्किमधिकं जात्यैव वामाः स्त्रियः ॥ ३३ ॥

उच्यन्ते नु विशेषका न रमणीवक्त्रे विशेषः क्वचि-
त्तेभ्यस्ते खलु वेधसा विरहिणोः सृष्टोऽन्तरायः क्षणम् ।
सायं सायमनीदृशं यदपरं तत्प्रातरालोक्यते
जाड्योन्मुक्तनिशीथपार्वणविधुध्वंसाय मीमांसयत्(?) ॥ ३४ ॥

निर्व्यूहः सुखमावयोर्मधुरयं न स्यात्तपर्तुस्तथा
संतापाय वियोगिनोरिति मुहुः श्रुत्वा पिपासोर्वचः ।
बाला पृच्छति सस्मितं न मुकुलं स्यान्मल्लिकायां कथं
निर्गन्धा वनपाटला कथमसौ तत्राथ ! मे कथ्यताम् ॥ ३५ ॥

प्रावृष्येष्यसि वासरास्तु बहवो मध्ये तपो दुःसहः
वातारो नवमल्लिकासुरभयो यत्रापरे मारुताः ।
धारामन्दिरमार्द्रतल्परचना चन्द्रातपश्चन्दनं
यत्स्पर्शेन विषायतेऽखिलमिदं प्रायो वियोगक्षणे ॥ ३६ ॥

यास्यामीति न यावदीरितमनुप्राप्ते कथागौरवे
तावन्नर्मणि न स्खलत्प्रतिवचा वासः स्खलद्बध्नति ।
चिन्ताश्वासनिपीतपीतिमतनुस्तावद्गभीराशया
नासामौक्तिकमात्रभूषणमणिर्दृष्या मया प्रेयसी ॥ ३७ ॥

मा काकं दधिभक्तमाशय मुहुस्तिर्यत्करः किं वदे-
दस्य ज्ञानविबोधनाय विधिना सृष्टो धरायां पिकः ।
कण्ठे चेद्दधि कोकिलस्य कुरुते तत्कण्ठकुण्ठस्तदा
नोच्चैः पञ्चममातनोति सुदती जीवेत्कथंचित्तदा ॥ ३८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रालेयाचलनिम्नगाभिरभितो मार्गे निरुद्धेऽधुना
प्रावृष्येति न यक्षराजककुभस्तन्वी कथं जीवति ।
इत्यालापपरम्परां श्रुतवती त्वासां सखीनां मिथो
बाला पृच्छति साधु रावणपुरीद्वारध्वनो वासरान् ॥ ३९ ॥

आकर्णाञ्चितधन्वनः करिवरव्यापादनायोद्यता-
न्विन्ध्यालेख्यमहाटवीषु मृगयोत्साहे सखीनां पतीन् ।
कोदण्डाञ्चलबद्धनिर्मदशिखिप्रस्फारपिच्छध्वजं
प्राप्तं स्वं पतिमालिलेख सुदती गर्वाज्जहासोच्चकैः ॥ ४० ॥

यस्मात्पीनपयोधरद्वयमिदं कृत्वोपधानं सुखं
स्नातौ दर्पकदम्पती मृदुतनावस्यां शयाते चिरात् ।
किंचिच्छ्यामलमग्रतस्तदुभयं पाण्डुस्वभावादहो
धम्मिल्लाङ्कनिमग्नतैलशबलच्छायां ततो लक्ष्यते ॥ ४१ ॥

मञ्जीरद्वयमेतदङ्गदयुगं ग्रैवेयकं कुण्डले
सप्तैतानि विलोकय प्रभुरसि स्वैरं सपत्न्याः पुरः ।
किं ब्रूमः पतिदेवता वयमिति व्याहृत्य पत्युर्ददौ
सीमन्ताचलपद्मरागशकलं बाला बलादञ्जलौ ॥ ४२ ॥

लीलातामरसं विपक्षरमणीहस्ते निरीक्ष्यादरा-
दावेशादुपविश्य सामि सहसोड्डीनैरलीनां गणैः ।
गुञ्जत्सौरभलम्पटालिपटलीश्यामं तदेवात्मनो
मा दृष्टेति ललज्ज कापि रमणी तत्याज दूरेऽम्बुजम् ॥ ४३ ॥

प्रेयस्ताडनकर्मणीदमुचितं निर्वापकं तेजसो
लज्जानर्मणि लोचनाञ्जनरुचः सौभाग्यसंपादकम् ।
प्राप्ते प्रेयसि मन्दिरं तदपरं लीलारविन्दं पुनः
शय्योत्थायमपाचकार रमणी सौधाद्बहिः सत्वरम् ॥ ४४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रीडासद्मनि कापि कौतुकवती क्षीरोदपूरोदरे
निद्राणं हरिमालिलेख निखिलप्रारम्भमुद्रागुरुम् ।
पूर्वं दक्षिणमीक्षणं भगवतो ध्यात्वा हसन्ती क्षणं
पश्चाद्वाममलीलिखत्किमु निशा यस्यां न गाढं तमः ॥ ४५ ॥

मात्रा चित्रविशेषलेखनविधावादिष्टपूर्वा चिरं
विष्णोर्जागरणोत्सवाय सुदती रेखामधादग्रतः ।
कैलासाचलगामिमानससरः स्वच्छं लिखेत्यादृता
क्रीडाशैलसरश्चकार विकसज्जाम्बूनदाम्भोरुहम् ॥ ४६ ॥

नष्टे तेजसि बान्धवे विधिवशाद्द्यावापृथिव्यौ मिथः
कुर्वाते सलिलाञ्जलिं मरुदसावद्यापि नोत्तिष्ठते ।
आक्रान्तेन महौजसा च वियता क्षिप्तं यदन्धं तमः
प्रातः पीतमनिच्छया तदधुना विष्वग्वसेन्मेदिनी ॥ ४७ ॥

वारुण्याञ्चलवायुनोपशमिते भास्वत्प्रदीपेऽधुना
किं चिन्वन्ति नवाञ्जनं सममिदं शृङ्गारमाधित्सवः ।
किं वा सत्त्रिभिराहृतेषु पतिषु व्योमैकगेहोदरे
सद्यः संप्रति शेरते दश दिशः सत्यं सुखं यातरः ॥ ४८ ॥

मुग्धे माभिसर स्वमन्दिरमलं कुर्वानय प्रायशः
प्रेयांसं तव साहसं न घटते तथ्यं हितं ब्रूमहे ।
सद्यस्त्वन्मुखचन्द्रिकाभिरभितो लीढेऽन्धकारेऽधुना-
प्यन्यासामभिसारसाहसरसे जातोऽन्तरायोऽधुना ॥ ४९ ॥

मञ्जीरं त्यज मुञ्च मौक्तिकसरं मा मल्लिकाः शीलय
नीलं वा परिधत्स्व चारु वसनं वाचं नियच्छादरात् ।
मन्ये स्यादभिसारिका न भवती दूरे ध्वनिं प्रायश-
स्त्वच्छ्वासानिलविप्रलब्धमधुना प्रातः समुज्जृम्भते ॥ ५० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उड्डीना स्नपया त्वया ननु जिता गत्या निमग्नाः कदा
तल्पाय प्रतिवासरं कृशतनो लूनाः सखीभिस्तव ।
दृश्यन्ते कलुषा निशा मुखपतत्कान्ताङ्गरागादिति
त्वत्कान्तानुचरीषु वञ्चनकथापाण्डित्यमभ्यागतम् ॥ ५१ ॥

लुप्तश्चन्दनबिन्दुरञ्जनरसः पीतोऽनुलेखो गतो
निःशेषेण कपोलयोः कुचयुगे शेषो मकर्याः कुतः ।
दग्धेयं सखि मध्यभागतनुता पद्भङ्गभीरुः प्रियो
गाढाश्लेषपराङ्मुखो रतविधौ तुष्टः कदाचिद्यदि ॥ ५२ ॥

सौधस्योरसि मन्मथप्रतिकृतः प्रासादपृष्ठे शशी
क्रीडाकाननवेदिकासु च पिकस्तद्दीर्घिकायां मरुत् ।
इत्थं त्वद्विरहेऽधुना कृशतनोः शय्यासमासादन-
व्यग्राणामितरेतरं मधुमुखे तस्याः सखीनां मिथः ॥ ५३ ॥

आगच्छेति मया श्रुतं जिगमिषोर्यामीति तूष्णीं मतं
पाथेयं निजपाणिना विरचितं पृष्टोऽवधिः सस्मितम् ।
प्राणा येन तदा तदा किल गता वक्षो न दीर्णं च य -
त्तेषां तस्य च का कथा यमधुना दम्भाय कार्यो विधिः ॥ ५४ ॥

किं निन्दन्ति सुधानिधिं मलयजं किं नाद्रियन्तेऽथ किं
श्रीखण्डानिलमावृणन्ति सहजामुज्झन्ति किं धीरताम् ।
किं कामं विलपन्ति किं पिकरुतात्त्रस्यन्ति मूर्च्छन्ति किं
तल्पे पल्लवकल्पितेऽपि सुदृशस्तद्ब्रूत किं कारणम् ॥ ५५ ॥

बाल्यादद्य विनिर्गतं तव वयः कान्तः स्वयं दक्षिणो
वृद्धाधीतबहुच्छला वयमिमा वां कामजीवातवः ।
क्रीडाकाननसौधशैलशिखरे श्रीखण्डशैलानिल-
स्वाचान्तश्रमवारिबिन्दुरधिकप्रेम्णा मधुर्नीयताम् ॥ ५६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सा पत्युः शयनं गतेति मुदिता श्रुत्वा सखीभाषितं
पश्यामः प्रियसद्म विद्म न वयं कीदृक्षमन्तर्भवेत् ।
*लाक्षालक्ष्मसुलक्षपादयुगलं तल्पं दृशा चिन्वती*
चित्रस्थे च निरीक्षिता सहचरीवृन्देन मन्दाक्षतः ॥ ५७ ॥

मुग्धे बोधय सारिकामियमदः प्रेमास्पदं सीदति
प्रीत्या पाठय चाटु पाठकबटुं वां पीठमर्दं शुकम् ।
आलीर्हासरसोचिताः स्मितलवेनाभाषयेथा इमा
दृष्टेनानुगृहाण वल्लभमिमं पादानतं भीतवत् ॥ ५८ ॥

तादृक्कण्टकलम्पटापि करभी मा हास्यतां दूरतो
नाङ्गाराशनगर्विता सुनयना निन्द्या चकोरी पुनः ।
उद्यत्कण्ठकदन्तुरेऽतिकठिने पङ्काकुले पिच्छिले
निद्रामो यदि संयतास्तदपरं नानन्दकन्दास्पदम् ॥ ५९ ॥

गुल्फग्रन्थिमणिप्रभावबलतः पादाङ्गदं प्रेयस-
श्चूडारत्नपदं मदात्समगमन्मानापनोदादरात् ।
मागान्मन्त्रपदाददादपि पदं कार्याकुलोऽपि प्रियः
कर्णाशोकदनाहतश्चिरतरं मानं समूलं जहौ ॥ ६० ॥

कातर्यं तु न कार्मणं न न परं दम्भो न किं योषितां
यच्चित्ता तनुचापलं मधुविधुद्वेषस्तनुत्वं तनोः ।
अस्माकं सखि पश्य संप्रति तनू रोमापि वक्रायते
सद्यः प्रोषितनाथयाभिनवया पान्थस्त्रियो हासिताः ॥ ६१ ॥

द्वारे नूपुरमुच्चगोपुरमुखे काञ्ची रणत्कारिणी
हारो द्वारचतुःपथे पथि परे कर्णोत्पलं भृङ्गमत् ।
प्रेयो मन्दिरमित्यवेत्य मुमुचे तन्व्या शिरोभूषणं
व्यालोके तु परस्परं विगलिता नीवी स्वयं बन्धनात् ॥ ६२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वं यत्र विशेषकक्षितिरिति प्रायः कपोलस्थलीं
चक्षुः सिञ्चति जागरूकमसकृद्भूयोऽञ्जसा तद्भवेत् ।
वाप्यक्षारतया तयाभवदियं पाण्डुश्चिरायोषरा
तन्मन्ये मकरीनिकेतनधिया तत्रैव सिन्धुः कृतः ॥ ६३ ॥

हासः कोऽपि महाशुचिः स्थितिमतां प्रेयःसमक्षं क्षणा-
द्वारंवारमुपैति तस्य विरहे दृष्टः कदाचिन्न यः ।
वाप्यः किं व्यभिचारिणां न गणितः प्रायः पुरस्तादयं
दीनाया निजवल्लभस्य विरहे यश्चक्षुषी चुम्बति ॥ ६४ ॥

साहाय्याय मलीमसाः समुचिताः प्रायश्चकोरीदृशा-
मुत्कानामभिसारसाहसरसे गाढोऽन्धकारः सुहृत् ।
धन्यं कज्जलमुज्ज्वलं जिगमिषोरग्रेऽगमल्लोचना-
त्संयम्य स्वयमात्मना सुमनसो नाजिघ्रतीदं कचः ॥ ६५ ॥

नापेक्षैव विभूषणस्य सहजा यस्यास्ति गम्भीरता-
त्सद्वृत्तं यदि पार्श्वतोऽपि सहजः कीदृग्वलिप्रक्रमः ।
मध्यस्थस्य च कोमलस्य विषये कुण्ठो भवेदायुधं
दृष्यन्तोऽत्र मनोभवेन कलितो नाभिः कुरङ्गीदृशः ॥ ६६ ॥

रोहिण्याधरसंपदा मुखविधोरिष्ट्याश्चतस्रः कला
बीजानीह निरूपितान्यतनुना हासद्रुमस्यादरात् ।
भारत्याः कठिनीलवा घटयितुं रीतीरुदाराक्षरा
राजन्ते सुतनोर्मनोरमतमास्ते राजदन्ताः पुरः ॥ ६७ ॥

सुप्ता कञ्चुकगह्वराञ्चलमुखे दत्त्वा नरं वीटिकां
प्राप्ते संप्रति तस्करेऽथ सहसा जातं कपाटे चटत् ।
रुद्धा वागथ निद्रया नयनयोरन्ते स्थितं लज्जया
क्लिबै रोमभिरुत्थितं पतिरिति ज्ञात्वा पुनर्मीलितम् ॥ ६८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिद्धस्त्वं पुरुषोत्तमोऽसि विदिता सा सत्यभामा न किं
वाचा बोधयितुं सखीभिरधिकं नापारिजातग्रहः ।
व्याख्याता स शुकः परं गिरि पटुः संतापचिन्तार्तितिं
नूनं निर्जरदैवतप्रतिभये भूत्वा समाश्वासय ॥ ६९ ॥

जानासि कममञ्जसा विरचय द्रागङ्गमङ्गं परि
प्रेयो मोहनमद्य मण्डनविधौ प्रौढा नियुज्यादरात् ।
तुष्टे याचकमादरेण ददती तन्व्या सखी वारिता
मुग्धे पूर्वमलंकुरुष्व कबरीमेतं ततो रञ्जय ॥ ७० ॥

नैनं वारय कामकर्मकुशयं(?) स्वच्छन्दतश्चुम्बना-
वस्त्राकर्षणकौतुकेन रमतां प्रत्यङ्गमालिङ्गतु ।
अन्योन्यं तनुतां नितान्तनखरव्यापारतो विग्रहं
कावेरीतटकाननेऽध्वनि पुरः कुब्जस्तरुस्तिष्ठति ॥ ७१ ॥

प्रातर्मन्दिरमात्मनो जिगमिषोः कान्तेन यन्मण्डनं
दूरं कल्पितमादरेण बहुना निर्जित्य कम्पादिकम् ।
बाहोर्मूलनखाङ्कलेपनविधौ जातः स कोऽपि क्रमो
येनैतावदशेषतोऽपि गलितं जाता तथैवोषसि ॥ ७२ ॥

नीचैर्निश्वसिहि स्फुरत्वनुदिशं चन्द्रातपः किं ततो
गच्छामस्तव वल्लभोऽयमधुना दूनः प्रसूनेषुणा ।
मल्लीमुच्चिनु चन्दनं च कलय क्षौमं तनावातनु
स्वच्छं मौक्तिकहारमुल्ललय तत्स्वैरं प्रियं प्राप्नुहि ॥ ७३ ॥

राकायाः शरदः सुधावधिरभूद्यद्याननं रोहिणी
श्रीरेखाधरपल्लवस्य सुदती लावण्यवापी यदि ।
रोमालिर्जलनीलिका च चरणं पद्मे चलच्चक्षुषी
मीनद्वन्द्वमुपान्त एष मुखरो न स्याद्युवा हंसकः ॥ ७४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्यामाया मुखमिन्दुमण्डलमिदं पाण्डुद्युतिप्रोषिते
दूरं भर्तरि वासरे मृगतया लम्बालकाग्रच्छविः ।
उच्चैरम्बरकेलिशैलशिखरादालोकते मेदिनी
पन्थानं विरहज्वरातुरतनुस्तद्वासरस्यादरात् ॥ ७५ ॥

रक्तं किंचिदुदेति वासवदिशि श्यामामुखं लोहितं
रोषेण प्रतिवासरं स भजते नाथो दिनं वारुणीम् ।
विख्यातो द्विजराजनामभिरयं मौलौ भवानीपते-
स्तिष्ठत्किं न हि लज्जतेऽरुचि ... तं म्लानिर्निजाङ्कच्छलात् ॥ ७६ ॥

शृङ्गाराद्वयवादिनो रतिपतेर्निःसा (?) णपात्रीमुखं
तन्मार्दङ्गिकपुंस्यिक (?) प्रतितनुच्छायान्तरुज्जृम्भते ।
किं वा वासवदिग्वधूकरतलादानेय दिग्वल्लभा
कान्तस्याध्वनि पत्य (?) पातमलिनस्तच्चन्द्रमःकन्दुकः ॥ ७७ ॥

नायातः सखि निर्दयं स समयः प्रायो गतो गम्यतां
नष्टं किं यदि नागतः सशपथं रुद्धः क्वचिद्बन्धुभिः ।
आयास्यत्यथ दुर्जनः परवधूगाढोपगूढाङ्कितः
प्रातर्दृष्टिमुपागतेन बटुना वक्षो विदारिष्यते ॥ ७८ ॥

मा गाः कान्त निशामुखे परगृहं मा गास्ततोऽहर्मुखे
वेश्मास्माकमिदं द्वयं वितनुते चायुःक्षतिर्योषिताम् ।
मा भूत्काञ्चनवञ्चितेति रमणी मा भूदहो खण्डिता
मुग्धा भावमपाचकार रमणीत्थं वारयन्ती पतिम् ॥ ७९ ॥

प्रेयः प्रेममहाधना स्मितलवोल्लासं रसे मज्जती
सृष्य केन खलेन वा परवशा योपिद्वराकीयती (?) ।
मा भूत्काञ्चनवञ्चिता निशि निशि प्राणेश्वरेणाबला
पश्येयुर्न च खण्डिता मुखमपि प्रातर्वयस्याश्चिरम् ॥ ८० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आयातेव निवारितः स्मितमुखो यातः समीपं बला-
दाबद्धो वलया हठेन सरुषा कर्णोत्पलेनाहतः ।
आविद्धो नखरायुधेन हृदये लाक्षारसेनाङ्कितः
कान्तः काममपि तृप्तिमापदुचितं कामस्य वामा गतिः ॥ ८१ ॥

मा मां कल्पय लम्पटेषु भवती मा भूः स्वयं खण्डिता
भूयोऽन्यत्र न जातु यास्यति निशा तुभ्यं शयेय स्फुटम् ।
कस्यास्तीह न मन्दिरे परिमलः कस्याङ्गरागो न वा
को नालिङ्गति बान्धवं त्यज वृथा तापं प्रसीदाधुना ॥ ८२ ॥

पादालक्तकलाञ्छनं निजमुरो (?) माच्छादयालोक्यते
प्रेयांसो रसपेशला मृगदृशामानन्दथूत्पादकाः ।
रागाशोकमहीरुहस्तबकितस्तत्पादपद्माहतः
स्वच्छे वक्षसि वल्लभस्य परितस्तच्छायमेतद्बहिः ॥ ८३ ॥

दुष्टास्ताः पुरुषं निरीक्ष्य रमणीपादार्द्रलाक्षारसे-
नाच्छेनाङ्कितवक्षसं ननु मुधा यासां व्यथा चेतसि ।
रागाशोकमहीरुहोऽन्तरुदितः किं नावकेशी भवे-
च्चेदन्यापि तथाविधेन न पदा निःशङ्कमाताडयेत् ॥ ८४ ॥

पूर्णं चन्द्रमयोगिनीजनमनःसंतापसंपादकं
सत्यं कामविदो वदन्ति विरहे चन्द्रादयो दुःसहाः ।
एतत्त्वत्तनुलग्नचन्द्रकलया सङ्गे तवैवाधुना
वक्षो दीर्यत एव विद्धि झटिति त्वं नाथ ! दूरं व्रज ॥ ८५ ॥

दोष्णोः पत्त्रकमुद्रणा नयनयो रागोऽधरे कज्जलं
गात्रेऽपि क्षतमौचिती सुभगयोः स्याद्वाससो व्यत्ययः ।
आश्लेषेऽपि परस्परं परिमलः द्रागङ्गरागक्षतिं
किंमूलो हृदि पादपल्लवगलल्लाक्षारसस्यादरः ॥ ८६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दत्ते तामरसेऽलिनाधरपुटे दृष्य वराकी सखी
वासस्तत्परिधाय मुञ्चसि चिरं येनाङ्गरागं वमेत् ।
मुद्रायै चटुले तथा विदधती प्राप्ता निशीथेऽधमा
नाभिज्ञानमुदाहरेति सुदती दूत्या रतं शंसति ॥ ८७ ॥

नाथ ! त्वं बहुवल्लभो वयममी जाता दयाभूमयो
भूयस्तल्पमुपागतोऽसि सहसा तत्तेऽधिकं साहसम् ।
अन्यस्त्रीजनभुक्तमुक्तमधम स्पष्टापराधं नरं
चित्तेनापि खलु स्पृशन्ति न शठं चण्डालवद्योषितः ॥ ८८ ॥

दूरादुत्थितमुक्तमिष्टमधिकं स्वैरं स्वयं वीजितं
पृष्ठं स्वागतमीरितं च रजनीवृत्तं सखीनां मिथः ।
लिप्तं वक्षसि चन्दनेन शयनं निद्रोचितं कल्पितं
यामिन्या मुषितं वितीर्य कुसुमः व्यक्तोऽपराधः कृतः ॥ ८९ ॥

अक्ष्णोर्निक्षिप कज्जलं श्रवणयोराधेहि नीलोत्पलं
पत्रं चारुकपोलयोर्लिख कचं पुष्पस्रजा पूजय ।
लाक्षामुज्ज्वलयाधुना चरणयोर्नीवीं च संभावय
प्रातः कोऽपि निगद्यते मृगदृशा रत्या चिरं तुष्टया ॥ ९० ॥

सीत्कारेण विना श्रमादपि विना श्वासेन वाचा विना
नीवीग्रन्थिविमोचनेन च विना गाढोपगूढं विना ।
तल्पेनापि विना विना सहचरीसङ्गेन दीपं विना
यत्किंचित्सभयं तदेव सुरतं दास्यं परं प्रेयसः ॥ ९१ ॥

आश्लिष्यन्नवधीरितश्चटुशतं कुर्वन्मुहुस्ताडित-
स्तल्पान्तादपसारितः स्मितमुखस्तिष्ठन्पुरो वारितः ।
नोदास्ते दयितः कथं दयितयापादानतो नेक्षित-
स्तन्मुग्धे सह यातनापरिणतिं तत्तत्स्वयं कर्मणः ॥ ९२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मानं मानमुदीरयन्ति कथया मानः स कीदृग्वदे-
न्मुग्धैवं निजवल्लभं स्मितमुखो मानार्थमूचे प्रियः ।
आश्लिष्य स्वयमादरेण दयितं गृह्णाति कान्ताधरे
पश्यन्तीषु सखीषु नाम सुकरो मानस्त्वयाभ्यस्यताम् ॥ ९३ ॥

उन्मीलन्ति सरोरुहाणि मुखतः सौरभ्यमुज्जृम्भते
दीपो दैन्यमुपैति ते मणिरुचा ध्वस्तप्रकाशः स्वयम् ।
इत्थं तेन रिंसुना न कलिता यावत्करे तावता
कालेनोच्चरति स्म नाम किमपि स्वं ताम्रचूडः खलः ॥ ९४ ॥

गौरोत्तुङ्गपयोधराञ्चलवलच्चित्रोपचारोल्लस-
त्कस्तूरीरसलेपलेखमकरी सारम्भमुज्जृम्भते ।
पक्वप्रच्युतसर्वजाम्बवरसप्रस्फारजम्बूनदी
मीनो मेरुशिलातलेऽपतदिवोत्पत्य क्षणं निश्चला ॥ ९५ ॥

लावण्यामृतनिर्झरा कृशतनुः काचिच्छरन्नर्मदा
पूरोन्मग्नपयोधरच्छलमिलद्गौराद्रिपादद्वया ।
आक्रान्ते जघनस्थले हि पुलिने कान्तेन मन्देतरं
काञ्ची सारसशावकैर्दरदलत्कण्ठैर्मुहुः कूजितम् ॥ ९६ ॥

रागात्संमुखमेत्य खण्डनसहो धन्योऽधरो रागवा-
न्किं नाशाकि पयोधरेण गुरुणा वक्षःशिलाताडनम् ।
न त्यक्तं जघनेन पौरुषमितो यावन्न जातो जये
कर्णेन त्रपयेव भूषणमधः क्षिप्तं स्थितेनैकतः ॥ ९७ ॥

प्रातःकञ्चुककर्मणीन्दुशकलं दृष्ट्वा कुचोपान्ततो
बालाचष्ट करद्वयाय निभृतं प्रच्छादयन्ती मुहुः ।
मूलं न क्षतमद्य ते नयनयोराकेकरं पश्यतोः
कर्णोपान्तमपागमत्कथयितुं बाहू रणत्कङ्कणः ॥ ९८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नीली मेचकपट्टसूत्ररचिता काञ्ची रणन्ती कलं
तादृक्पीननितम्बबिम्बफलके बद्धा स्खलद्वाससि ।
कन्दर्पामरनाथकेलिशिखरिप्रस्थे चरन्ती मुहुः
कूजन्तीरनिविष्टसारसशिशुर्जम्बूनदीवाभवत् ॥ ९९ ॥

दीर्घाः संप्रति वासरास्तनुरियं नाम्ना त्रियामा तमी
सख्यो दीर्घकथालसा निधुवनं दीर्घायुरेवावयोः ।
दम्पत्योरिति जल्पतोः प्रतिनिशं नात्रावकाशः क्वचि-
न्नेत्रे केवलमन्तिके गुरुजनस्याग्रे स्थितं निद्रया ॥ १०० ॥

प्राची रागसमाकुला न सुदतीमानन्दयेदीक्षिता
प्रातः शैशवकैतवं कथयति श्रीखण्डशैलानिलः ।
विच्छायस्य सुधानिधेरुपरि सा दृष्टिः पुरस्तात्पते-
दित्थं द्वारमुदाजहार वसतेः कामी पुरः शिल्पिनः ॥ १०१ ॥

सख्यः किं स्तुत ता नवापि ककुभः स्यादुत्तरैवोत्तमा
यस्यां शंकरशैलजार्धकथया दृष्टो न मानोदयः ।
यस्यामेकरुचिः शशी न हिमतः पद्मं न याम्यो मरु-
न्न स्वेदो रतिपर्ययेऽपि सततं दीर्घा यया यामिनी ॥ १०२ ॥

किं त्वं जागरितोऽखिलामपि निशं सुप्ता कदाहं पुन-
र्येनैवं मुषिताधरच्छविरसौ प्राच्यां समुज्जृम्भते ।
दृश्यन्ते मणयः पुरः कतिपये व्योम्नि प्रकीर्णाः क्वचि-
दृष्टा मण्डनसंपदोऽपि भवता त्वद्दुलभाः सुस्थिताः ॥ १०३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पू.आ.श्रीजिनवल्लभसूरिविरचितम्

# ॥ शृङ्गारशतकाव्यम् ॥

स्वयम्भुवो वृषाऽहीनराजहंससमाश्रिताः ।
शिवश्रीकान्तधातारो, जयन्ति जगदीश्वराः ॥ १ ॥

यन्नामस्मरणादपि श्रुतिसुधासारानुकारा नृणां,
सर्पन्ति प्रविवादिकोविदमदक्षोदक्षमः सूक्तयः ।
तां वन्दे बुधवृन्दवन्द्यचरणां वाग्देवतामुद्धत-
ध्याऽऽन्ध्यं ध्वंसकरीं स्थितां हृदि शरच्चन्द्रोज्ज्वलाङ्गश्रियम् ॥ २ ॥

सुललितपदाः सालङ्कारा विदग्धमनोहराः,
स्फुटरसघनश्लेषाश्छन्दानुवर्तनतत्पराः ।
प्रकृतिमधुराः शय्यां प्राप्ताः प्रसन्नतया स्वयं,
कविजनगिरः कान्ताः कान्ता जयन्ति गुणोज्ज्वलाः ॥ ३ ॥

सन्तोऽसदपि कुर्वन्ति, भूषणं दूषणं परे ।
एकान्ततस्ततश्चेह, कुतस्त्यस्तत्त्वनिश्चयः ॥ ४ ॥

लक्ष्मीमुक्तोऽपि देवादुदितविपदपि स्पष्टदृष्ट्याऽन्यदोषो-
प्यज्ञावज्ञाहतोऽपि क्षयभृदपि खलालीकवाक्याकुलोऽपि ।
नैव त्यक्त्वाऽऽर्यचर्यां कथमपि सहजां सज्जनोऽसज्जनः स्यात्,
किं कुम्भः सातकौम्भः क्वचिदपि भवति त्रापुषो जातुषो वा ॥ ५ ॥

नास्ते मालिन्यभीतेरखिलगुणगणः सन्निधानेऽपि येषां,
येषां सन्तोषपोषः सततमपि सतां दूषणोद्घोषणेन ।
तेषामाशीविषाणामिव सकलजगन्निर्निमित्ताऽहितानां,
कर्णे कर्णेजपानां विषमिव वचनं कः सकर्णः करोति ॥ ६ ॥

कोऽयं दर्प्पकरूपदर्प्पदलनः कः पुण्यपण्यापणः,
कस्त्रैलोक्यमलङ्करोति कतमः सौभाग्यलक्ष्म्यावृतः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोत्कण्ठं तव कण्ठकाण्डकुहरे कुण्ठः परं पञ्चमो,
मुग्धे ! यस्य कृते करे च विलुठत्यापाण्डुगण्डस्थलम् ॥ ७ ॥

सद्यः स्विद्यति यन्मुखं पुलकि यन्कान्तं कपोलस्थलं,
यच्च न्यञ्चति चक्षुरर्द्धमुकुलं यत्कम्पसम्पत्परा ।
स्तम्भारम्भि यदङ्गमङ्गणतटी दृष्टेऽपि कान्ते सखि,
प्रौढालिङ्गनभङ्गिसङ्गिनि न तज्जानामि यद्भावितः ॥ ८ ॥

वैदग्ध्यबन्धुरमनुद्धरमुग्धदुग्ध
स्निग्धच्छटाभिरभिषिञ्चदिवाङ्गमङ्गम् ।
तत्तद्विलोकितमनाकुलमायताक्ष्याः,
शृङ्गाररसारसुभगं सततं स्मरामि ॥ ९ ॥

स्मेरस्फारविवृत्ततारनयनं त्रस्यत्कुरङ्गीक्षणा,
मामैक्षिष्ट निविष्टविष्टपशिरःसौभाग्यभाग्यश्रि यत् ।
यच्चावोचत विस्मयस्मितसुधाधाराम्बुधौताऽधरं,
तत् किं क्वापि ममापि कोपि कथमप्यन्योऽपि विस्मारयेत् ॥ १० ॥

वर्णः कीर्णसुवर्णचूर्णमहिमा देहस्य हास्यावहं,
पूर्णेन्दोरमलास्यमस्यति रतिं चेतो भुवोऽपि स्मितम् ।
सुभ्रूविभ्रमविभ्रमत्रिजगतस्तस्या रसस्रोतसो,
बालेन्दीवरदामसुन्दरदृशः किं किं न लोकोत्तरम् ॥ ११ ॥

पीनोन्नतस्तनतटे तव भात्यखण्ड-
खण्डाभ्रकं विकटकूटमिदं मृगाक्षि ! ।
प्राकारमण्डलमिव त्रिजगज्जिगीषु-
पञ्चेषुणा रचितमुच्चगिरीन्द्रदुर्गे ॥ १२ ॥

मानिन्याः कुटिलोत्कटभ्रु सहसा संदष्टदन्तच्छदा,
स्वेदातङ्कभयेन मोचनकृते हुङ्कारगर्भं मुखम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कामं केलिकलौ दृढाङ्गघटनानिष्पेषपीडोत्रस-
त्तिर्यग्मानकृतार्त्तनादवदिव प्रीणाति यूनां मनः ॥ १३ ॥

सव्याजवक्रितमनोहरकण्ठकाण्डं,
स्थित्वा सखीजनसमक्षमलक्ष्यवृत्त्या ।
उल्लासितैकतरलभ्रु सरोरुहाक्ष्या,
क्षिप्तः सुधाधवलमाविजयी कटाक्षः ॥ १४ ॥

कम्रोन्नम्रास्यपद्मा व्यवहितवपुरासन्नरथ्याचरं मां,
द्रष्टुं साकूतकौतूहलतरलचलल्लोचनोदञ्चितभ्रूः ।
भूयो भूयः प्रकम्पाभरणरणझणत्कारिणीयं गवाक्षं,
चक्रे कं कं न राकारजनिकरयुतोन्नालनीलाम्बुजं सा ॥ १५ ॥

यन्मिथ्या हसति क्षणं क्षणमथोदस्त्रेक्षणं रोदिति,
स्वैरं क्रोशति यत् क्षणं प्रलपति व्यर्थं क्षणं गायति ।
यच्चास्ते क्षणमुत्थिता क्षणमथो शेते क्षणं चास्थिरा,
तद् वातूलतुलां भवानदय हे बालां बलान्नीतवान् ॥ १६ ॥

पीतं पीतमथो सितं सितमिति प्रागन्ववादीद्वचो,
यो मे शिष्य इवाऽथवा शुक इव प्रेमप्रसन्नः प्रियः ।
सख्यः सोऽन्य इव क्षणक्षयितया स्नेहस्य यन्मय्यभू-
त्तद्युक्तं कतमोऽयमत्र तु विधिः सैवेत्थमस्मीह यत् ॥ १७ ॥

विनीतः कान्तो मे प्रियसहचरी वक्ति च शठं,
भृशं रम्यो मानः स्फुटचटुहठालिङ्गनघनः ।
निकामं कामोऽपि प्रहरति तदित्थं किमिह मे,
विधेयं चिन्तेयं भ्रमयति मनो मोहयति च ॥ १८ ॥

वाचो वैदग्ध्यदिग्धाः स्मितशुचिवदनं साचिसञ्चारिचक्षुः,
सुन्यस्तः केशहस्तोऽलिकमलकचितो बन्धुरो नीविबन्धः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चेतः कान्तैकतानं वपुरतिमधुरं भ्रूलतोल्लासिलास्याः,
तस्या बाल्येऽतियाति स्मरगुरुरचितः कोऽपि कान्तःक्रमोऽयम् ॥ १९ ॥

लीलाविलोलनयनोत्पलमङ्गभङ्ग-
संसङ्गसुन्दरमनङ्गतरङ्गिताङ्गम् ।
मद् वीक्षणे क्षणमभूद् बत चञ्चदुच्च-
रोमाञ्चकञ्चुकचितं स्थितमानताङ्ग्याः ॥ २० ॥

अमन्दानन्दं तद्वदनमनिशं वेद्मि मनसा,
दृशा पश्याम्याशा दश विशदयत्तद्वपुरहम् ।
सदा तन्निर्वृत्तं जगदखिलमीक्षे च यदतो,
वियोगः संयोगाद् वरमिव हि मन्ये मृगदृशः ॥ २१ ॥

सखि ! गतिरियं किं ते जाता श्रमादिव मन्थरा,
मधुमदवती चेयं किं वा स्मिता मुकुला च दृक् ।
भयमयमिव स्वेदस्तम्भि प्रकम्पि च किं वपु-
र्नयनमधुराऽकस्मात् कस्माद्दशाऽभवदीदृशी ॥ २२ ॥

निश्वासा करकेलिपङ्कजदलोल्लासा यदेते चला,
यच्चैष स्फुरति प्रकम्पितजपापुष्पप्रकाशोऽधरः ।
यच्च स्वेदि ललाटमङ्गमलसं विभ्रान्तमक्षिभ्रुवं,
तन्नूनं सखि ! ते स्मरग्रहमहापस्मारजं वैकृतम् ॥ २३ ॥

शल्यत्यद्यापि तन्मे मनसि गुरुपुरो यत्तदा पक्ष्मलाक्ष्या,
मां लक्षीकृत्य मुक्तो झगिति निबिडितव्रीडमाकेकराक्ष्या ।
चञ्चत्पञ्चेषुनाराचरुचिरभिवलद् ग्रीवया पक्ष्मलेखा-
पुङ्खः कर्णावतंसाम्बुरुहमिलदलिश्रेणिकान्तः कटाक्षः ॥ २४ ॥

कान्तिभ्रमोन्नमितवेल्लितबाहुवल्लि-
संदर्शितोन्नतघनस्तनबाहुमूला ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यन्मां मदालसमुदैक्षत साङ्गभङ्ग-
मङ्गारवद्दहति तद्धृशमम्बुजाक्षी ॥ २५ ॥

दृश्योल्लासिशशप्लुतोद्गतपदं सोल्लेखरेखस्फुटो-
द्भाव्यव्याघ्रनखाङ्कमङ्कविकसल्लावण्यवारां पदम् ।
तन्निर्व्यक्तवराहचर्चितदलत्पत्राङ्कुरं सोष्म ते,
पुष्णात्येव घनस्तनस्थलमिदं तृष्णां न मुष्णाति नः ॥ २६ ॥

हे सौभाग्यनिकेत ! कोपकणिकाकृतेन बालाऽचल-
त्त्वां धूत्वापि यदैव दैवहतिका मुक्ता त्वयेव क्रुधा ।
तत्कालावधि सा मनस्तृणकुटीलग्नस्मराग्निर्निशां,
बाष्पव्याकुलकण्ठनालमनयत् कृत्स्नां रुदत्यैव ताम् ॥ २७ ॥

दासस्तेऽस्मि परिश्रुताश्रुसलिलं सुश्रोणि ! किं रुद्यते,
गोत्राग:कृतिजल्पतीति दयिते बाला विहस्यावदत् ।
नाहं रोदिमि मन्मुखेक्षणरुचे यन्नामगृह्णास्यदः,
सैवं मेऽक्षिगता प्रिया तव शठ ! त्वद्दर्शनात् खिद्यति ॥ २८ ॥

मनसि निहितं ध्यानैकाग्र्यं हताः सकलाः क्रियाः,
वचसि कृतमक्षुण्णं मौनं तनुस्तनुतां गता ।
अपि कुचतटी मालामुक्ता वराक्षिनिरञ्जनं,
तदपि समभून्नास्या योगो वियोगविधिः परम् ॥ २९ ॥

सद्यःस्वेदपयःप्लवप्लुतवपुः सम्पृक्तकूर्पासका,
तत्कालप्रबलोच्छलद्रतिबलैस्तैम्यत्रितम्बाम्बरा ।
दुर्दृष्टे त्वमदृष्ट एव हि वरं येनेयमस्मत्सखी,
प्राप्ताऽऽकस्मिकसाध्वसाऽऽकुलतनुर्दुःस्थामवस्थामिमाम् ॥ ३० ॥

उद्धूतविभ्रम[मनोज्ञ]विजृम्भिकाऽपि,
लीलानिमीलनयनाप्यविदूरतोऽपि ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सा पुण्डरीकवदना मदनावरुग्ण-
मस्मन्मनोहरिणमङ्कगतं चकार ॥ ३१ ॥

आस्यं दास्यदशातिदेशि शशिनः कातर्यचर्याङ्कित-
स्फाराऽक्षेक्षणकल्पदत्तहरिणस्त्रीवीक्षणं वीक्षणम् ।
भ्रूविभ्रान्तिरनङ्गचापलतिकालीलाकृताचार्यका,
किं वा खर्वितसर्वगर्वविभवं नाऽस्या मनोज्ञाकृतेः ॥ ३२ ॥

सत्यं सख्यविकल्पदृक्क्षणिकधीर्नष्टायकः सौगतः,
प्रामाण्येन न यो ब्रवीत्यवितथज्ञाने विकल्पस्मृती ।
यस्मादस्मि विकल्पतल्पशयितं प्रेयांसमङ्गस्पृशं,
स्मृत्वा केलिकलां च तां रतिफलं विन्दामि निन्दामि च ॥ ३३ ॥

यस्य स्वप्नसमागमेऽपि समभूत्सा काऽप्यवस्था मनो,
यत्रानन्दनदावगाहि तु सुधा सारोक्षितं नु क्षणात् ।
आसीत् सोऽपि जनो ह हा !! विधिवशात् तस्यापि मे चेतसो,
दृष्टोऽप्यन्यजनायते झगिति तद् धिक् प्रेम निःस्थेम यत् ॥ ३४ ॥

यदेतत् तन्वङ्ग्या नयननलिनाढ्यं मुखसर-
स्तरत्यत्रं (?) नीलाऽलकविपुलसेवालपटलम् ।
लसल्लावण्याम्भः प्रसरमरमुत्तापहतये (?),
स्मरज्ज्वालाजालग्लपितवपुषामेष विषयः ॥ ३५ ॥

मृद्वङ्गीति तनूदरीति विलसल्लावण्यवापीति वा,
बिम्बोष्ठीति पृथुस्तनीति सुमुखीत्याऽऽवर्त्तनाभीति च ।
शृङ्गारोरुतरङ्गिणीति हृदयस्मेराम्बुजाक्षीति च,
स्मारं स्मारमरे ! स्मरज्वरभरभ्रान्तं किमुत्ताम्यसि ॥ ३६ ॥

स्त्रीपुंसाः सखि तावदत्र दधतस्तास्ता दशा रागिणोः,
प्रेमप्रेमवियोगयोगजनितं दुःखं सुखं वाप्नुयुः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुंस्त्वं स्त्रीत्वमृतेऽपि यत्तु हृदयं विद्राति निद्राति मे,
नाऽक्षि ग्लायति चाङ्गमेतदुचितं नैषां प्रिये प्रोषिते ॥ ३७ ॥

दुर्लक्ष्योऽस्या विकारो वपुषि वरतनोः कोऽपि वैद्याऽचिकित्स्यो,
यन्त्राऽपस्मारहेतोर्व्यथयति विरहे केवलं किन्त्वकस्मात् ।
दृष्टेऽपीष्टेऽमृताम्भः प्लवमुचि निबिडस्तम्भसंरम्भदुस्था,
सद्यः स्वेदाम्बुधौताङ्ग्यपि मुकुलितदृग्मूर्च्छया छाद्यते स्म ॥ ३८ ॥

बाला बालिशदेश्य पश्चिमकलाशेषेन्दुलेखेव ते,
भूयो दर्शनकाङ्क्षया जिगमिषुं जीवं बलाद् रुन्धती ।
वारं वारमरालपक्षविगलद् बाष्पप्रवाहाऽऽविलं,
चक्षुर्दिक्षु ससर्ज गर्जति घने सा लोललम्बालका ॥ ३९ ॥

तिर्यग्वर्तितनर्त्तितालसलसत्तारे चले चाक्षिणी,
लीलाबन्धुरमुद्धुरं च गमनं भ्रान्ते स्थिरे च भ्रुवौ ।
तन्वङ्ग्याः स्मितदुग्धदिग्धमुदयद् वैदग्ध्यमुग्धं वचः,
प्रीत्यै कस्य न वाऽभ्रविभ्रममहो स्निग्ध्यं विमोग्ध्यं वयः ॥ ४० ॥

आबद्धस्तनबिम्बबन्धुरमुरोऽमुष्या मनोजन्मने,
दत्तद्वारसुवर्णपूर्णकलशावासश्रियं पुष्यति ।
यूनां विस्मयविस्मृतान्यविषयं यस्मान्मुहुः पश्यतां,
चक्षुर्दीधितितालिका विघटिते वा याति चित्ते रतिः ॥ ४१ ॥

सा कुम्भसन्निभकुचा स्फुरदूरुदण्ड-
सुण्डातिमन्थरगतिर्मदघूर्णिताक्षी ।
यन्मानसं रतिमतिस्मृतिपद्मिनीभिः,
साकं करेणुरिव सोत्कलिकं ममन्थ ॥ ४२ ॥

चक्षुः क्षिप्तवलक्षपक्ष्मलचलच्चक्षुःकटाक्षच्छटाः,
सा बाला सविलासमस्यति सुधाधारानुकाराः स्म यत् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हुं तत्कामिकुरङ्गबन्धविधये शृङ्गारलीलागुण-
प्रेमग्रन्थिघनामनङ्गमृगयुः प्रासीसरद् वागुराम् ॥ ४३ ॥

स्फाराक्ष्युत्क्षिप्तपक्ष्मोद्घटितपुटपिधानोरुशृङ्गारपाथो,
भृङ्गाख्द्वन्द्वभासा स्नपयदनभितो मां यदक्षिद्वयेन ।
मुक्ताचूर्णैर्नु चन्द्रद्युतिभिरुत सुधासारधाराभिराहो,
मुग्धा दुग्धाब्धिनीरैस्तदभृत ककुभः किं नु कर्पूरपूरैः ॥ ४४ ॥

स्निग्धं मुग्धमपाङ्गसङ्गि मुकुलं चक्षुः किमाकेकरं,
किञ्चोत्क्षिप्तनिकुञ्चितान्तचतुरा भ्रूवल्लिरुल्लासिनी ।
स्वस्थानस्थमपीदमंशुकमरं किं रच्यतेऽथोल्लस-
ल्लीलांदोलितदोर्लतं गतमभूत् कस्मादकस्मात् सखि ! ॥ ४५ ॥

सा ते चित्तगता स्वभावचपला ब्रूते स्वनामेति त-
न्मा गोत्रस्खलनेन ते सुभगभूद्वैलक्षलक्षं मनः ।
इत्युक्त्वा धृतमन्नुतन्तुरचितस्थूलाश्रुमुक्तावलि-
र्विस्रस्तभ्रु सबाष्पगद्गदगलं बाला परं रोदिति ॥ ४६ ॥

यत्कान्तेऽवनतेप्यहं स्मरगुरूद्दिष्टं सखीप्रार्थितं,
कोपान्नाकरवं तदेतदुदितं पापं स्फुटं यत्नतः ।
कर्पूरोऽग्निकणायते मृगमदश्रीः कालकूटायते,
शीतांशुर्दहनायते कुवलयस्रक् कालपाशायते ॥ ४७ ॥

स्वच्छोच्छलद्विपुलकान्तिजलान्तराल-
रङ्गद्वलित्रयतरङ्गवती विभाति ।
तन्व्यास्तनु स्मरविलासनदीव यत्र,
रोमावली ललति शैवलवल्लरीव ॥ ४८ ॥

चञ्चद्भिश्चन्द्ररोचिः शबलितविततध्वान्तलेखायमानै-
र्मुक्तायुक्तात्मवेणीरुचिभिरभिचलत्तारसारैः कटाक्षैः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्दृष्टः कान्तयान्तर्ग्रथित विचिकिलेन्दीवरस्त्रक्समैस्त-
द्गङ्गासङ्गार्कपुत्री लुलितजलचलद्वीचिभिः स्नापितोऽहम् ॥ ४९ ॥

भ्रमद्भ्रमरविभ्रमोद्भटकटाक्षलक्षाङ्किता,
दृशामसदृशोत्सवाश्चतुरकुञ्चितभ्रूलताः ।
स्फुरत्तरुणिमद्रुमोल्लसदनल्पपुष्पश्रियो,
हरन्ति हरिणीदृशां किमपि हन्त ! हेलोदयाः ॥ ५० ॥

तामद्याप्यहमर्ककर्कशदशासम्भूतशोकाष्टदिक्-
कान्तामुत्कलकान्तकुन्तलतुले जाते त्रियामामुखे ।
ध्यानानीतमुखेन्दुनेव दलितस्फीतान्धकारः पुरः,
पश्यामि स्फुटमष्टमीयशशभृद्बिम्बालिकां बालिकाम् ॥ ५१ ॥

यत्तद् विलोकयतु यातु यथा कथञ्चिद्-
यत्किञ्चिदाचरतु यत्र यथा तथा साम् ।
प्रेयान् जनो य इह यस्य स तस्य दृष्टौ,
दृष्टो दधाति सहसाऽमृतवृष्टिसृष्टिम् ॥ ५२ ॥

विलासलसदंशुकव्यतिकराङ्गसङ्गोपन-
क्रमोन्नमितदोर्लताविशदबाहुमूलस्तनम् ।
विलोलचलनाङ्गुलीलिखितभूतलं सुभ्रुवः,
स्मरामि तरलेक्षणं तदवहित्थदुस्थं स्थितम् ॥ ५३ ॥

किञ्चित्र्यस्तैकपार्श्वस्तनतटघटनादुत्त्रुटत्कञ्चुकाङ्गी,
मां दृष्ट्वा स्पष्टमोट्टायिततरलचलत्तर्जनीकं व्यधात् या ।
तामीक्षेऽद्यापि हेलाबललिलितवलत्कण्ठमामीलिताक्षं,
लोलद्दोर्नाललीलाचलनकलकणत्कङ्कणं कर्णकण्डूम् ॥ ५४ ॥

प्राक्कोपादवधूय भूयसि परिम्लानेऽपमाने कृत-
स्वप्नायाश्चरणस्पृशं धृतसखीवेषं प्रिया (! प्रियं) जानती ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पादौ मे सखि मृद्नती प्रियकरस्पर्शभ्रमव्याकुलां,
मा मा कुर्वति मामुदीर्य सहसा शय्यां समारोपयत् ॥ ५५ ॥

स्थाने सख्यः परिचयवति प्राङ्नमः प्राणनाथे,
लज्जामज्जत्युदयति रतिः स्रंसते नीविबन्धः ।
नैवेदानीमदयहृदये प्रोषिते तत्र युक्तो,
नामोच्चारादपि हततनो सात्त्विकारम्भदम्भः ॥ ५६ ॥

मुक्ता मुक्तावलिरचनया सुभ्रु ! किं तेऽलकाली,
किञ्चित् श्लिष्यत्कुसुमविसरः केशहस्तो विहस्तः ।
किं वा यूनां स्मरतिमिरिणां नाद्य साङ्कद्विचन्द्र–
भ्रान्तिं धत्ते मृगमदरसोच्चित्रपत्रौ कपोलौ ॥ ५७ ॥

चेतः सन्निहताऽपि सा प्रतिपदाहूतापि यन्नोत्तरं,
दत्ते मेतदुदीक्ष्य मां प्रकुपिता साऽसूयमुक्त्वेति माम् ।
लोलत्पाटलचक्षुरुद्भटभवद्भ्रूभङ्गभीमा रुषा,
मानिन्याऽऽकुलकुन्तला हठकराकृष्टं पदाऽताडयत् ॥ ५८ ॥

अस्या सद्यो मदनसरितश्चन्द्रकान्तप्रभायाः,
सारङ्गाक्ष्याः सपदि भवति स्वेदगर्भाङ्गयष्टिः ।
किं वा बन्धात् कुसुममिव सम्फुल्लसेफालिकायाः,
नीवीग्रन्थिः स्खलितदयिताऽऽस्येन्दुसन्दर्शनेन ॥ ५९ ॥

सा चेद् वक्त्रेण चञ्चन्मृगमदरचितोच्चित्रपत्रेण रम्भा,
स्तम्भोरू रूपरेखाविजितमनसिजप्रेयसी प्रेयसी नः ।
न्यच्चक्रे तज्जिगीषु सकलमपि यदा त्वां तदा लक्ष्यलक्ष्मन्,
कस्मादस्मानकस्मात् स्मरपरमसुख ! श्वेतगो ! हंसिपादैः ॥ ६० ॥

यत्सत्यं सुभग ! स्वजीवितविभोः तस्याः सदैवाऽऽदरा–
दुत्कण्ठाभरनिर्भरे हृदि कृतावासोऽसि तेनाऽधुना ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मामप्युत्कयसि प्रियत्वमथवा किं पाटलासङ्गमात्,
सौगन्ध्यं पयसः कपालशकलं नाधातुमस्मिन्नलम् ॥ ६१ ॥

गुरुः स्तम्भारम्भः कुचमुकुलयोराऽऽहितसखी,
मनः कम्पः कम्पः श्वसितमधिकं चक्षुरभसम् ।
अविच्छेदः स्वेदः पृथुदवथु शून्यं च हृदहो !,
न जानीमः तस्यां क इव हि चिकारव्यतिकरः ॥ ६२ ॥

कान्तं मानसमक्षिपुष्करवरं शोणोऽधरः कुन्तलाः,
कालिन्दीरुचिराः कपोलफलकश्रीश्चन्द्रभागाऽधिका ।
सूते शर्म सरस्वती मुखनदी नाभिः क्रिया नर्मदा,
तापक्लान्तिनुदे मुदे च सुतनु ! त्वं पुण्यतीर्थाश्रिता ॥ ६३ ॥

इन्दोर्नाम मुधा सुधाकर इति व्यक्तं यदेकं प्रियं,
कामं नाम हराक्षिवह्निकणिकोत्तापान्न पातुं क्षमः ।
यत्सत्यं तु सुधामयीह तरुणि त्वं यादृशाऽपि क्षणं,
पश्यन्ती विरहाग्निदग्धवपुषां पुष्णासि कामान् बहून् ॥ ६४ ॥

साकं बाष्पकणाः पतन्ति वलयैः सार्द्धं शुचा वर्द्धते,
सन्तापः सह निद्रया तनुलताऽत्यर्थंगता तानवम् ।
तस्यास्त्वद्विरहादहानि दधति श्वासैः समं दीर्घतां,
सत्रा निस्त्रप सम्मदेन गलिता लीलाविलासोदयाः ॥ ६५ ॥

परिहर गृहमेतत् मुञ्च वा गोचरं मे,
त्यज नगरमिदं वा गच्छ देशान्तरं वा ।
अयि ! दयित विजाने कौशलं ते यदीतः,
पदमपि चलसि त्वं हृत्कुटीकोटरान् मे ॥ ६६ ॥

मुञ्चत्युच्चकुचप्रकम्पविधुराऽऽहारं च हारं च सा,
धत्ते कण्ठगतानसूंस्त्वदभिधामन्त्रं च बाष्पाकुला ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म्लायद्बालमृणालकोमलतनुस्तन्वीति दध्रे दशां,
त्वं निस्त्रिंश ! किमुच्यसे स्मरशिखिज्वालानभिज्ञोऽसि रे ! ॥ ६७ ॥

सास्त्रं वामभुजेन तोरणतटीमालम्ब्यमार्गे क्षणो-
त्क्षिप्तैकभ्रुकपाटपट्टमपरेणोद्वृन्तवक्त्रं स्थिताम् ।
चिन्तोत्तानविषण्णशून्यहृदयां द्रागेष धन्यः प्रिया-
मुद्गच्छत् पुलकावलुसतनुतां सर्वाङ्गमालिङ्गति ॥ ६८ ॥

सं..................वा मृगदृशः............दं,
स्नानात्युन्नत......................।
.....................पालिपुलिनासीनस्त.................,
.............वियोगजनवं, प्राप्नोति मुक्तक्रियः ॥ ६९ ॥

............ हिमानी परिपतन............गंगाम्भोजवित्थायवक्त्रा-
.....लमन्तःशुक्तमिश्रागुकुलितकमलाक्षीं मृगाक्षीं निरीक्ष्य ।
तच्चेतोऽनन्यवृत्त्या.........टुकसुचास्यानिसृष्टार्थदूत्या,
सध्रीच्याऽवाच्यं........त्वयि तददययन्नास्मि शक्तोऽपि वक्तुम् ॥ ७० ॥

यच्चित्रोत्पलपत्रकं त्रिकतटं यद् बिन्दुमालाऽलके,
यद् विस्पष्टशशप्लुतं स्तनयुगं यद् बिन्दुहृद् योऽधरः ।
सद्यो गण्डतलं प्रवालमणिवद् यत्ते स्वयं दूति तद्,
दातुं सम्प्रति सर्वथाऽहितरते युक्तोऽर्द्धचन्द्रो गले ॥ ७१ ॥

चिन्तासन्तानदृष्टं पुर इव शयने त्वामुपालम्भयन्ती,
त्वद्गोत्राऽद्वैतबुद्ध्या सकलपरिजनं नाम ते लम्भयन्ती ।
अन्तः सन्तापसारां स्तनभुवमनिशं सिञ्चती नेत्रनीरै-
र्मूर्च्छासञ्छन्नसंज्ञा विकरुण करुणां तां दशां सा पिधत्ते ॥ ७२ ॥

दृष्ट्वा कामनिकामकेलिकलितानुत्तुङ्गसौधावली-
तल्पाऽनल्पविकल्पकल्पितरतारम्भान् पुरः कामिनः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राचीषद्गलिते तमोमुखपटे वैकृत्यकृत्येक्षणाद्,
उद्यच्चन्द्रमुखीव रश्मिभिरभिस्पष्ट्यट्टहासाऽभवत् ॥ ७३ ॥

इन्दोरुद्यदखण्डमण्डलमदः प्राच्या वधूट्या स्फुटं,
वक्त्रं कुङ्कुमपङ्किलं किल निशारम्भे क्षयोदञ्चितम् ।
यस्मादत्र विशालभालफलकां तां स्तोककस्तूरिका-
विन्यस्तस्तबकाकृतिं विरचयत्यन्तः कलङ्कोऽपि च ॥ ७४ ॥

चञ्चन्ति चन्द्रकिरणाः किल केरलस्त्री-
हासश्रियां च मुरुलीदशनद्युतां च ।
कीराङ्गनामलकपोलतलत्विषां च,
लाटीललाटतटरुच्यरुचां च चौराः ॥ ७५ ॥

वेषः किं विषति क्षणान् मलयजालेपः किमङ्गारति,
स्रक्पौष्पी किमु कालपाशति पुरं किं जीर्णकान्तारति ।
कारागारति तेऽद्य किं रतिगृहं किं भूषणं भारति,
त्रैलोक्यं च सखे ! ज्वलज्ज्वलनति द्रागेव किं सर्वतः ॥ ७६ ॥

उद्भूतोद्दामकामक्रमकलितसलीलाङ्गभङ्गप्रसङ्ग-
प्रोद्वेलद्बाहुपाशोच्छ्वसितकुचतटोदस्तवस्त्रान्तकान्तम् ।
व्यक्तिभूताङ्गभागोल्लसदलसमनोहारिलावण्यलक्ष्मी-
लुभ्यल्लोलाक्षलोकोत्करतरलचलन्नेत्रनीराजितानाम् ॥ ७७ ॥

शङ्कातङ्कविवर्जितं रतिपतेरावासवेश्माऽसमं,
चिन्तातीतविचित्रवागविषयस्पष्टस्मराचार्यकम् ।
सर्वस्याश्च विदग्धहृत्प्रिय चतुःषष्ठे प्रकर्षं गतं,
प्राप्यं पुण्यपरम्परापरिगतैः पण्यङ्गनानां रतम् ॥ ७८ ॥

मुग्धे ! दुग्धैरिवाऽऽशा रचयति तरला ते कटाक्षच्छटाली,
दन्तज्योत्स्नापि विश्वं विशदयति वियन् मण्डलं विस्फुरन्ती ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्फुल्लद्गण्डपाली विपुलपरिलसत् पाण्डिमाडम्बरेण,
क्षिप्तेन्दो कान्तमद्धाऽभिसर सरभसं किं तवेन्दूदयेन ॥ ७९ ॥

संरम्भोद्भ्रमितभ्रुवा रणरणत् काञ्च्या कचाऽऽकर्षणात्,
क्षिप्त्वाऽधः प्रियया रहस्यतिदृढं बध्वा च हारस्रजा ।
कोपाकम्पबलस्खलन्मृदुपदं यातासि तस्या गृहा-
नित्युक्त्वा चरणेन निर्दयमयं कश्चित् कृती ताड्यते ॥ ८० ॥

अयि ! तरुणि मयि भ्रूविभ्रमादभ्रूशोभ-
भ्रुकुटिलतलभालभ्राजि कोपक्रमेषु ।
तव वचनकरोऽपि व्यर्थयन्नो मदर्थं,
कुसुमधनुरधिज्यं कार्मुकं नैव धत्ते ॥ ८१ ॥

लब्धव्या मणिमालिकेति पणिते दन्तच्छदादिग्रहे,
कान्ते द्यूतजिते रदैः सपदि तां कण्ठे हठात् कुर्वति ।
सेर्ष्याऽमर्षससीत्कृतार्द्धरुदिताक्रोशस्मिताङ्कं रतौ,
लोलाक्ष्याः किलकिञ्चितं रतिपतेराहूतिमन्त्रायते ॥ ८२ ॥

गाढान्तर्वासनातोऽजनि सुभग ममाऽपि प्रियाद्वैतमेवं,
तन्मात्रेऽत्र त्रपाऽभूदिति हसितमृदूदीर्यते ते स्वनाम्नः ।
सान्तः संरुद्धमन्युर्मनसिजविजयोद्घोषणामञ्जुकूजत्-,
काञ्च्या संयम्य सम्यक् चरणतलहतं मामशोकं चकार ॥ ८३ ॥

चरणपतितं प्रत्याख्याय प्रियं प्रियवादिनी-
मपि मम गिरं धूत्वा भूत्वाऽभिमानधना सखि ।
विरहदहनोद्धूमज्वालातुलैस्तनुतापिभिः,
सरलतरलश्वासैर्मिथ्याऽधुना परिखिद्यसे ॥ ८४ ॥

भुग्नभ्रुस्फुटरक्तगण्डफलकं प्रस्यन्दि दन्तच्छदं
लोलल्लोहितचक्षुरुद्गिरदिव प्रौढानुरागं हृदः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वाकारमनोहरं सुतनु ! ते कोपेऽपि पश्यन् मुखं,
दूयेनाऽस्मि यतस्ततोऽयमधुना मानानुबन्धेन ते ॥ ८५ ॥

कान्ते ! कान्ते कदाऽहं शिरसि न कृतवान्माल्यमालामिवाज्ञां,
क्षुण्णं चेत् क्षाम्य तावन्न पुनरपि विधास्यामि पादानतोऽस्मि ।
प्रेङ्खत्केतूद्यदिन्दुद्युतिभयदमिदं मे विलोलालकाग्रं,
चण्डि ! त्वं पाण्डु गण्डस्थलमलमरुणं किं मुधैवाऽऽदधासि ॥ ८६ ॥

कान्ते ! लोचनगोचरेऽपि सपदि प्रोद्दामरोमोद्गम-
न्नुद्यत्कञ्चुकसन्धिसूचितरुचिः कम्पाकुलोरस्तनि ।
सद्यः सान्द्रतरद्रवद्रतिजलैरार्द्रं नितम्बाम्बरं,
गोपायन्त्यपि किं न दैवहतिके ! मानग्रहं मुञ्चसि ॥ ८७ ॥

तन्वि ! तन्विदमनाकुलं मनः, किं करोषि क इव श्रमो मयि ।
चण्डि ! वध्यकरवीरमालिका-दारुणे रचयमारुणे दृशौ ॥ ८८ ॥

कोपत्र्यस्रपरान्मुखाङ्ककृतकस्वप्नां प्रियां पृष्ठत-
स्तिष्ठन्नुत्कटकण्टकाङ्कुरकणाकीर्णां करेण स्पृशन् ।
कोऽपि स्वेदजलच्छलद्रुतगलन्मानां विद न्याट्वात्(?),
धूर्त्तः प्रक्रमते हठाच्चटुपटुः स्पष्टं परावृन्तकम् ॥ ८९ ॥

दृष्टेऽभीष्टजने ततो हृदि धृते जाते मिताभाषणे,
विस्रम्भे च मनोगते करचितोपायप्रवृत्ते चिरात् ।
रागे पुष्यति शुष्यदङ्गमपि सद्व्रत्ते रतिं तां मिथः,
सङ्कल्पाहितसङ्गमङ्गमिथुनं नो यत्र वाचां गतिः ॥ ९० ॥

ऋतुं सफलयाऽधुना हठकचग्रहाकर्षणात्,
कपोलतलदोलिनीः कुटिलकुन्तलालीलताः ।
उदस्य सहसैव चेदमृतयत्वमीप्सुस्तदा,
सुधामधुरिमाऽधरं भ्रमर ! चुम्ब बिम्बाधरम् ॥ ९१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आस्ते कौलीयमार्गेऽर्गलमिव पुरतो वेत्रधारीव लज्जा,
सत्यं सूक्ष्मेङ्गितज्ञः परहसनरतिर्व्यर्थवैरी च लोकः ।
दूरे गाढाङ्गसङ्गः स्वरुचि सखि दृशाऽपीक्षितुं न क्षमा तं,
यातः सन्तापतप्ते हृदि मदनरसो मे सदा शोषमेव ॥ ९२ ॥

सख्यो मानधना मनः पुनरिदं कान्तैकतानं सदा,
सद्भावच्युतमस्य च व्यवहृतं दाक्षिण्यतोऽस्मास्विति ।
क्रूरात्मा विषमायुधः स्फुटमयं कामोऽपि वामोऽपि य-
ज्जाता दुःखमहाखनिः किमपरं पापाऽहमेका भुवि ॥ ९३ ॥

प्रत्यक्षं किल तर्ककर्कशधियः प्राहुः प्रमाणं बुधाः,
तन्मिथ्या हृदि वाचि चक्षुषि गतां तां संविदेऽहं सदा ।
सन्तोषापगमे तु यस्तदविनाभावो मया निश्चितो,
धूमाग्न्योरिव सर्वथा न सघटाकोटि समाटीकते ॥ ९४ ॥

प्रियोऽर्द्धमुकुलेक्षणः सुरतसङ्गरे सुभ्रुवो,
ददंश दशनच्छदं हठकचग्रहोत्तानितम् ।
अथो धुत्करत(?) कणत्वलयमांसलं सीत्कृतं,
सशुष्करुदितं व्यधान् मदनहुंकृतं च प्रिया ॥ ९५ ॥

कान्ता कोपकषायिताऽपि हि मया संसाधितासादर-,
....युद्धैधमऽवाङ्मुखेन शिरसा सद्यः प्रसाद्याऽऽदरात् ।
प्रादुःषत् कुचकुम्भलोभितदृशा स्वौष्ठव्रणाशङ्किना,
चार्द्धोदञ्चितकञ्चुकस्थगितदृक् संश्लिष्य सा चुम्बिता ॥ ९६ ॥

क्षीरनीरधिकल्लोललोललोचनया नया ।
क्षालयित्वेव मे सद्यः, स्थैर्यं धैर्यं च नीयते ॥ ९७ ॥

चित्तं सङ्केतितरतविधौ भावसम्भोगभङ्ग-
व्यक्तातङ्कं च्युतनखरदच्छेदमुक्तान्तकूजम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शङ्काकूताऽऽकुलतरलदृग्दृष्टदुःखं तथा चाऽ-
द्वन्द्वं द्वन्द्वं सुरविलसितं शिश्रिये पिप्रिये च ॥ ९८ ॥

सौत्सुक्यं भुजबन्धबन्धुरमुरो निश्शेषभुग्नं स्तनं,
तामालिङ्ग्य तथोन्नमय्य वदनं बिम्बाधरं चुम्बतः ।
हुं हुं मे विधुताग्रपाणि मृदुयत्तन्वी दधेऽद्यापि तत्,
स्पष्टं कुट्टुमितं निकुट्टितमिव प्रेक्षे मनःपट्टके ॥ ९९ ॥

उन्नालाम्बुजलोलबालशफरस्फारस्फुरच्छैवल-
व्याकीर्णं तव तन्वि ! पल्वलतुलामङ्गं बिभर्ति स्फुटम् ।
लावण्यद्रवपङ्किले किल यदेतन्मध्यभागे गता,
दृष्टिर्मे करिणीव वर्षतरला मग्नेव निस्पन्दताम् ॥ १०० ॥

शङ्के सुभ्रु ! सुधारसैर्विरचितं ते कालकूटच्छटा -
गर्भे मौक्तिकदामवन्मरकतश्रीरोचनं लोचनम् ।
यन्मामन्तरचारिभृङ्गसुभगश्वेताब्जपत्रप्रभा-
धिक्षेपीदमनङ्गसङ्गि सपदि प्रीणाति मीनाति च ॥ १०१ ॥

साकूतोत्कलिकाः सकौतुककणाः प्रेमद्रवार्द्रास्तव,
क्रीडन्त्यस्तरलाक्षि ! दिक्षु निबिडव्रीडा जडा दृष्टयः ।
चेतश्चञ्चलयन्ति कायलतिकामुत्कम्पयन्ति क्षणात्,
चक्षुः शीतलयन्ति किं तदथवा यूनां न यत् कुर्वते ॥ १०२ ॥

दिग्विस्तारि शिलांशुकान्तिरुचिरप्राञ्चत्कटाक्षच्छटा -
च्छायासूत्रितसूत्रतन्तुविसरं तत्तद्दशोल्लासि च ।
अन्तःसन्ततकामपावकशिखासन्तापशान्त्यै मनाग्
बाले ! वालय लोचनाञ्चलमपि प्रेमद्रवार्द्रं मयि ॥ १०३ ॥

त्वयि नियतमिदानीं चारुतारुण्यलीला-
विजितजगति जातव्रीडवैलक्षरुक्षः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुसुमधनुरधिज्यं कार्मुकं नैव धत्ते,
क इव बलिजितोऽपि ख्यापयेदात्मदाक्ष्यम् ॥ १०४ ॥

न्यस्तं सारयुगं नु कामकितवेनोरस्तयऽष्टापदे,
क्रीडायै रतिकन्यया नु निहितं यत्कन्दुकद्वन्द्वकम् ।
तज्जन्मद्वयसत्फलोदयनिभं कल्याणि ! कल्याणिनः,
कस्येदं कुचयुग्ममेष्यति तवाऽस्मिन्भोग्यतायोग्यताम् ॥ १०५ ॥

स्वच्छस्वच्छविचारिनाभिविततावर्तं स्मितास्याम्बुजं,
लोलद्बाहुमृणालवल्लिविलसल्लोमावलीशैवलम् ।
रङ्गत्तुङ्गतरङ्गभङ्गुरवलिस्मेराक्षिनीलोत्पलं,
किं गौराङ्गि ! तवाङ्गसुन्दरसरस्तर्षं मनः कर्षति ॥ १०६ ॥

न प्रालेयजलानिलैर्न सरसैरम्भोरुहस्रस्तरै-
स्तारैर्मौक्तिकदामभिर्न विततैः सान्द्रैर्न चान्द्रैः करैः ।
न प्राज्यैर्घनसारसारकुमुदस्रक्चन्दनालेपनैः,
शक्योऽन्तर्ज्वलितः क्षणं शमयितुं चैतद्वियोगानलः ॥ १०७ ॥

वक्त्रं गौराङ्गि ! राकामृतकररुचिरं गाढसम्भोगयोग-
व्यासक्तव्यक्तमुक्ताकणगणविशदस्वेदबिन्दु प्रगे ते ।
धत्तेऽवश्यायलेशस्तबकितविकचाम्भोजशोभामखण्डां,
यत्तत्तज्ज्ञा विहायाऽखिलकमलवनान्येतदाशिश्रिये श्रीः ॥ १०८ ॥

प्रागुद्गम्य मुदा सबिन्दुमधरं प्रोद्वीक्ष्य जातक्रुधा,
हन्तुं तं चरणो रणन्मणितुलाकोटिर्भयोत्पाटितः ।
तं चाऽऽक्षिप्य हरिक्रमः क्रममनुष्ठाय दृढौष्ठग्रहं,
श्लिष्ट्वा मां सखि ! कर्त्तुमात्मरुचितं धूर्त्तः प्रवृत्तो हठात् ॥ १०९ ॥

अन्तःपृष्ठविनिष्टनिष्ठुरनखाभुग्नाङ्गुलीपादुका,
संयोगाज्जडितं नु मोहनरसश्लेषेण नु श्लेषितम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रोद्यत्कण्टककीलितं नु मिथुनं स्यूतं नु कामेषुभि-
र्गाढालिङ्गनसङ्गिकेलिविरतौ धत्ते स्फुटं सम्पुटम् ॥ ११० ॥

कृत्वा रागवदुद्धतं रतमथो मीलद्दृशं निःसहां,
श्रोणीपार्श्वसमस्तहस्तवितताघातेप्यसंज्ञामिव ।
दृष्ट्वा मां सखि ! मूर्च्छिता किमु मृता सुप्ता नु भीताथवे-
त्याकूता कुलधीरिव द्रुतमभूत् सोऽपि प्रियोऽस्मत्समः ॥ १११ ॥

कान्ते ! कल्पितकान्तमोहनविधावानन्दसान्द्रद्रव-
द्रागावेगनिमीलिताक्षियुगला वीक्षे न तं यद्यपि ।
नेत्रानन्दकरं तथापि सखि ! मे तच्चुम्बनालिङ्गन-
प्राक्संक्रान्त इव स्फुरत्यनुपमः कश्चिद् रसश्चेतसि ॥ ११२ ॥

यत्र स्वेदाम्बुधौते वपुषि दवथुवल्लुप्यते चन्दनश्री-
र्यस्मिन् मञ्जीरसिञ्जा बहुविधमणितैः श्रूयते नोद्धुराऽपि ।
नाऽऽत्मा यत्रान्त्यधारास्थिततुरग इवाऽवैति घातक्षतार्दी-
स्मन्येऽहं भूतसर्वान्यविषयमिव सम्मोहनं मोहनं तत् ॥ ११३ ॥

प्रारब्धेऽधरबिम्बचुम्बनविधौ वक्त्रं हरत्युत्तरं,
कृच्छ्राद् यच्छति किञ्चिदस्फुटपदं दृष्टाप्यधः पश्यति ।
शय्यायां परिवर्तते विचलते चालिङ्ग्यमाना मुहु-
र्यत्तेनैव मनोमुदं नववधूर्धत्तेऽधिकं कामिनाम् ॥ ११४ ॥

न ताः काश्चिद्वाचः क्वचन न च ताः काश्चन कलाः,
स नोपायः प्रायः स्फुरति न तदस्त्यक्षरमपि ।
यतोऽन्योन्यं यूनां विरहभवभावव्यतिकरं,
परं वक्तुं शक्तः कथमपि कदापि क्वचिदपि ॥ ११५ ॥

पण्यस्त्रीपाण्डुगण्डस्थलपुलककृतो दम्भसम्भोगरङ्ग-
व्यासङ्गश्रान्तकान्तास्तनतटघटितस्वेदबिन्दून्नुदन्तः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्णाटीकर्णकर्णोत्पलदलदलनाः स्पष्टलाटीललाट-
व्यालोलाग्रललीलालकचयचलना वान्त्यवाचीनवाताः ॥ ११६ ॥

नीरन्ध्रान्ध्रपुरन्ध्रिपक्ष्मललनाः सानङ्गबङ्गाङ्गना-
तुङ्गाभोगनितम्बबिम्बघटितश्लक्ष्णाम्बराकर्षिणः।
वान्ति क्लान्तिमवन्तिकुन्तलवरस्त्रीणां हरन्तो रतौ,
मन्दान्दोलितसान्द्रचन्दनवनाः स्वैरं वसन्तानिलाः ॥ ११७ ॥

सम्भोगान्तनितान्ततान्तसुदृशां विस्रस्तवस्त्रस्फुट-
श्रोणिस्पर्शरसालसा इव मुखैः पीता इवोच्छ्वासिभिः ।
नाभीकन्दरमूर्छिता इव शनैर्वान्ति प्रभावानिला-
स्तुङ्गाभोगघनस्तनस्थलवलद्व्यावृत्तवेगा इव ॥ ११८ ॥

उद्यत्केलिकलाहितभ्रमरकादभ्रभ्रमावद्वपु-
र्ल्लेखास्तोत्पुलकक्रमत्क्रमरणन्मञ्जीरहूतस्मरम् ।
साक्षाद् भूतरसं प्रकर्षपदवीरूढानुरागं मिथ-
स्तन्वङ्ग्याः पुरुषायितं प्रविकृताशेषक्रियं पातु वः ॥ ११९ ॥

वाचः काश्चिदधीत्य पूर्वसुधियां तत्काव्यदीक्षागुरुं,
वीक्ष्य श्रीभरतं च संज्ञरुचिरं श्रीकामतन्त्रं च तत् ।
साहित्याम्बुधिबिन्दुबिन्दुरपि सत्यद्ये [?] विधित्सुर्मना-
गभ्यासं जिनवल्लभोऽदृभदिमाः शृङ्गारसारा गिरः ॥ १२० ॥

भेदो विद्यत एव दाहकतया नाऽङ्गारशृङ्गारयो-
रित्युक्तं न यदस्मदर्च्यचरणैः सार्वैस्तदेवाधुना ।
दाक्षिण्यात् किल नीरसेन रचितं किञ्चिन्मयाऽपीति यद्,
बालस्येव सहन्तु मे सुकवयो वाचालताचापलम् ॥ १२१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ॥ सूक्तमाला ॥ ( अपरनाम )

# ॥ दृष्टान्तशतकम् ॥

प्रणिपत्य परं ज्योति-र्नानाभणितिभङ्गिभिः ।
श्लोकैरेव यथाशक्ति सूक्तमालां वितन्महे ॥ १ ॥

कलाकलापसम्पन्ना जल्पन्ति समये परम् ।
घनागमविपर्यासे केकायन्ते न केकिनः ॥ २ ॥

उपकर्त्ता स्वतः कश्चिदपकर्त्ता च कश्चन ।
चैत्रस्तरुषु पत्राणां कर्त्ता हर्ता च फाल्गुनः ॥ ३ ॥

कल्याणमूर्त्तेस्तेजांसि सम्पद्यन्ते विपद्यपि ।
किं वर्णिका सुवर्णस्य नारोहति हुताशने ॥ ४ ॥

दधत्यार्त्तं सुखाकर्तुं सन्तः सन्तापमात्मना ।
सुदुःसहं सहन्ते हि तरवस्तपनाऽऽतपम् ॥ ५ ॥

गुणिनः स्वगुणैरेव सेवनीयाः किमु श्रिया ? ।
कथं फलर्धिवन्ध्योऽपि नाऽनन्दयति चन्दनः ॥ ६ ॥

नह्येके व्यसनोद्रेकेऽप्याद्रियन्ते विपर्ययम् ।
जहाति दह्यमानोऽपि घनसारो न सौरभम् ॥ ७ ॥

विकारमुपकारोऽपि कुरुते समयं विना ।
अकालोपस्थिता वृष्टि-र्महारिष्टाय जायते ॥ ८ ॥

निसर्गेणैव पिशुनः स्वजनोच्छेदमिच्छति ।
राहुराहूयते केन विधोर्वैधुर्यहेतवे ॥ ९ ॥

निजव्यापारनिश्चिन्ता निद्रायन्ते भुजङ्गमाः ।
जगद्द्रोहप्ररोहाय यतो जागर्त्ति दुर्जनः ॥ १० ॥

दुर्जनः कालकूटश्च ज्ञातमेतौ सहोदरौ ।
अग्रजन्माऽनुजन्मा वा न विद्मः कतरोऽनयोः ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्णौ भोगभृतां मूर्ध्नि साधु नाऽधत्त यद् विधिः ।
सकर्णकोऽथ कुरुते मर्मवित् कर्म तादृशम् ॥ १२ ॥

गर्व ! सर्वङ्कषोऽस्मीति गिरं मा स्म वृथा कृथाः ।
अद्यापि तव जैत्राणि चरित्राणि दुरात्मनाम् ॥ १३ ॥

समर्थानां समर्थोऽरि-निग्रहाय परिग्रहः ।
प्रभविष्णुस्तमोऽन्ताय प्रभा प्रातः प्रभापतेः ॥ १४ ॥

स्वामिन्यस्तं प्रपेदाने सीदत्येव परिच्छदः ।
भास्वत्यस्तमिते म्लान-कमलाः कमलाकराः ॥ १५ ॥

चारुणा परिवारेण प्रभुर्लोके महीयते ।
महीरुहेषु महितः किंकिल्लिर्निजपल्लवैः ॥ १६ ॥

महिमानं महीयांसं सङ्गः सूते महात्मनाम् ।
मन्दाकिनीमृदो वन्द्यास्त्रैवेदीवेदिनामपि ॥ १७ ॥

सदा सर्वजनैर्भोग्यं श्लाघ्यं भवति वैभवम् ।
सुखपेयं(य-)पयःपूरं वरं कूपात् सरोवरम् ॥ १८ ॥

लोकम्पृणानपि गुणान् दोषः स्वल्पोऽपि दूषयेत् ।
अपेया पश्य पीयूष-गर्गरी गरबिन्दुना ॥ १९ ॥

प्रीणयन्नुपकुर्वाणं कुर्यात् कार्यविचक्षणः ।
पुष्पन्धि(न्ध)यो न पुष्पाणि दुनोति स्वं धिनोति च ॥ २० ॥

क्रूरप्रभोः प्रभुत्वेन जनो जीवन् मृतायते ।
असन्त इव सन्तोऽपि स्युर्भावास्तिमिरोदयात् ॥ २१ ॥

तावत् तेजस्विनस्तेजो यावद् भाग्यमभङ्गुरम् ।
क्षीणतैलः कियत्कालं दीपो(पको)ऽपि प्रदीप्यते ॥ २२ ॥

निजमन्दिरमुच्छिन्दन् जायते कोऽपि दुःसुतः ।
स्वाश्रयं नाशयत्याशु हताशोऽयं हुताशनः ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

औरसः स्नेहमाहात्म्यं किञ्चिदन्यत् प्रवक्ष्यते ।
सम्पद्यापदि वा सिन्धु-विधुन्तुद(दा)नुरुध्यते ॥ २४ ॥

उपार्जयति तत् कश्चिद् यन्नैवोपार्जि पूर्वजैः ।
फलं मधुरमाम्रस्य न पुनः कुसुमादयः ॥ २५ ॥

मानिनां स्वामिनां दत्तं मुदेऽल्पमपि कल्पते ।
वरं पौरन्दरं वारि बप्पीह ! पातुमीहसे ॥ २६ ॥

निर्लक्षणः क्षणाल्लक्ष्मीमाश्रयस्यापि लुम्पते ।
पतन् कपोतः कुरुते शाखाशेषं हि शाखिनम् ॥ २७ ॥

चिरात् फलिष्यतो नेतुर्दूरमुद्विजते जनः ।
कियत्कालं फलोत्तालस्तालमर्थी निषेवते ॥ २८ ॥

कामं दूरफल(लः) स्वामी लभते वचनीयताम् ।
अद्यापि कविभिस्तालः सोपालम्भं निबध्यते ॥ २९ ॥

प्रभोः संभावनाऽपैति तुच्छमेव प्रयच्छतः ।
अगादग्रेतनी कीर्ति र्वटस्येदृग् फलोदयः ॥ ३० ॥

प्रभवेत् परिभोगाय सर्वस्य दिवसो 'निजः' ।
दीपैरपि पराल्लक्षैर्न हि दीपोत्सवो भवेत् ॥ ३१ ॥

सुकृतं सुकृतैर्लभ्यं यत् स्वतः परिपच्यते ।
पक्वस्य स्वयमाम्रस्य स्वादः कोऽप्यतिरिच्यते ॥ ३२ ॥

सङ्गतिर्यादृशी तादृक् ख्यातिरायाति वस्तुनः ।
रजनी ज्योत्स्नया ज्यौत्स्नी तमसा च तमस्विनी ॥ ३३ ॥

क्लिश्यन्ते केवलं स्थूलाः सुधीः सुफलमश्नुते ।
ममन्थ मन्दरः सिन्धुं रत्नान्यापुर्दिवौकसः ॥ ३४ ॥

आत्मीयमेव माहात्म्यं कुलं क्वापि न कल्पते ।
उदन्वदन्वयश्चन्द्रः कालकूटः किमन्वयः ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षणादसारं सारं वा वस्तु सूक्ष्मः परीक्ष्य(क्ष)ते ।
निश्चिनोति मरुत् तूर्णं तूलोच्चय-शिलोच्चयौ ॥ ३६ ॥

न दौःस्थ्येऽपि निजं स्थानं मोक्तव्यमिति मे मतिः ।
मृगलक्ष्मा पुनर्लक्ष्मीं किं नाऽभ्येति नभःस्थितः ॥ ३७ ॥

लोकरूढिरिह प्रौढिरस्तु वस्तु यथा तथा ।
दधि मङ्गलधौरेयं न पुनर्दुग्धमभ्यधुः ॥ ३८ ॥

उत्कर्षश्चापकर्षश्च भृत्यानां भर्तृ-कर्तृकौ ।
दिवसान् दिवसाधीशश्चिनोत्यपचिनोति च ॥ ३९ ॥

आत्मने तेऽभिद्रुह्यन्ति ये द्रुह्यन्ति महात्मने ।
पश्योलूकमनालोकमसूयन्तं विवस्वते ॥ ४० ॥

सद्वृत्तैर्महतां पङ्क्तिराप्यते पितुरात्मजैः
मङ्गलेषु समश्चके पत्रैराम्रस्य पिप्पलः ॥ ४१ ॥

धुरि ये मधुरात्मानः पुरतस्तेऽपि निष्फलाः ।
फले दुर्भक्ष्यमिक्षूणामक्षुण्णं....नेक्ष्यते ॥ ४२ ॥

यस्य लोकोत्तरं सूत्रमापदोऽप्यस्य सम्पदः ।
शुद्धिमग्नौ निमग्नस्य पश्य कस्याऽपि वाससः ॥ ४३ ॥

सुकृते सर्वतः क्षीणे श्रीरपि क्षीयते क्षणात् ।
पाथःपूरे कथाशेषे किं नन्दत्यरविन्दिनी ॥ ४४ ॥

विभवाभोगविस्फूर्तिरदृष्टैकनिबन्धना ।
क्षोणीरुहपरीणाहे हेतुर्मूलस्य सौष्ठवम् ॥ ४५ ॥

अहितेऽभ्युदिते कान्तिं समूलस्यापि नश्यति ।
छायातरोरपि च्छाया फाल्गुनेन [वि]नश्यति ॥ ४६ ॥

स्थानोपज्ञं विदुः स्थाने महिमानं मनीषिणः ।
देवशीर्षेषु शेषेति माल्यं निर्माल्यमन्यथा ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यवसायः प्रणाशाय स्वयमस्थाननिर्मितः ।
बीजस्याऽपि प्रणाशाय प्रारब्धा कृषिरूषरे ॥ ४८ ॥

विसगंधेहिं निहणिओ सवक्किमायाइ मायाए ॥ १२ ॥

सोदासनामनिवई पावो माणुस्समंसरसलोको ।
इह लोए रज्जाओ भट्ठो अ भवे पणट्ठो अ ॥ १३ ॥

सुकुमालियाइ भत्ता फासिंदिअगिद्धिपरवसो निवई ।
चुक्को रज्जसुहाओ अडवीइ दुहं बहुं पत्तो ॥ १४ ॥

अइचंगो ललिअंगो निवरमणीरमणरइअमणरंगो ।
वसिओ अमेज्झकूवे नरयसरूवे चिरं कालं ॥ १५ ॥

मुक्कलमाणसपसरा किच्चाकिच्चाइकज्जपरिमूढा ।
माइं भइणिं धूअं विसयपसत्ता निसेवंति ॥ १६ ॥

किं वा विसयपरवसा अकज्जासज्जा अईवनिल्लज्जा ।
सिट्ठजणगरहणिज्जं अगम्मगमणाइं न कुणंति ? ॥ १७ ॥

कामंधनिव्विवेआ पावा मारंति भायरं मित्तं ।
पुत्तं भत्तारं पि हु अहो ! दुरंतो विसयसंगो ॥ १८ ॥

जंपंति अलिअवयणं मुसंति लोअं धणस्स लोभेण ।
किं बहुणा सव्वाइं पावाइं कुणंति कामंधा ॥ १९ ॥

संसारभमणकरणा विसया विसए विसेविया पावा ।
दुक्खाइं अविसए पुण इहयं पि हु दिंति णेगाइं ॥ २० ॥

संपइदंसी मुद्धो विसयंविलुद्धो विणस्सए तुरिअं ।
करिदेहमंसगिद्धो व्व वायसो जलहिजलमज्झे ॥ २१ ॥

महुबिंदुसायसरिसे सुतुच्छविसएसु लालसामूढा ।
नाणाविहाइं विसहंति दुक्खलक्खाइं तिक्खाइं ॥ २२ ॥

जह कागिणीइ कज्जे मूढा हारंति रयणकोडिं पि ।
तह विसयसुहे बद्धा मुद्धा हारंति सिवसुक्खं ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुबहुं पि हु तवचरणं हारइ विसयाभिलासमेत्तेण ।
कंडरिउ व्व विमूढो दुट्टु अहो ! विसयपरिमाणो ॥ २४ ॥

पायं विसया नारीण संगमे हुंति ताण पुण चरिअं ।
न मुणइ देवगुरू वि हु किं पुण पागयनरो मूढो ॥ २५ ॥

अण्णं भणंति अण्णं कुणंति अण्णं मणम्मि चिंतंति ।
ही ! विसमसहावाओ महिलाओ जयम्मि पावाओ ॥ २६ ॥

सूरिअकंत व्व पिअं चुलि(ल)णि व्व सुअं हहा ! गुणेहि जुअं ।
नारी विसयपसत्ता मारेइ विवेअपरिचत्ता ॥ २७ ॥

सुकुमालिआइआणं नारीणं कित्तिआणि चरिआणि ।
सक्किज्जंति कहेउं विउसेहिं वि वासकोडीहिं ॥ २८ ॥

अंबं वा निबं वा आसण्णं आरुहंति वल्लीओ ।
सगुणं व निग्गुणं वा आसण्णनरं तहा महिला ॥ २९ ॥

न गणंति गुणं विहवं रूवं विण्णाणनाणसंपत्तिं ।
उवयारिं पि विरत्ता धिरत्थु इत्थीसहावस्स ॥ ३० ॥

बहुकूडकवडभरिआ बुद्धं सुद्धं नरं पयारेइ ।
नारी विरत्तचित्ता पावा तं चेव मारेइ ॥ ३१ ॥

महिलाछलेण जालं विहिणा वित्थारिअं किर विसालं ।
जत्थ निवडंति मूढा तिरिआ मणुआ सुरा असुरा ॥ ३२ ॥

सविआरं रमणीणं दंसणमवि सीलजीविअं हरइ ।
किं पुण पणयपयंपिअपरिचयविस्संभमाईणि ॥ ३३ ॥

चम्मट्ठिमंसनिचए वसरुहिरपुरीसमुत्तभवणम्मि ।
छविमेत्तमणहरे नारिविग्गहे रमइ विसयंधो ॥ ३४ ॥

बीभच्छकुच्छणिज्जे लज्जाव(ज)णयम्मि असुइदुग्गंधे ।
महिलादेहावयवे किमिउ व्व नरो रइं कुणइ ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताण विसयाण सम्मं चिंतिज्जंतं हविज्ज किं रम्मं ।
साहारणा दरिद्दाण साणमाईण जे निच्चं ॥ ३६ ॥

विसयसुहनिप्पिवासा जयंतु मुणिणो दुहाण कयनासा ।
तोडियसिणेहपासा सिद्धिवहुसुक्खबद्धासा ॥ ३७ ॥

उज्झियविसयपसंगं तरुणत्ते कयअणंगभडभंगं ।
जंबूसामिमुणिंदं वंदे उक्खणिअभवकंदं ॥ ३८ ॥

निरवज्जवज्जघडिअं सुदंसणमुणिस्स माणसं मण्णे ।
इत्थीपत्थणघणघायनिबिडघडणाहिं नो भिण्णं ॥ ३९ ॥

कंदप्पदप्पदलणस्स भद्दमिह थूलभद्दसामिस्स ।
कोसामणमत्तमहागइंदतिक्खंकुसस्स सया ॥ ४० ॥

सो जयउ वइरसामी सोहग्गनिही अ लीलगयगामी ।
अवगण्णिअकुलकण्णो विसएसु परम्मुहो धण्णो ॥ ४१ ॥

इअ पुव्वमुणिवराणं विसयविरत्ताण सुद्धचरिआणि ।
सुमरिज्ज सलाहिज्जा जह कामतिसा उवसमेइ ॥ ४२ ॥

ताण नमो ताण नमो निच्चं चिय पुरिससीहसुहडाणं ।
अद्धच्छिपिच्छिरीओ जाण न हिअए खुडुक्कंति ॥ ४३ ॥

ते च्चिअ पुरिसा धण्णा बालत्तणयम्मि गहिअसामण्णा ।
विसयाणं अवगासो जेहिं न दिण्णो दुहावासो ॥ ४४ ॥

मलमलिणजुण्णवत्थो कइआ हं धम्मझाणसुपसत्थो ।
विसएसु निप्पिवासो विहरिस्सं गच्छकयवासो ॥ ४५ ॥

कइआ विसयमहाजरपरमोसहचरणकरणपरिणामो ।
विहरिस्सं विसहंतो बावीसपरीसहे धीरो ॥ ४६ ॥

कइआहं विसयतिसा-पसमण सुस्समणवयणसिसिरजलं ।
घुंटिस्समेगचित्तो सुसमयखीरोअहिसमुत्थं ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कइआ तवतणुअंगो विमुक्कसंगो विणिज्जिआणंगो ।
कयमोहसिण्णभंगो होहं सिवसुहविहिअरंगो ॥ ४८ ॥

इअ भावणासुमंतं झायंताणं विसुद्धचित्ताणं ।
न कुणइ कया वि छलणं विसयपिसाओ समत्थो वि ॥ ४९ ॥

एअं जे गुणभूरिसूरिवियणं कामग्गिउल्हावणं
धम्मज्झाणवणस्स वुड्ढिकरणं मेहंबुतुल्लं धणं ।
चित्ते हंत धरंति कम्मनियले वेरग्गदंडेण ते,
भंजेऊण निरंतरं वरतरं भुंजंति मुक्खे सुहं ॥ ५० ॥

## ॥ भावनाकुलकम् ॥

निसाविरामे परिभावयामि, गेहे पलित्ते किमहं सुयामि ।
डज्झंतमप्पाणमुविक्खयामि, जं धम्मरहिओ दीहे गमामि ॥ १ ॥

इमस्स देहस्स दुहालयस्स, किर जीव लुद्धो ठाणस्सगस्स ।
अण्णं सरं किं पि अपित्थरस्स, जायारई कूवि व दद्दुरस्स ॥ २ ॥

माणुस्सजम्मे तुडिलद्धएणं, जिणिंदधम्मो न कओ य जेणं ।
तुट्टे गुणे जह धाणुक्कएणं, हत्थामले वा य अवस्सतेणं ॥ ३ ॥

दुलहे वि लद्धे माणुस्सजम्मे, चिन्तामणीतुल्लजिणिंदधम्मे ।
पुविल्लए किंचि वि दुट्ठकम्मे, सुहाणुट्ठाणम्मि अणायरो मे ॥ ४ ॥

चरणं चरेउं जइ नो तरेसि, गिहत्थधम्मं न समायरेसि ।
सव्वस्स गमणे अद्धं न लेसि, पच्छा घणं जीव विसूरएसि ॥ ५ ॥

विसुद्धयं दंसणनाणसारं, न धारियं संजमसीलभारं ।
सड्ढत्तणं तं पि हु नामधारं, कहं नु होही भवजलहिपारं ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवो जिणो साहु गुरू पसत्था, तत्ताइं जीवाइनवपयत्था ।
मण्णंति जे केइ नरा कयत्था, अच्छंतु ता पंचमहव्वयत्था ॥ ७ ॥

धण्णा मुणी जे चइऊण गेहं, तवेण उग्गेण दमंति देहं ।
न मण्णियं पुत्तकलत्तनेहं, बहुमाणसारं पणमामि ते हं ॥ ८ ॥

मायापियाबंधवसयणविंदं, लहु उज्झियं घरवावारदंदं ।
उम्मूलियं मोहणवल्लिकंदं, नमामि तेसिं चरणारविंदं ॥ ९ ॥

पुव्विं पि जे के गिहगुत्तिलोणा, घित्तुं वयं गुरुकुलवासलीणा ।
अमुच्छियाऽगिद्ध अदीणवयणा, कालोचिया जे पालंति जयणा॥ १०

समिइसमिया तिगुत्तिगुत्ता, सज्झायज्झाणेसु सयाऽणुरत्ता ।
संविग्गचित्ता विकहाविरत्ता, न मोहपंके मणयं पि खुत्ता ॥ ११ ॥

न मोट्टुया इंदियतक्करेहिं, न विद्धया मयरद्धयस रेहिं ।
न खोभिया दुट्ठपरीसहेहिं, न गंजिया कोहाइयभडेहिं ॥ १२ ॥

अट्टाइं रुद्दाइं परिच्चयंति, धम्माइं सुक्काइं समायरंति ।
नवाइं कम्माइं न बंधयंति, पुविल्लयाइं तवि झोसयंति ॥ १३ ॥

तेसिं नमो दुक्करकारयाणं महव्वयादुद्धरधारयाणं ।
जिणागमे सुद्धपरूवगाणं, विसुद्धचरणे करणे रयाणं ॥ १४ ॥

अहं पि पुव्विं गिहवासलीणो, सुसाहुधम्मे विमले न लीणो ।
इण्हिं पुणो वयबलसत्तिहीणो, चिट्ठे जहा जलविरहम्मि मीणो ॥ १५

जाणंतओ भोगसुहे अणिच्चे, घोरेअरे दुहभरिए अनिच्चे ।
न लग्गओ दुविहे धम्मकिच्चे, ठिओ अहं कुड्डुकवाडविच्चे॥ १६ ॥

आसापिसाएण धरेवि मुक्को, मणोरहो साहु मणम्मि चुक्को ।
कायावराहो वि गिहे निलुक्को, चिट्ठे जहा वानर डालचुक्को ॥ १७ ॥

अहसंकिलिट्ठा विसया अणिट्ठा, करंडए छूढभुयंगपुट्ठा ।
मोहंधयोरेहिं झडत्ति दड्ढा, अम्हारिसा जग्गंता वि मुट्ठा ॥ १८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एएण मण्णामि अहं कयत्थो, जं पाविओ सिवपुरमग्गसत्थो।
जिणिंदभणिओ धम्मो पसत्थो, संसारजलहीतरणे समत्थो ॥ १९ ॥

भत्तिब्भरो नामसिरो सया हं, विण्णत्तियं परमिट्ठीण काहं।
पत्थेमि वत्थु इह किंचि नाहं, भवे भवे दिंतु सुबोहिलाहं ॥ २० ॥

खमावणं सव्वजीवाण खमणं, आलोयणाई चउसरणगमणं।
अणसणं पच्चक्खाणकरणं, अंतम्मि मे हुज्ज समाहिमरणं ॥ २१ ॥

जे भावणाए कुलयं पठंति, एयं सचित्ते परिभावयंति।
आणं जिणंदाण सया कुणंति, ते झत्ति निव्वाणसुहं लहंति ॥ २२ ॥

पू. आ. श्री रत्नसिंहसूरिविरचितम्

## ॥ हितशिक्षा कुलकम् ॥

जइ जीव ! तुज्झ सम्मं परलोयपयाणयं वसइ हियए।
ता धम्मम्मि पमाओ होज्ज मणागं पि न कयावि ॥ १ ॥

मणमोहणविज्जाहि रत्ताण गुरुम्मि जाम बहुमाणो।
धित्तेसिं बहुमाणो जइ नो संवेगरंगाओ ॥ २ ॥

मण नयणह अनुजीह क्रिय तीहं विरलीकरेसु।
संजमवंतु सुवासणउ जउ मुणि कोइ कहेसु ॥ ३ ॥

किरियपरायण बहुय मुणि दीसहिं वेसु धरंत।
विरला केइ सुवासणा जे रंजहिं पुण संत ॥ ४ ॥

जाणंता अगहिल्ला कह भुल्लाइं दियालजियलोए।
विसएहिं भोलिया अह मह वयणं ही कुणंतु कहं ? ॥ ५ ॥

अज्ज वि किंपि न नट्ठं जइ चेयसि हंदि किंपि अप्पाणं।
विलवणमेत्तट्ठिओ पुण अरण्णरुण्णं समायरसि ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कण्णि धरेविणु दिण्ण मइं इय सक्खिय लोइ ।
हं केण वि न हु जग्गविउ मन जंपसि परलोइ ॥ ७ ॥

चिंतहिं हियडं दज्झिसइ पच्छायावु करेसि ।
होसइ कांइवि नेव तुहु पर हत्थड़ा म लेसि ॥ ८ ॥

एएहिं वि वयणेहिं तुह जिय ! मण्णे न भावसब्भावं ।
जा नेव पुलइयंगो रेल्लसि अंसूहिं महिवलयं ॥ ९ ॥

जस्स मणदप्पणम्मी भावत्थो फुरइ एयभणियस्स ।
सो देवाण वि पुज्जो किं पुण मणुयाण जियलोए ? ॥ १० ॥

गिरिसिहरग्गेहिं वरसियइ रहइ न पाणिउ जेव ।
पत्थर-सरिसह नीरसह कहिउ सुणिज्जह तेव ॥ ११ ॥

वयणेणं भणियमिणं तरामि नो सिक्खिउं च बेडाए ।
सिरि धम्मसूरि सीसो जंपइ एयं रयणसूरी ॥ १२ ॥

पूर्वाचार्यमहर्षिकृतम्

## ॥ त्रिषष्टिध्यानकथानककुलकम् ॥

नमिऊण महावीरं, वुच्छं तेवट्ठिअसुहझाणाणं ।
आहरणसंगहमिणं, सुमरणहेउं गुरुवएसा ॥ १ ॥

अण्णाणझाणम्मी[म्मि] दिट्ठंतो असगडपियपुव्वभवो ।
अणायारझाणम्मी [म्मि] वल्लरझाणी य कुंकणउ ॥ २ ॥

कुदंसणम्मि सोरठ-सावयदेवो पवण्णमिच्छत्तो ।
कोहे पालगसासग-नालीयमाई उदाहरणा ॥ ३ ॥

माणम्मि उ बाहुबली, विस्सभूई य संगमो देवो ।
मायाए धणसिरिया, भाउज्जायं परिक्खंती ॥ ४ ॥



For Private And Personal Use Only

लोहम्मि सिंहकेसर-साहू चेडगनिहाणविह[वणिअ]मित्तो ।
रागम्मि विक्कमजसो, विण्हुसिरीए य देवरइ ॥ ५ ॥

दोसम्मि पिप्पलादो-महुदेवो चेव नाविओ नंदो ।
मोहम्मि उ बलदेवो, कण्हसरीरं परिवहंतो ॥ ६ ॥

इच्छाए कविलरिसी, मिच्छम्मि जमालिपमुहआहरणा ।
मुच्छाए कणगझओ, नियसुयदेहाणुवगयरो ॥ ७ ॥

संकाए अव्वत्ता-साढा एवमित्थुदाहरणा ।
कंखाए उ मिरीई [मरीई], कविला इत्थंपिइ भणंतो ॥ ८ ॥

गेहम्मि महुरमंगू-आयरिया पुण हवंति आहरणं ।
पुरनिद्धमणे जक्खो, जे जाया जिब्भदोसेणं ॥ ९ ॥

आसाए मूलदेवो, बंभणपाहेयआससंजुत्तो ।
ये तण्हाइ गालदहो, छुहाइ दमगो सिलापाई ॥ १० ॥

पंथोऽप्पकालगम्मो, पोयणमग्गम्मि वक्कलच्चीरी ।
पंथाणो य महंतो, महिंदसिंहो तहिं नेओ ॥ ११ ॥

निद्दाए आहरणा, थीणद्धिगया उ पुत्तलाईया ।
नीयाणम्मि उ नेया, गंगदत्ताइआहरणा ॥ १२ ॥

नेहम्मि उ मरुदेवी, अरहण्णगवइरसामिमाई उ ।
कामे कुमारनंदी, हासपहासे सुमुच्छी[च्छि]ओ ॥ १३ ॥

मायावलेव कलुस-झाणम्मि अभि महापीढपीढा य ।
कलहे कमलामेला-हरणे पुण नारओ नेओ ॥ १४ ॥

जुज्झम्मि कोणिओ खलु, पज्जोओ चेव सुहुमठाणेसु ।
निजुज्झम्मि य भरहो, बाहुबली चेव दिट्ठंतो ॥ १५ ॥

संगम्मि उ भवदेवो, गहियवओ नागिलाइ अणुरत्तो ।
संगहझाणम्मि तहा, दव्वे लुद्धुव्व मम्मणओ ॥ १६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ववहारम्मि सवत्ती-जुयलं पुत्तत्थहेउ विवयंतं ।
कयविक्कयझाणम्मी[म्मि], कुसगाहीलुद्धनंदो उ ॥ १७ ॥

तहणत्थदंडझाणे, वहगा दीवायणस्स संबाई ।
आभोगी[गे] बंभदत्तो, बंभणअच्छी विकड्ढंतो ॥ १८ ॥

अणाभोगज्झाणम्मी[म्मि] पसण्णचंदो महारिसी नेओ ।
रिणआविलझाणम्मी[म्मि] तिलग्गाहा समणभगिणी ॥ १९ ॥

वेरम्मि फरुसरामो, सुदाढ[ढो] तह सालसीसतावसिया ।
वीयके रज्जहेउं, ऊहंतो चाणको नेओ ॥ २० ॥

हिंसाए कालसूयर, निण्णगओ णेओ महेसरदत्तो ।
हासम्मि चंडरुद्दस्स, भाविसीसो समित्तो य ॥ २१ ॥

पहसम्मि य पज्जोओ, वारित्तरिसिं उवहसंतो ।
पओसे कमठो गोवो, कड[ण्ण] सिलसखवगो य वीरस्स ॥ २२ ॥

फरुसे चुलणी-मणिरह-सप्पागरिसो य सावियाइ पई ।
भयझाणम्मि वि भद्दो, गयसुकुमालस्स उवघाई ॥ २३ ॥

अप्पपसंसाझाणे, रहकारो अंबलुंबि तोडिंतो ।
परनिंदाए खवगो, कूरगडू पइ पडिनिविट्ठो ॥ २४ ॥

परगरिहाए गुट्ठा-माहिलगो पूसमित्तअहिखवगो ।
परिगहज्झाणे कुंचग-सिट्ठी तह चारुदत्तो य ॥ २५ ॥

परपरिवाए य सस्सू, भद्दं दोसं असंतयं दिंती ।
परदूसणम्मि रूद्दो, अंगम्मि सदोषमाहिंतो ॥ २६ ॥

आरंभे उद्दवए, दीवायणगायकरडकरड त्ति ।
संरंभे संकप्पे, खुहगकुमरो उदाहरणं ॥ २७ ॥

पावाणुमोयणम्मी[म्मि], उवरोहवरोहिणो उवज्झस्स ।
धण्ण त्ति संसगजणो, नायव्वो होइ आहरणं ॥ २८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आरामादहिगरणे, नंदगमणियारसिद्धिआहरणं ।
असमाहि-मरणम्मी[म्मि], खंदगं पइ पालगो नेओ ॥ २९ ॥

कम्मोदयम्मि कण्हो, पुव्वं सुभभावओ वि पज्जंते ।
कम्मोदयपच्चयओ, असुहझाणं झियायंतो ॥ ३० ॥

इड्ढीगारवझाणे, दसण्णभद्दो नरेसरो नेओ ।
रसगारवम्मि राया, जियसत्तू उदगनाउत्तो ॥ ३१ ॥

सायागारवझाणे, दिट्ठंतो इत्थ होइ नायव्वो ।
नरयत्थो ससिराया, इव गाहुत्तो ससीराया ॥ ३२ ॥

अवेरमणंझाणे, पुत्ताणं अविरइं अहिलसता ।
उसुयारुत्तभिगुजसा, मूअलगभाया य विण्णेओ ॥ ३३ ॥

अमुत्तिमरणंझाणे, मुत्तिविग्घे नियाणकरणम्मि ।
चित्तेण निसिद्धो वि हु, तच्चित्तो होइ संभूओ ॥ ३४ ॥

कत्थ वि रूवंझाणे, अहियपयं दीसए तदा तम्मि ।
सगरो [सरूवे] सणंकुमारो, पररूवे अ सगड ग्गुवाला ॥ ३५ ॥

इय तेवट्ठीझाणा, सोदाहरणा य कित्तिया ।
केसिंचि अट्टझाणे, अवतारो केसिं रूद्दम्मि ॥ ३६ ॥

सव्वत्थ बिंदुलोवं, पाइयभावाउ इत्थ काऊण ।
अण्णाणझाणेन्ते य थोवं पाढो विकत्थे व ॥ ३७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पू.मु.श्री जिनविनयविरचितम्

## ॥ जीवायुष्पमाणकुलयं ॥

मणुआण विंसोत्तरसयं, सयं सिंह-काग-गय-हंसा ।
कच्छ-मच्छ-मयरसहस्सं, सयमाउं गिद्धपक्खीणं ॥ १ ॥

चडलिय-सारस-सूअर-आई जीवाण पण्णासं ।
वग्घाणं चउवीसं, सट्ठी बग-कोंच-कुक्कडगं ॥ २ ॥

सारंगाण तीसं, सुअ-सुणह-बिलाड-बारसगं ।
भिग-जंबुग-चउवीसं, गो-महीसि-उंट-पणवीसं ॥ ३ ॥

गंडस्स वीसवरिसं, सोलस अज-गड्डुरियाणं च ।
ससगं च चउदसगं, वासदुगं मुसगस्साऊ ॥ ४ ॥

सरड-गिह-गोह-कीडग, वरिसदुगं जुआ य कंसारी ।
मासतिगं च वीययपंखी, अहिआउं जिणेसरदिट्ठं ॥ ५ ॥

श्री रत्नमन्दिरगणीविरचिता

## ॥ उपदेशतरङ्गिणी ॥

वसुधाभरणं पुरुषः पुरुषाभरणं प्रधानतरलक्ष्मीः ।
लक्ष्म्याभरणं दानं, दानाभरणं सुपात्रं च ॥ १ ॥

अभयं सुपत्तदाणं, अणुकंपा उचिअ कित्तिदाणं च ।
दोहि वि मुक्खो भणिओ, तिन्नि वि भोगाइअं दिन्ति ॥ २ ॥

ये यौवने शीलधरा नरा स्युस्तेषामहो सत्पुरुषेषु रेखा ।
*ते तारकाः स्युः प्रविशन्ति पूरे, तरङ्गिणीनां तरणक्षमा ये* ॥ ३ ॥

मनुष्याः किङ्करायन्ते, देवा निर्देशवर्त्तिनः ।
शीलभाजोऽथवा कस्य, कल्पवृक्षो न वल्लभः ? ॥ ४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुविसुद्धसीलजुत्तो, पावइ कित्तिं जसं च इह लोए।
सव्वजणवल्लहच्चिअ, सुहगइभागी य परलोए ॥ ५ ॥

सीमा खानिषु वज्रखानिरगदङ्कारेषु धन्वन्तरिः,
कर्णस्त्यागिषु देवतासु कमला दीपोत्सवः पर्वसु।
ॐऽकारः सकलाक्षरेषु गुरुषु व्योम स्थिरेषु क्षितिः,
श्रीरामो नयतत्परेषु परमं ब्रह्म व्रतेषु व्रतम् ॥ ६ ॥

चक्रे तीर्थङ्करैः स्वयं निजगदे तैरेव तीर्थेश्वरैः
श्रीहेतुर्भवहारि दारितरुजं सन्निर्जराकारणम्।
सद्यो विघ्नहरं हृषीकदमनं माङ्गल्यमिष्यर्थकृद्,
देवाकर्षणमारदर्पदलनं तस्माद्विधेयं तपः ॥ ७ ॥

रथ्यां पुनाति पवनो मलिनाभियुक्ता-
मर्णः सुवर्णसकलं किल गेहदेहम्।
पात्रं तु पावकसमेतजलाभिषेकः
सम्यक्शमोर्मिसरसं तप एव जीवम् ॥ ८ ॥

यत्कुष्ठादिगरिष्ठरोगविरतिर्निष्ठीवनालेपनाद्
मूत्रस्पर्शवशेन काञ्चनकला यल्लोहधातुष्वपि।
रत्नानां करपल्लवप्रणयतो यच्चाक्षयत्वोन्नतिः
तद्विश्वत्रयवन्द्यमद्भुतगुणं जीयात्तपः स्फूर्जितम् ॥ ९ ॥

विरज्य विषयेभ्यो यैस्तेपे मोक्षफलं तपः।
तैरेव फलमङ्गस्य जगृहे तत्त्ववेदिभिः ॥ १० ॥

पोरिसिचउत्थछट्ठे काउं कम्मं खवंति जं मुणिणो।
तं नो नारयजीवा वाससयसहस्सकोडीहिं ॥ ११ ॥

दुःखव्यूहापहाराय सर्वेन्द्रियसमाधिना।
आरम्भपरिहारेण, तपस्तप्येत शुद्धधीः ॥ १२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रासादे कलशाधिरोपणसमं बिम्बे प्रतिष्ठोपमं,
पुण्यश्रीस्फुटसंविभागकरणं बिभ्रद्विशिष्टे जने ।
सौभाग्योपरिमञ्जरीप्रतिनिभं पूर्णे तपस्याविधौ यः
शक्त्योद्यापनं करोति विधिना सम्यग्दृशां सोऽग्रणीः ॥ १३ ॥

ज्ञेयान्यङ्गानि दानादीन्येव धर्मनरेशितुः
तस्य तेष्वधुना जीवो, भावना सा निगद्यते ॥ १४ ॥

थोवं पि अणुट्ठाणं भावविसुद्धं हणइ कम्ममलं ।
लहुओ वि सहसकिरणो तिमिरसमूहं पणासेइ ॥ १५ ॥

जिनभवनबिम्बपुस्तकचतुर्विधश्रमणसङ्घरूपाणि ।
सप्तक्षेत्राणि सदा, जयन्ति जिनशासनोक्तानि ॥ १६ ॥

रम्यं येन जिनालयं निजभुजोपात्तेन कारापितं
मोक्षार्थं स्वधनेन शुद्धमनसा पुंसा सदाचारिणा ।
वेद्यं तेन नरामरेन्द्रमहितं तीर्थेश्वराणां पदं,
प्राप्तं जन्मफलं कृतं जिनमतं गोत्रं समुद्द्योतितम् ॥ १७ ॥

ये कारयन्ति जिनमन्दिरमादरेण
बिम्बानि तत्र विविधानि विधापयन्ति ।
सम्पूजयन्ति विधिना सततं जयन्ति,
ते पुण्यभाजनजना जनितप्रमोदाः ॥ १८ ॥

श्रीमज्जैनगृहे जिनप्रतिकृतौ जैनप्रतिष्ठाविधौ,
श्रीजैनस्पने जिनार्चनविधौ श्रीसङ्घपूजादिके ।
श्रीजैनागमलेखने च सततं श्रीतीर्थयात्रादिके,
येषां स्वं विनियोगमेति धनिनां धन्यास्त एव क्षितौ ॥ १९ ॥

जिनभवनं जिनबिम्बं, जिनपूजां जिनमतं च यः कुर्यात् ।
तस्य नरामरशिवसुखफलानि करपल्लवस्थानि ॥ २० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जीर्णोद्धारः कृतो येन, विभवेन सुचारुणा ।
जिनाज्ञा पालिता तेन, क्लेशकूपारपारदा ॥ २१ ॥

यावत्तिष्ठति जैनेन्द्रं, मन्दिरं धरणीतले ।
धर्मस्थितिः कृता तावज्जैनसौधविधायिना ॥ २२ ॥

कारयन्ति जिनेन्द्राणां, तृणावासानपीह ये ।
मणिरत्नविमानानि, तैर्लभन्ते भवे भवे ॥ २३ ॥

सारं तदेव सारं, नियुज्यते यज्जिनेन्द्रभवनादौ ।
अपरं पुनरपरधनं, पृथ्वीमलखण्डपिण्डं वा ॥ २४ ॥

स्वैर्द्रव्यैर्जिनमन्दिराणि रचयत्यभ्यर्चयत्यर्हत-
स्त्रिर्भक्त्या यतीनां तनोत्युपचयं वस्त्रान्नपात्रादिभिः ।
धत्ते पुस्तकलेखनोद्यममुपष्टभ्नाति साधर्मिकान्,
दीनाभ्युद्धरणं करोति कलयत्येवं सुपुण्यार्जनम् ॥ २५ ॥

जीर्णोद्धारः श्रुतपरिमलामोदितात्मन्यजस्त्रं,
पात्रे दानं भगवति जिनाधीश्वरे नित्यभक्तिः ।
दीनानाथोद्धरणमनिशं विश्वविश्वोपकारः,
प्राणित्राणं फलमिदमहो चञ्चलायाः श्रियोऽस्याः ॥ २६ ॥

जिणभवणाइं जे उद्धरन्ति, भत्तीइ सडीयपडियाइं ।
ते उद्धरंति अप्पाणं, भीमाओ भवसमुद्दाओ ॥ २७ ॥

यस्तृणमयीमपि कुटीं, कुर्याद्द्यात्तथैकपुष्पमपि ।
भक्त्या परमगुरुभ्यः पुण्योन्मानं कुतस्तस्य ? ॥ २८ ॥

पुण्याट्टं पौषधागारं, तत्रैत्य ग्राहको जनः ।
व्रतादिपण्यं क्रीणाति, क्रमेणानन्तलाभदम् ॥ २९ ॥

यस्तनोति वरपौषधशालां, सर्वसिद्धिललनावरमालाम् ।
सर्वदैव लभते सुविशालां, बोधिबीजकमलां विमलां सः ॥ ३० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पापनिष्कन्दनं धर्मसदनं कारयन्ति ये ।
तारयन्ति भवाब्धेः स्वं, ते जनाः कुलतेजनाः ॥ ३१ ॥

कारयन्ति नरा धन्या, भावात्पौषधशालिकाम् ।
संसारसागरं तीर्त्वा, ते लभन्ते परं पदम् ॥३२ ॥

अङ्गुष्ठमानमपि यः प्रकरोति बिम्बं,
वीरावसानवृषभादि जिनेश्वराणाम् ।
स्वर्गे प्रधानविपुलर्द्धिसुखानि भुङ्क्त्वा
पश्चादनुत्तरगतिं समुपैति धीरः ॥ ३३ ॥

भो भव्याः ! भवभीमसागरगतैर्मानुष्यदेशादिका
सामग्री न सुखेन लभ्यत इति प्रायः प्रतीतं सताम् ।
तद्युष्माभिरिमां पुरातनशुभैरापाद्य सद्योऽनघां,
सर्वज्ञप्रतिमादिके प्रतिदिनं धर्मे कुरुध्वं मनः ॥ ३४ ॥

पूइज्जइ जिणपडिमा निच्चं भव्वेहिं जेहिं कारविआ ।
वड्ढेइ तेसिं पुण्णं कलंतरेणं व धणनिवहो ॥ ३५ ॥

जो कारवेइ पडिमं जिणाण जिअरागदोसमोहाणं ।
सो पावइ अन्नभवे सुहजणयं धम्मवररयणं ॥ ३६ ॥

पित्तलसुवण्णरुप्पयरयणेहिं चन्दकन्तमाईहिं ।
जो कारवेइ जिणवरपडिमं सो पावए मुक्खं ॥ ३७ ॥

सन्मृत्तिकामलशिलातलदारुरूप्य-
सौवर्णरत्नमणिचन्दनचारुबिम्बम् ।
कुर्वन्ति जैनमिह ये स्वधनानुरूपं,
तेऽप्यामरीं च शिवसम्पदमाप्नुवन्ति ॥ ३८ ॥

काराप्य प्रतिमां जैनीं, पूजयन्तीह चानिशम् ।
ये जनास्ते द्रुतं पूज्या, भवन्ति महतामपि ॥ ३९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ये लेखयन्ति जिनशासनपुस्तकानि,
व्याख्यानयन्ति च पठन्ति च पाठयन्ति ।
शृण्वन्ति रक्षणविधौ च समाद्रियन्ते,
ते देवमर्त्यशिवशर्म नरा लभन्ते ॥ ४० ॥

लेखयन्ति नरा धन्या, ये जैनागमपुस्तकान् ।
ते सर्ववाङ्मयं ज्ञात्वा, सिद्धिं यान्ति न संशयः ॥ ४१ ॥

नाणं नियमग्गहणं नवकारो नयरुई अ निट्ठा य ।
पञ्चनयविभूसिआणं न दुल्लहा सुगई लोए ॥ ४२ ॥

रत्नेषु चिन्तामणिरत्र यद्वत्सारस्तरूणामिव कल्पवृक्षः ।
देवेषु सर्वेस्वपि वीतरागस्तद्वत्सुपात्रेषु सुसाधुसङ्घः ॥ ४३ ॥

पुत्रजन्मविवाहादिमङ्गलानि गृहे गृहे ।
परं भाग्यवतां पुंसां श्रीसङ्घार्चादिमङ्गलम् ॥ ४४ ॥

अर्हतामपि मान्योऽयं, पूज्यः पुण्यवतामपि ।
सेव्यः सुरासुरेशानां, सङ्घः पूज्यस्ततो बुधैः ॥ ४५ ॥

यः संसार निरासलालसमतिर्मुक्त्यर्थमुत्तिष्ठते,
यं तीर्थं कथयन्ति पावनतया येनास्ति नान्यः समः ।
यस्मै तीर्थपतिर्नमस्यति सतां यस्माच्छुभं जायते,
स्फूर्तिर्यस्य परा वसन्ति च गुणा यस्मिन् स सङ्घोऽर्च्यताम् ॥ ४६ ॥

रत्नानामिव रोहणः क्षितिधरः खं तारकाणामिव,
स्वर्गः कल्पमहीरुहामिव सरः पङ्केरुहाणामिव ।
पाथोधिः पयसां शशीव महसां स्थाने गुणानामसा-
वित्यालोच्य विरच्यतां भगवतः सङ्घस्य पूजाविधिः ॥ ४७ ॥

कल्पोर्वीरुहसंततिस्तदजिरे चिन्तामणिस्तत्करे
श्लाघ्या कामदुघानघा च सुरभी तस्यावतीर्णा गृहे ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रैलोक्याधिपतित्वसाधनसहा श्रीस्तन्मुखं वीक्षते
सङ्घो यस्य गृहाङ्गणं गुणनिधिः पादैः समाक्रामति ॥ ४८ ॥

साधर्मिकाणां वात्सल्यं, भोजनाच्छादनादिभिः ।
यस्तनोति नरो भावात्, तज्जन्म सफलं भवेत् ॥ ४९ ॥

सिद्धिपुरन्ध्रीवरणं, श्रावकधर्मश्रियो वराभरणम् ।
कृतजिनमतसाफल्यं, रचयत साधर्मिकेषु वात्सल्यम् ॥ ५० ॥

जिनभक्तिः कृता तेन, शासनस्योन्नतिस्तथा ।
साधर्मिकेषु वात्सल्यं, कृतं येन सुबुद्धिना ॥ ५१ ॥

चक्रे तेन जिनार्चनं स विदधे सम्यग्गुरूपासनं
तत्त्वं तेन जिनागमस्य विदितं सङ्घोन्नतिं स व्यधात् ।
सत्यंकारितमेव तेन सुधिया निर्वाणसौख्यं जवाद्
यःसाधर्मिकगौरवं वितनुते हृष्टो गुरूणामिव ॥ ५२ ॥

जिनौकः पौषधौकश्च, जैनागमसुलेखनम् ।
साधौ साधर्मिके भक्ति कुर्वन्नल्पभवो भवेत् ॥ ५३ ॥

पूजया पूर्यते सर्वं, पूज्यो भवति पूजया ।
ऋद्धिवृद्धिकरी पूजा, पूजा सर्वार्थसाधनी ॥ ५४ ॥

जो पूएइ तिसंझं जिणंदरायं तहा विगयरायं ।
सो तईअभवे सिज्झइ अहवा सत्तट्ठमे जम्मे ॥ ५५ ॥

पुष्पाद्यर्चा तदाज्ञा च, तद्द्रव्यपरिरक्षणम् ।
उत्सवास्तीर्थयात्रा च, भक्तिः पञ्चविधा जिने ॥ ५६ ॥

सयं पमज्जणे पुण्णं, सहस्सं च विलेवणे ।
सयसाहस्सीआ माला, अणंतं गीयवाइअं ॥ ५७ ॥

अंगग्गभावभेया पुप्फाहारथुईहिं पूअतिगं ।
पंचुवयारा अट्ठुवयारा सव्वोवयारा वा ॥ ५८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुष्पैर्गन्धैर्बहुपरिमलैरक्षतैर्धूपदीपैः
सन्नैवेद्यैः शुभफलगणैर्वारिसम्पूर्णपात्रैः ।
कुर्वाणास्ते जगदधिपतेरर्चनामष्टभेदां
सर्वाशंसारहितमतयो विश्ववन्द्या भवन्ति ॥ ५९ ॥

पूअइ जो जिणचंदं, तिण्णि वि सञ्झासु पवरकुसुमेहिं ।
सो पावइ सुरसुक्खं, कम्मेण मुक्खं सया सुक्खं ॥ ६० ॥

अंगं गंधसुअंधं, वण्णं रुवं सुहं च सोहग्गं ।
पावइ परमपयं पिहु पुरिसो जिणगंधपूआए ॥ ६१ ॥

अक्खण्डफुडिअचुक्खक्खएहिं पुञ्जत्तयं जिणंदस्स ।
पुरओ नरा कुणन्ता पावन्ति अखण्डियसुहाइं ॥ ६२ ॥

मयणाभिचन्दणागुरुकप्पूरसुअन्धगन्धधूवेहिं ।
पूअइ जो जिणचन्दं पूइज्जइ सो सुरिन्देहिं ॥ ६३ ॥

जो देइ दीवयं जिणवरस्स भवणम्मि परमभत्तीए ।
सो निम्मलबुद्धिधरो, रमइ नरो सुरविमाणेसु ॥ ६४ ॥

ढोअइ बहुभत्तिजुओ नेवज्जं जो जिणंदचंदाणं ।
भुंजइ सो वरभोए, देवासुरमणुअनाहाणं ॥ ६५ ॥

वरतरुपवरफलाइं, ढोयइ जो जिणवरस्स भत्तीए ।
जम्मंतरे वि सहला, जायंति मणोरहा तस्स ॥ ६६ ॥
ढोयइ जो जलभरिअं, कलसं भत्तीइ वीयरायाणं ।
सो पावइ परमपयं, सुपसत्थं भावसुद्धीए ॥ ६७ ॥

मनोवाक्कायवस्त्रोर्वीपूजोपकरणस्थितौ ।
शुद्धिः सप्तविधा कार्या, श्रीजिनेन्द्रार्चनक्षणे ॥ ६८ ॥

संसारपारगं वीतरागं मुक्तिसुखप्रदम् ।
चम्पकादिकविस्तीर्णकुसुमैः पूजयेद् बुधः ॥ ६९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वस्त्रैर्वस्त्रविभूतयः शुचितरालङ्कारतोऽलङ्कृतिः,
पुष्पैः पूज्यपदं सुगन्धतनुता गन्धैर्जिने पूजिते ।
दीपैर्ज्ञानमनावृतं निरुपमा भोगाश्च रत्नादिभिः
सन्त्येतानि किमद्भुतं शिवपदप्राप्तिस्ततो देहिनाम् ? ॥ ७० ॥

जिनस्य पूजनं हन्ति, प्रातः पापं निशाभवम् ।
आजन्मविहितं मध्ये, सप्तजन्मकृतं निशि ॥ ७१ ॥

स्वर्गस्तस्य गृहाङ्गणं सहचरी साम्राज्यलक्ष्मीः शुभा,
सौभाग्यादिगुणावलिर्विलसति स्वैरं वपुर्वेश्मनि ।
संसारः सुतरः शिवं करतलक्रोडे लुठत्यञ्जसा,
यः श्रद्धाभरभाजनं जिनपतेः पूजां विधत्ते जनः ॥ ७२ ॥

जिनपूजनं जनानां, जनयत्येकमपि सम्पदो विपुलाः ।
जलमिव जलदविमुक्तं, काले शस्यश्रियो, ह्यखिलाः ॥ ७३ ॥

यद्भक्तिः सर्वज्ञे यद्यत्नस्तत्प्रणीतसिद्धान्ते ।
यद्वन्दना यतीनां फलमेतज्जीवितव्यस्य ॥ ७४ ॥

एकैव हि जिनपूजा दुर्गतिगमनं नृणां निवारयति ।
प्रापयति श्रियमखिलामामुक्तेर्भक्तितो विहिता ॥ ७५ ॥

फलं पूजाविधातुः स्यात्सौभाग्यं जनमान्यता ।
ऐश्वर्यं रूपमारोग्यं, स्वर्गमोक्षसुखान्यपि ॥ ७६ ॥

यः पुष्पैर्जिनमर्चति स्मितसुरस्त्रीलोचनैः सोऽर्च्यते,
यस्तं वन्दत एकशस्त्रिजगता सोऽहर्निशं वन्द्यते ।
यस्तं स्तौति परत्र वृत्रदमनस्तोमेन स स्तूयते,
यस्तं ध्यायति क्लृप्तकर्मनिधनः स ध्यायते योगिभिः ॥ ७७ ॥

नौरेषा भववारिधौ शिवपदप्रासादनिःश्रेणिका ।
मार्गः स्वर्गपुरस्य दुर्गतिपुरद्वारप्रवेशार्गला



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्मग्रन्थिशिलोच्चयस्य दलने दम्भोलिधारासमा।
कल्याणैकनिकेतनं निगदिता पूजा जिनानां परा ॥ ७८ ॥

नेत्रानन्दकरी भवोदधितरी श्रेयस्तरोर्मञ्जरी,
श्रीमद्धर्ममहानरेन्द्रनगरी व्यापल्लताधूमरी।
हर्षोत्कर्षशुभप्रभावलहरी भावद्विषां जित्वरी,
पूजा श्रीजिनपुङ्गवस्य विहिता श्रेयस्करी देहिनाम् ॥ ७९ ॥

दर्शनाद् दुरितध्वंसी वन्दनाद्वाञ्छितप्रदः।
पूजनात् पूरकः श्रीणां, जिनः साक्षात्सुरद्रुमः ॥ ८० ॥

पापं लुम्पति दुर्गतिं दलयति व्यापादयत्यापदं,
पुण्यं सञ्चिनुते श्रियं वितनुते पुष्णाति नीरोगताम्।
वैराग्यं विदधाति पल्लवयति प्रीतिं प्रसूते यशः,
स्वर्गं यच्छति निर्वृतिं च रचयत्यर्चार्हतां निर्मिता ॥ ८१ ॥

यान्ति दुष्टदुरितानि दूरतः कुर्वते सपदि सम्पदः पदम्।
भूषयन्ति भुवनानि कीर्तयः, पूजया विहितया जगद्गुरोः ॥ ८२ ॥

श्रीमज्जिनेन्द्रपदपङ्कजपूजनेन,
ज्ञानक्रियाकलितसद्गुरुसेवनेन।
स्वाध्यायसंयमतपोविनयादिना च,
कस्यापि पुण्यपुरुषस्य दिनानि यान्ति ॥ ८३ ॥

वरपूजया जिनानां, धर्मश्रवणेन सुगुरुसेवनया।
शासनभासनयोगैः सृजन्ति सफलं निजं जन्म ॥ ८४ ॥

जिनबिम्बार्चनं सेवा, गुरूणां प्राणिनां दया।
शमो दानं तपः शीलमेष धर्मो जिनोदितः ॥ ८५ ॥

जिनभवनं जिनबिम्बं, जिनपूजां जिनमतं च यः कुर्यात्।
तस्य नरामरशिवसुखफलानि करपल्लवस्थानि ॥ ८६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूआ पच्चक्खाणं पडिक्कमणं पोसहो परुवयारो
पञ्च पयारा जस्स उ न पयारो तस्स संसारे ॥ ८७ ॥

उपसर्गाः क्षयं यान्ति, छिद्यन्ते विघ्नवल्लयः ।
मनः प्रसन्नतामेति, पूज्यमाने जिनेश्वरे ॥ ८८ ॥

पूजाकोटिसमं स्तोत्रं, स्तोत्रकोटिसमो जपः ।
जपकोटिसमं ध्यानं, ध्यानकोटिसमो लयः ॥ ८९ ॥

संसाराम्भोधिबेडा शिवपुरपदवी दुर्गदारिद्र्यभूभृद्,
भङ्गे दम्भोलिभूता सुरनरविभवप्राप्तिकल्पद्रुकल्पा ।
दुःखाग्नेरम्बुधारा सकलसुखकरी रूपसौभाग्यभर्त्री,
पूजा तीर्थेश्वराणां भवतु भवभृतां सर्वकल्याणकर्त्री ॥ ९० ॥

ये देवं स्नपयन्ति शाम्यतितमां तेषां रजः कर्मणां,
ये नाथं परिपूजयन्ति जगतः पूज्या भवन्त्येव ते ।
माङ्गल्यानि जिनस्य ये विदधते तद्विघ्ननाशो भवेत्,
पादाब्जे प्रणमन्ति ये भगवतस्ते वन्दनीयाः सताम् ॥ ९१ ॥

गन्धैश्चारुविलेपनैः सुकुसुमैर्धूपैरखण्डाक्षतै-
र्दीपैर्भोज्यवरैर्विभूषणगणैर्वस्त्रैर्विचित्रैः फलैः ।
नानावर्णसुवर्णपूर्णकलशैः स्तोत्रैश्च गीतादिभिः
पूजां पूज्यपदस्य केऽपि कृतिनः कुर्वन्ति सौख्यावहाम् ॥ ९२ ॥

संवच्छरचाउम्मासिएसु अट्ठाहिआसु अ तिहीसु ।
सव्वायरेण लग्गइ जिणवरपूआतवगुणेसु ॥ ९३ ॥

अष्टाह्निकादिमहिमां जिनपुङ्गवानां
कुर्वन्ति ये सुकृतिनः कृतिनः सुभक्त्या ।
कर्माष्टकं जगति ते हि भवाष्टकस्य,
मध्ये विधूय शिवदं शिवधाम यान्ति ॥ ९४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिणाणं पूअजत्ताओ, साहूणं पज्जुवासणे ।
आवस्सयम्मि सज्झाए, उज्जमेह दिणे दिणे ॥ ९५ ॥

देवपूजा दया दानं, दाक्षिण्यं दमदक्षते ।
यस्यैते षट् दकाराः स्युः स देवांशी नरः स्मृतः ॥ ९६ ॥

पूज्यपूजा दया दानं, तीर्थयात्रा जपस्तपः
श्रुतं परोपकारश्च, मर्त्यजन्मफलाष्टकम् ॥ ९७ ॥

देवपूजा गुरूपास्तिः, स्वाध्यायः संयमस्तपः ।
दानं चेति गृहस्थानां, षट्कर्माणि दिने दिने ॥ ९८ ॥

देवं श्रेणिकवत्प्रपूजय गुरुं वन्दस्व गोविन्दवत्
दानं शीलतपः प्रसङ्ग सुभगां चाभ्यस्य सद्भावनाम् ।
श्रेयांसश्च सुदर्शनश्च भगवानाद्यः स चक्री यथा
धर्मे कर्मणि कामदेववदहो ! चेतश्चिरं स्थापय ॥ ९९ ॥

जिनपूजनं विवेकः सत्यं शौचं सुपात्रदानं च ।
महिमक्रीडागारः शृङ्गारः श्रावकत्वस्य ॥ १०० ॥

पूआ जिणाण आणं वित्ती साहम्मिआण वच्छल्लं ।
सीलं परोवयारो विवेगतरुपल्लवा एए ॥ १०१ ॥

पूजामाचरतां जगत्त्रयपतेः सङ्घार्चनं कुर्वतां,
तीर्थानामभिवन्दनं विदधतां जैनं वचः शृण्वताम् ।
सद्दानं ददतां तपश्च चरतां सत्त्वानुकम्पाकृतां,
येषां यान्ति दिनानि जन्म सफलं तेषां सुपुण्यात्मनाम् ॥ १०२ ॥

वन्द्यास्तीर्थकृतः सुरेन्द्रमहिताः पूजां विधायामलां
सेव्याः सन्मुनयश्च पूज्यचरणाः श्रव्यं च जैनं वचः
सच्छीलं परिपालनीयमतुलं कार्यं तपो निर्मलं,
ध्येया पञ्चनमस्कृतिश्च सततं भाव्या च सद्भावना ॥ १०३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्तव्यं जिनवन्दनं विधिपरैर्हर्षोल्लसन्मानसैः
सच्चारित्रविभूषिताः प्रतिदिनं सेव्याः सदा साधवः ।
श्रोतव्यं च दिने दिने जिनवचो मिथ्यात्वनिर्नाशनं,
दानादौ व्रतपालने च सततं कार्या रतिः श्रावकैः ॥ १०४ ॥

दया दीनेषु वैराग्यं, विधिवज्जिनपूजनम् ।
विशुद्धा न्यायवृत्तिश्च, पुण्यं पुण्यानुबन्ध्यदः ॥ १०५ ॥

भक्तिर्जिनेषु दृढता गुरुभाषितेषु
श्रद्धा च धर्मकरणेषु गुणेषु रागः ।
दानेषु तीव्ररुचिता विनयेषु वृत्तिः
कस्यापि पुण्यपुरुषस्य भवन्त्यवश्यम् ॥ १०६ ॥

वपुः पवित्रीकुरु तीर्थयात्रया, चित्तं पवित्रीकुरु धर्मवाञ्छया ।
वित्तं पवित्रीकुरु पात्रदानतः, कुलं पवित्रीकुरु सच्चरित्रैः ॥ १०७ ॥

यात्रायां किल संचरन्ति कृतिनः पञ्चेन्द्रियाणां यमं
कृत्वा दानपरायणाः शुभधियः पित्रोः पदाराधनाः ।
तत्पादोत्थितधूलिमप्यगतिकाः श्लिष्यन्ति मोक्षार्थिनः
तेषां पुण्यमिति स वेत्ति भगवान् सर्वज्ञ एव स्वयम् ॥ १०८ ॥

सदा शुभध्यानमसारलक्ष्म्याः फलं चतुर्धा सुकृताप्तिरुच्चैः ।
तीर्थोन्नतिस्तीर्थकृतां पदाप्तिर्गुणा हि यात्राप्रभवाः स्युरेते ॥ १०९ ॥

श्रीतीर्थपान्थरजसा विरजीभवन्ति,
तीर्थेषु बम्भ्रमणतो न भवे भ्रमन्ति ।
द्रव्यव्ययादिह नराः स्थिरसम्पदः स्युः,
पूज्या भवन्ति जगदीशमथार्चयन्तः ॥ ११० ॥

एअं जम्मस्स फलं सारं विहवस्स इत्तियं चेव ।
जं अच्चिज्जइ गंतुं सित्तुंजे रिसहतित्थयरो ॥ १११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सद्द्रव्यं सत्कुले जन्म, सिद्धक्षेत्रं समाधयः ।
सङ्घश्चतुर्विधो लोके, सकाराः पञ्च दुर्लभाः ॥ ११२ ॥

तैश्चन्द्रे लिखितं स्वनाम विशदं धात्री पवित्रीकृता
ते वन्द्याः कृतिनः सतां सुकृतिनो वंशस्य ते भूषणम् ।
ते जीवन्ति जयन्ति भूरिविभवास्ते श्रेयसां मन्दिरं
सर्वाङ्गैरपि कुर्वते विधिपरा ये तीर्थयात्रामिमाम् ॥ ११३ ॥

तीर्थे यात्रा विधेया निजकरकमलैः पूजनीया जिनेन्द्रा
आदेशाः श्रोत्रपेयाः सगुणगणभृतां जन्तवश्चानुकम्प्याः ।
देयं पात्रेषु दानं सुकृतिजनशुभा संगतिः साधु कार्या
मोक्षश्रीरिष्यतीत्थं विधिवदिह जनाः कुर्वतां पश्यतां च ॥ ११४ ॥

तैरात्मा सुपवित्रितो निजकुलं तैर्निर्मलं निर्मितं,
तैः संसारमहान्धकूपपततां हस्तावलम्बो ददे ।
लब्धं जन्मफलं कृतं च कुगतिद्वारैकसंरोधनं,
ये शत्रुञ्जयमुख्यतीर्थनिवहे यात्रासु क्लृप्तोद्यमाः ॥ ११५ ॥

संसारेऽसुमता नरामरभवाः प्राप्ताः श्रियोऽनेकशः
कीर्तिस्फूर्तिमदर्जितं च शतशः साम्राज्यमप्यूर्जितम् ।
स्वाराज्यं बहुधा सुधाभुजचयाराध्यं समासादितं
लेभे पुण्यमयं कदापि न पुनः संघाधिपत्यं पदम् ॥ ११६ ॥

यत्कल्याणकरोऽवतारसमयः स्वप्नानि जन्मोत्सवे ।
यद्रत्नादिकवृष्टिरिन्द्रविहिता यद्रूपराज्यश्रियः ॥ ११७ ॥

यद्दानं व्रतसम्पदुज्ज्वलतरा यत्केवलश्रीर्नवा,
यद्रम्यातिशया जिने तदखिलं धर्मस्य विस्फुर्जितम् ॥ ११८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आधारो यस्त्रिलोक्या जलधिजलधराऽर्केन्दवो यन्नियोज्या
भूज्यन्ते यत्प्रसादादसुरसुरनराधीश्वरैः संपदस्ताः ।
आदेश्या यस्य चिन्तामणिसुरसुरभीकामकुम्भादिभावाः
श्रीमज्जैनेन्द्रधर्मः किसलयतु स वः शाश्वतीं सौख्यलक्ष्मीम्॥ ११९ ।

आरोग्यं सौभाग्यं, धनाढ्यता नायकत्वमानन्दः
कृतपुण्यस्य स्यादिह सदा जयो वाञ्छितावाप्तिः ॥ १२० ॥

दिने दिने मञ्जुलमङ्गलावलिः, सुसम्पदः सौख्यपरम्परा च ।
इष्टार्थसिद्धिर्बहुला च बुद्धिः, सर्वत्र सिद्धिर्भवति हि धर्मात् ॥ १२१ ॥

पुंसां शिरोमणीयन्ते, धर्मार्जनपरा नराः ।
आश्रीयन्ते च सम्पद्भिर्लताभिरिव पादपाः ॥ १२२ ॥

लज्जातो भयतो वितर्कवशतो मात्सर्यतः स्नेहतो
लोभादेव हठाभिमानविनयशृङ्गारकीर्त्यादितः ।
दुःखात् कौतुकविस्मयव्यवहतेर्भावात् कुलाचारतो
वैराग्याच्च भजन्ति धर्ममसमं तेषाममेयं फलम् ॥ १२३ ॥

फलं च पुष्पं सुतरुस्तनोति, वित्तं च तेजश्च नृपप्रसादः ।
ऋद्धिं प्रसिद्धिं तनुते सुपुत्रो, भुक्तिं च मुक्तिं च जिनेन्द्रधर्मः १२४ ॥

राजप्रसादो दिव्यास्त्रं, वाणिज्यं हस्तिरत्नयोः ।
जैनधर्मस्तथैकोऽपि, महालाभाय जायते ॥ १२५ ॥

अतिनिर्मला विशाला, सकलजनानन्दकारिणी प्रवरा ।
कीर्तिर्विद्या लक्ष्मीर्धर्मेण विजृम्भते लोके ॥ १२६ ॥

सुकुलजन्म विभूतिरनेकधा, प्रियसमागमसौख्यपरम्परा ।
नृपकुले गुरुता विमलं यशो, भवति धर्मतरोः फलमीदृशम् ॥ १२७ ॥

धर्मो महामङ्गलमङ्गभाजां, धर्मः पिता पूरितसर्वकामः ।
धर्मो जनन्युद्दलिताखिलार्तिः धर्मः सुहृद्वर्धितनित्यहर्षः ॥ १२८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बुद्धेः फलं तत्त्वविचारणं च, देहस्य सारं व्रतधारणं च।
अर्थस्य सारं किल पात्रदानं, वाचः फलं प्रीतिकरं नराणाम् ॥ १२९ ॥

पूर्वमुनिपतिविरचिताः

## ॥ धर्मोपदेशश्लोकाः ॥

धर्मद्रङ्गद्वारभूतं सम्यक्त्वं लभते गृही।
धनसार्थेशवद् दानात् तीर्थकृत्कर्म चार्जयेत् ॥ १ ॥

दत्तं दानं सुपात्रेषु बहुमानपुरस्सरम्।
भवेदनन्तफलदं निर्णयाच्छालिभद्रवत् ॥ २ ॥

पात्रदानमसमानहर्षतो यद्वितीर्णमपरत्र लभ्यते।
तत्र चित्रकरमत्र यल्ललौ मूलदेवनृपतिश्च तत्फलम् ॥ ३ ॥

समये सत्यपि प्राणी सुपात्रं पोषयन् सुखी।
अपोषयंश्च दुःखी स्याद् यथा तद्धन-निर्द्धनौ ॥ ४ ॥

नेयो व्ययाद्यैः सार्थक्यमर्थोऽनर्थकरो यतः।
तनयानामिव क्ष्मापामात्यश्रेष्ठिपुरोधसाम् ॥ ५ ॥

दानं दद्याद् यथाशक्ति निःश्रेयसनिबन्धनम्।
सुपात्रेषु गृही श्रीमान् श्रेयांस इव सिद्धये ॥ ६ ॥

लक्ष्म्याः सारमसारायाः सुधीर्दानं समुद्धरेत्।
कृपणत्वं परित्यज्याऽन्यथा सङ्कलवद् भवेत् ॥ ७ ॥

वल्लभं सर्वदानेभ्योऽभयदानं शरीरिणाम्।
चौरस्येव ततस्तस्मिन् यतनीयं हितैषिभिः ॥ ८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रशस्यः स्यात् सुरेन्द्राणां प्राणी भूताभयप्रदः ।
इव पारावतत्राता श्रीशान्तिः पूर्वजन्मनि ॥ ९ ॥

परदारपरित्याग-ब्रह्मचर्यं य आचरेत् ।
स कष्टान्मुच्यते तत्र सुदर्शननिदर्शनम् ॥ १० ॥

स्युः पाणिपल्लवस्थानि स्वर्गसौख्यानि देहिनाम् ।
कष्टानि च क्षयं यान्ति सीताया इव शीलतः ॥ ११ ॥

अतिघोरतपःकर्मानुष्ठानेभ्योऽपि दुष्करम् ।
पालयन् ब्रह्मचर्यं स्यात् प्रशस्यः स्थूलभद्रवत् ॥ १२ ॥

कार्यं विवेकिनाऽवश्यं निजसामर्थ्यतस्तपः ।
वन्द्यः स्याद्धरिकेशीव निष्कुलोऽपि हि नाकिनाम् ॥ १३ ॥

दुःख-दारिद्र्य-दौर्भाग्य-दारुपुञ्जदवानलम् ।
तप्तं तपो मनोऽभीष्टं साधयेन्नन्दिषेणवत् ॥ १४ ॥

पञ्चेन्द्रियवधाद्युग्र-क्रूरकर्मकरोऽपि सन् ।
तपःप्रभावात् सुदृढ-प्रहारीव शिवं व्रजेत् ॥ १५ ॥

भव्यो लभेत भावेन शिवशर्माणि निर्ण्णयात् ।
इलाचीनन्दन इव परिग्रहधरोऽपि सन् ॥ १६ ॥

मुक्तिपद्धतिपाथेयं शुभभावं दधत् सुधीः ।
मरुदेवास्वामिनीव श्रीयते निर्वृतिश्रिया ॥ १७ ॥

देहिनः साधुसंसर्गात् क्षणमात्रं कृतादपि ।
सद्धर्मसम्मुखीनाः स्युर्यथा सेचनकद्विपः ॥ १८ ॥

सुधीर्धर्मिष्ठसंसर्गं धर्मार्थी विदधीत यः ।
स भवेद् धर्मलाभाय श्रीमदार्द्रकुमारवत् ॥ १९ ॥

भवेद् भावनया हीनमर्हद्दर्शनमङ्गिनाम् ।
भवान्तरेऽपि बोधाय कमलश्रेष्ठिपुत्रवत् ॥ २० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्हतः प्रतिमामच्र्यां पूजयन् परमार्हतः ।
कुमारपालक्ष्मापाल इव सम्पदमश्नुते ॥ २१ ॥

स्वल्पादप्यागमवचःश्रवणात् क्षणमात्रतः ।
चिलातीनन्दनस्येव भवेद् बोधः सुमेधसाम् ॥ २२ ॥

विनश्वरौदारिकस्यासारस्य वपुषः फलम् ।
तपःपरोपकारादि गृह्णीयात् तुर्यचक्रिवत् ॥ २३ ॥

यथाशक्ति ग्लानसाधुवैयावृत्त्यादिभक्तितः ।
श्रमणी पुष्पचूलेव लभते परमं पदम् ॥ २४ ॥

अर्हच्चैत्यादिभक्त्यर्थं जीवः कष्टान्यपि क्षमेत् ।
अष्टापदार्थं सगरचक्रिणस्तनया इव ॥ २५ ॥

दद्याद् भागवती भक्तिः पदवीं परमेष्ठिनः ।
एकाऽपि भावतः क्लृप्ता कूणिक्षोणिपतेरिव ॥ २६ ॥

आर्यः कुर्याद् धर्मरागमस्थिमज्जाधिवासितम् ।
अभेद्यं तस्करक्लृप्त-नारीकार्मणवद् दृढम् ॥ २७ ॥

सुखाभिलाषी कस्यापि न कुर्यादन्तरायकम् ।
दुर्विपाकस्तदुदयो ढण्ढणाङ्गजवद् भवेत् ॥ २८ ॥

श्रामण्यसारभूतायाः समतायाः प्रभावतः ।
संसारपारगामी स्याच्छरीरी कूरगट्ट(ड्डु)वत् ॥ २९ ॥

ज्वालाजिह्वं जलेनेव क्रोधं शमयता तथा ।
निर्वापयेत् परस्यापि चण्डरुद्रस्य शिष्यवत् ॥ ३० ॥

वार्द्धक्येऽपि विधातव्यो धीमताऽध्ययनोद्यमः ।
यत्प्रसादं ददौ ब्राह्मी सूरेः श्रीवृद्धवादिनः ॥ ३१ ॥

पठनायोद्यमः कार्यो धर्मतः स्खलितोऽपि यत् ।
पठितः स्थानमागच्छेच्छ्रीरत्नाकरसूरिवत् ॥ ३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्मितः फलदोऽल्पोऽपि नियमः स्थिरचेतसाम् ।
ग्रन्थिमात्रकृतप्रत्याख्याने यक्षकपर्द्दिवत् ॥ ३३ ॥

इहापि फलदायी स्यान्नियमो वङ्कचूलवत् ।
निजसामर्थ्यतस्तस्माद् गृह्णीयात्तं महामतिः ॥ ३४ ॥

यः कश्चिदपि कर्तव्यो नियमो धर्ममिच्छुना ।
यदिहापि फलप्राप्त्यै कमलश्रेष्ठिवद् भवेत् ॥ ३५ ॥

असह्यान्यपि कष्टानि शरीरी क्षमतेतराम् ।
क्षमाकवचसंनद्धः सुकोशलमुनिर्यथा ॥ ३६ ॥

कोपं न कुर्यान्निर्वाण-मार्गलुण्टाकपोषकम् ।
कुणालानगरीकायोत्सर्गिक्षपकयोर्यतः ॥ ३७ ॥

क्रोधोद्धता मत्सरिणो मत्स्या इव परस्परम् ।
नरकं यान्ति निघ्नन्तः सत्त्वान् रामसुभूमवत् ॥ ३८ ॥

कोपोऽग्निरिव सद्वस्तु पित्राद्यपि प्रतापयेत् ।
यथा कूणिनृपेणात्र हतः श्रेणिकभूपतिः ॥ ३९ ॥

पुराकृतानां पुण्यानां प्रभावादापदाऽप्यहो ।
पराभवति नो जन्तूञ्छिशुत्वे कृष्णविष्णुवत् ॥ ४० ॥

जन्तूद्धरणबुद्धींश्च श्रमणांश्च महात्मनः ।
दुष्टात्मा पीडयन् पीडां लभते नमुचिर्यथा ॥ ४१ ॥

धर्मोपदेशो दातव्यः सुधिया बोधहेतवे ।
जितशत्रुक्षितिपतिर्यथाऽमात्यसुबुद्धिना ॥ ४२ ॥

वदेत् सदुपदेशं तु चण्डस्यापि महामतिः ।
कदाचिदपि शान्त्यै स्याद् हरिभद्रगणीन्द्रवत् ॥ ४३ ॥

उपस्थितोऽपि प्रत्यूहो जन्तूनां निष्फलो भवेत् ।
धर्मकर्मप्रभावेण ज्ञानगर्भप्रधानवत् ॥ ४४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्माधर्मफलं नान्यो दर्शयेद् गुरुमन्तरा ।
प्रदेशिनृपवज्जन्तुं निरयाद् गुरुरुद्धरेत् ॥ ४५ ॥

पालकस्येव नो जन्तोः फलदं द्रव्यवन्दनम् ।
इहापि फलदा भाव-नतिः शाम्बकुमारवत् ॥ ४६ ॥

अभव्यो निर्दयः क्रूरः कुर्वाणो नैव शङ्कते ।
अकार्यं वार्यमाणोऽपि कुबुद्धिः पालको यथा ॥ ४७ ॥

निरपराधान् व्यसनी जन्तून् व्यापादयन् जनः ।
अवश्यं नरकं गच्छेद् यथा कालकसूरिकः ॥ ४८ ॥

आसादयेन्मुक्तिशर्म विषयान् विषसंनिभान् ।
त्यजञ्जीवोऽन्यथा स्वर्ण-कारवद् दुर्गतिं व्रजेत् ॥ ४९ ॥

अनन्तफलदं धर्मं त्यक्त्वाऽज्ञानतपो जनः ।
कुर्वन् नाडिन्धम इव पश्चात्तापं समाचरेत् ॥ ५० ॥

अनाथिश्रमणस्येव भवेत् सद्धर्मकर्मणः ।
मनोरथोऽपि जन्तूनां नानार्तिच्छेदकः क्षणात् ॥ ५१ ॥

साधयेद् दृढधर्माऽऽस्थाऽत्रापि चिन्तितमुच्चकैः ।
राजताडवनी जाता कुमारनृपतेरिव ॥ ५२ ॥

धर्मादेव विलीयेत जरामरणजन्मभीः ।
अपि यत्नशतैर्नान्यैरिभ्यस्येव यमार्चितुः ॥ ५३ ॥

नन्दिषेण इवावश्यं भोग्यकर्माणि देहिनम् ।
अनिच्छुमपि भोगेच्छुं कुर्वन्ति क्षणमात्रतः ॥ ५४ ॥

निरूपयन्नागमार्थ-मप्युत्सूत्रं प्ररूपयन् ।
परिभ्रमति संसारं कमलप्रभसूरिवत् ॥ ५५ ॥

मनोऽभीष्टपदप्राप्त्यै प्रव्रज्याऽप्येकरात्रिकी ।
भवेदाराधिता सम्य-गवन्तिसुकुमालवत् ॥ ५६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समाराधितमव्यक्त-तयाऽपि चरणं शुचि ।
भवेदनन्तफलद-मिव सम्प्रतिभूपतेः ॥ ५७ ॥

निःसीमलोभपाथोधि-सेतुं सन्तोषमाचरेत् ।
यस्माद् भवेदसन्तोषी दुःखी सुभूमचक्रिवत् ॥ ५८ ॥

जगति दुर्गतिमूलनिबन्धनं, जिनवरैर्निरधारि परिग्रहः ।
तदभिघातनिमित्तमलोभतां, कपिलसाधुवदाश्रय सज्जन ! ॥ ५९ ॥

तृष्णापरम्परामद्य-पानव्यग्रमतिर्जनः ।
मुञ्छणश्रेष्ठिवद् घोरां, पृथ्वीं तमतमां व्रजेत् ॥ ६० ॥

अतिलोभं वितन्वानो नरो नरकमाप्नुयात् ।
अवाप्याकालमरणं सागरे सागरो यथा ॥ ६१ ॥

न स्याद् धर्माय योग्योऽतिलोभाकुलितमानसः ।
हितैषी तं त्यजेत्तेनान्यथा दुःखी कपिर्यथा ॥ ६२ ॥

लोभं त्यजेदमर्यादं तन्मर्यादां विवेकवान् ।
कुर्याद् येनातिलोभेन सिद्धिरन्धकतां गता ॥ ६३ ॥

सुखार्थी विरतिं कुर्याल्लाभाल्लोभो यदेधते ।
लोभी च शङ्खधमकवन्मूलमपि हारयेत् ॥ ६४ ॥

साधूनां दर्शनं बोधि-बीजलाभाय निर्मितम् ।
भवेन्नन्दनयुग्मस्य यथा भृगुपुरोधसः ॥ ६५ ॥

रूपयौवनवामाक्षी-भोगस्वजनसंपदः ।
गणयेत्तृणवत् प्राणी जम्बूस्वामीव धर्मधीः ॥ ६६ ॥

संसारसुखगृध्नुः सन् न कुर्याद् धर्ममार्हतम् ।
दुःखं मधुलवाऽऽकाङ्क्षी प्राणीव लभते हि सः ॥ ६७ ॥

धर्मार्थोपार्जनं प्राज्ञो यथावसरमाचरेत् ।
कृषीवल इव स्वीयं हारयेन्न द्वयं परम् ॥ ६८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्राताऽत्र न परत्रापि सुतादिरपि पिण्डदः ।
विना धर्मं यथा तातं प्रत्यभूत्र महेश्वरः ॥ ६९ ॥

ललिताङ्ग इव ज्ञात्वा विश्रं (षं) वैषयिकं सुखम् ।
न पुनः स्पृहयेच्छुद्ध-बुद्धिरात्महितार्थिकः ॥ ७० ॥

अभुञ्जानोऽपि भोगादीन् प्राणी दुर्ध्यानयोगतः ।
अधोगतिं व्रजेत् कोप-वान् राजगृहभिक्षुवत् ॥ ७१ ॥

धर्ममाराधयेद् बुद्ध्या संसारविमुखो बुधः ।
स्वजनैरननुज्ञातोऽप्यत्राऽभयकुमारवत् ॥ ७२ ॥

सद्गतिं लभते निन्दन् स्वकृतं दुष्कृतं सुधीः ।
मृगावती यथाऽवाप परमानन्दसम्पदम् ॥ ७३ ॥

नीचजातिं व्रजेज्जन्तुर्मेतार्य इव निश्चितम् ।
तन्वानो जात्यहङ्कारं दुरायतिनिबन्धनम् ॥ ७४ ॥

संसारापारकूपारेऽध्ययनस्मयमाचरन् ।
प्राणी परिभ्रमत्येव भृशं भुवनभानुवत् ॥ ७५ ॥

गुणश्रवणमात्रेण निरीहाणां महात्मनाम् ।
बोधं लभन्ते सुलभ-बोधिनः सार्थवाहवत् ॥ ७६ ॥

अपि यत्नशतैर्नैति क्षयं कर्म निकाचितम् ।
यथा श्रेणिकभूपेन नरकायुरुपार्जितम् ॥ ७७ ॥

हिंसा परस्य जीवस्य मनसाऽपि विचिन्तयन् ।
निहन्यते स दैवेनाऽकस्मादपि शृगालवत् ॥ ७८ ॥

हिंसा हि नरकद्वार दीपिका निर्मिता सती ।
सुताद्यर्थेऽपि देव्यग्रे छागहिंसकविप्रवत् ॥ ७९ ॥

स्वयमेवाप्नुयाद् दुःखं परद्रोहनिविष्टधीः ।
'धर्मे जय' इति ख्यातुरिव द्वेषी द्विजन्मनः ॥ ८० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न चिन्तयेत् परद्रोह-मात्मश्रेयोऽर्थिकः पुमान् ।
वध्वाः पपात यद्द्रोहः स्थविरायै विनिर्मितः ॥ ८१ ॥

वरं न परनिन्दायाः पापं तां कुर्वतः सतः ।
अकृतान्यन्यपापान्यागच्छन्ति जरतीमिव ॥ ८२ ॥

कपटी निष्कृपः प्राणी पीडयञ्श्रमणानपि ।
न लज्जते यथा श्राद्धो लघुक्षुल्लकविक्रयी ॥ ८३ ॥

अर्थलुब्धः पूर्णकार्यो विश्वस्तं प्राणिनं कुधीः ।
विभागिनं निहन्त्येव चाणक्य इव पर्वतम् ॥ ८४ ॥

वादिनो गर्वभाजोऽपि हितकर्यायतौ मतिः ।
सम्पूर्णपण्डितस्य स्यात् सिद्धसेनगणेरिव ॥ ८५ ॥

गणयंस्तृणवत् स्वर्ण-वर्णकायं निजव्रतम् ।
न त्यजेदुपसर्गेऽपि सति सागरचन्द्रवत् ॥ ८६ ॥

अकार्येऽपि स्वभर्तारं कलेर्मूलं मृगेक्षणा ।
प्रेरयेदिव हारादि-कृते कूणिनृपं प्रिया ॥ ८७ ॥

जानन्नपि त्यजेन्नैव दुरन्तां भोगलालसाम् ।
सार्वभौमब्रह्मदत्त इव पाश्चात्यजन्मनि ॥ ८८ ॥

गच्छतां शिवसदः शरीरिणा-मन्तरायकरणो भवेत्स्मयः ।
येन बाहुबलिवन्महात्मनां धर्मिणां सुजन ! तं ततस्त्यज ॥ ८९ ॥

उल्लङ्घयन् गुरोराज्ञां पश्चात्तापं समाचरेत् ।
उपकोश्यागृहप्राप्त-क्षमाश्रमणवद् दृढम् ॥ ९० ॥

समयोपस्थितं धर्ममकुर्वन् विषयस्पृहः ।
दुःखी स्यान्मृतमातङ्गाऽऽमिषार्थिद्विकवज्जडः ॥ ९१ ॥

नरत्वं दुर्लभं लब्ध्वा धर्माऽऽराधनकारणम् ।
प्राणी न गमयेद् व्यर्थं स्वरत्नं पुण्यसारवत् ॥ ९२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्युन्मालीव सद्विद्यां प्रमदाप्रेममोहितः ।
अहारयत्तथा नृत्वं हारयेन्नैव पण्डितः ॥ ९३ ॥

भावपात्ररहितं फलप्रदं, नैव दानमुदितं मनीषिभिः ।
अक्कया द्रविणलुब्धया यथा, स्पष्टदत्तमजनिष्ट निष्फलम् ॥ ९४ ॥

कष्टायाकृतपुण्यस्य स्यात्तत्सर्वं करोति यत् ।
हलखेटनलात्तान्य वृषस्येव कुटुम्बिनः ॥ ९५ ॥

प्रभावनां यथाशक्ति सुधीः सम्यक्त्वभूषणम् ।
सुकृतं सेचयेत् कुर्वन् वादिदेवमुनीन्द्रवत् ॥ ९६ ॥

विषयरसलोलुपः सन् बहुसुकृतं कण्डरीकवज्जह्यात् ।
अथ पुण्डरीकनृपवन्मनुते हालाहलं विषयान् ॥ ९७ ॥

यत्किञ्चिदीक्षणात्सम्पदनित्यत्वं विभावयन् ।
नग्गईनृपवद् बोधं स्वमेवाऽऽप्नुयाद् बुधः ॥ ९८ ॥

प्राणी प्रमादादपि नैव मिथ्या, ब्रूयात्तथाप्यत्र न मर्म भिन्द्यात् ।
तद्भेदतः श्रेष्ठिवरो यतोऽत्र, स्वकीयपत्नीवधपापमाप ॥ ९९ ॥

सुगयसुकुमालिकाया, निशम्य वार्तां न विश्वसेत् प्राज्ञः ।
पापप्रवृत्तिहेतौ, देहे चर्मावशेषेऽपि ॥ १०० ॥

विनाऽऽस्थामार्हतो धर्मः फलप्राप्त्यै भवेन्न हि ।
सिद्धदत्ताऽऽकाशगामिविद्येवात्र द्विजन्मनः ॥ १०१ ॥

कुर्वाणः पापकर्माणि चौर्यादीन्यपि देहभृत् ।
सत्यकश्रेष्ठिवत् सत्य - व्रती स्याद् राजवल्लभः ॥ १०२ ॥

संसारभीरुर्वितथमधोगतिनिबन्धनम् ।
उपरोधाद् भयाद् वाऽपि न वदेत् कालिकार्यवत् ॥ १०३ ॥

सुचिरं सत्यवक्ताऽपि वदन्मिथ्योपरोधतः ।
प्रयाति नरकं स्वार्थ - भ्रंशकृद् वसुराजवत् ॥ १०४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमस्कारप्रभावेण जीवाः सद्गतिभागिनः ।
इव हस्तिपकश्चौर्य-कलङ्की त्रिदिवं गतः ॥ १०५ ॥

नानापुराकृतकुकर्मकदर्थनानि,
दृष्ट्वा न हास्यरसमाचरति प्रबुद्धः ।
यद् ब्राह्मणी नृपतिघातपणाङ्गनादि-
कर्माण्यचीकरदिहैककजन्ममध्ये ॥ १०६ ॥

महात्मनां निर्ममाणामपि सेवा फलप्रदा ।
यथा नमि-विनम्योः श्रीवृषभस्वामिसेविनोः ॥ १०७ ॥

कुर्यात् पराक्रमं भूय आत्ममृत्युभयच्छिदे ।
कंसस्येव परं मृत्युभीर्धर्मादेव गच्छति ॥ १०८ ॥

व्याधिध्वंसो भवेज्जन्तोर्गुणनेन जिनस्तुतेः ।
भक्तामरप्रभावेण राजहंसकुमारवत् ॥ १०९ ॥

श्रद्दधाति न जीवादितत्त्वानप्यात्तसंयमः ।
अङ्गारमर्दकाचार्य इवाभव्यो निरास्तिकः ॥ ११० ॥

भ्रात्रादिष्वपि सौजन्यं प्राणी राज्यादिलोलुपः ।
तृष्णावशान्न गणयेत् सहजेषु यथाऽऽर्षभिः ॥ १११ ॥

विनयी धर्मयोग्यः स्याद् बुद्ध्यादिगुणभाजनम् ।
सहकारफलाऽऽकृष्टि-विद्यावाञ्छ्रेणिको यथा ॥ ११२ ॥

प्राप्य धर्मसमयं सुधीधनो, विस्तराय न विलम्बमाचरेत् ।
येन बाहुबलिनाऽपि यामिनी-लङ्घनेन वृषभो न वन्दितः ॥ ११३ ॥

मन्मथव्याकुलः किञ्चिदपि नो गणयेन्नरः ।
ब्रह्मदत्तं यथा माता चुलणी मारणोद्यता ॥ ११४ ॥

वैफल्यं न नयेत्कर्म वैषम्यं समुपस्थितम् ।
प्रौढः पुरुषकारेऽपि द्वारवत्यां हरेरिव ॥ ११५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रशान्तहृदयं धर्मध्यानचित्तं दृढव्रतम् ।
पापोऽपि बोधवान् दृष्ट्वा पुष्पाजीव इवार्जुनः ॥ ११६ ॥

वयसा लघुरप्यत्र जिनाऽऽज्ञायां रुचिं दधत् ।
अतिमुक्तर्षिवत् प्राज्ञो वृणुते केवलश्रियम् ॥ ११७ ॥

प्रभुत्वमदमत्तः सन् कर्णनक्रवधादिकम् ।
कुर्वन्निन्द्रियवैकल्य-दुःखं लोष्टवदाप्नुयात् ॥ ११८ ॥

स्तेयी नरकगामी स्यात् स्तेयं हेयं मनीषिणा ।
चौर्याद् येन निगृह्येत नृपैर्मण्डितचोरवत् ॥ ११९ ॥

स्तेयं कुलक्रमाऽऽयातमपि यस्तु परित्यजेद् ।
स्वर्भोगभङ्गी-सुभगः स भवेद् रौहिणेयवत् ॥ १२० ॥

बहुभिः प्रार्थ्यमानोऽपि प्राणी चरमविग्रहः ।
न भोगसम्मुखीनः स्याद् गजादिसुकुमालवत् ॥ १२१ ॥

धर्माद् विरक्तहृदयोऽपि नरः सुवेष-
लज्जां वहन्न हि जहाति चरित्रधर्मम् ।
मन्त्रीश्वरोदयनबोधकृते मुनित्व-
मारोपितोऽपरनृपैरिव पीठमर्दः ॥ १२२॥

कुशाग्रीयमतिर्धर्मं परीक्ष्यैव समाचरेत् ।
वृषवाहिवणिग्वन्न लोकोक्तौ प्रत्ययी भवेत् ॥ १२३ ॥

आच्छादयन् व्यक्तदोषानपि च ख्यापयन् गुणान् ।
स प्रशस्यः सुरेन्द्राणामपि स्याद् वासुदेववत् ॥ १२४ ॥

द्विविधस्यापि धर्मस्य साधुश्रद्धालुभेदतः ।
द्वारभूतेऽथ सम्यक्त्वे यततां धनपालवत् ॥ १२५ ॥

न चलेन्मेरुचूलेव त्रिदशैश्चालितोऽपि सन् ।
स्थिरबुद्धिः शुद्धधर्माच्छ्रेणिकक्षितिपालवत् ॥ १२६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पू.मु.श्री पद्मसुन्दरविरचितः

# ॥ कुशलोपदेशकोशः ॥

नत्वा सद्गुरुमुद्गिरन्तमनिशं धर्मोपदेशामृतं
यत् पीतं श्रवणाञ्जलीभिरजराऽमृत्युप्रदं देहिनाम् ।
श्रीमन्तं यदनन्तशर्मशिवदं कर्मारिमर्मापहं
ज्योतिः पुञ्जमिवातिस(सं)स्फुरदुरुज्ञानप्रभाभासुरम् ॥ १ ॥

सदसद्व्यवहारनयाल्लौकिकलोकोत्तरप्रमाणवशात् ।
सद्भूतेतरभावान्नयसङ्ग्रहता सती यदपि ॥ २ ॥

तदपि व्यवहारनये प्रवृत्तिरिति लौकिकी समाख्याता ।
सदृशासदृशहिताय प्रहिता कविवचनरचनाऽस्ति ॥ ३ ॥

वक्ष्ये बोधविबोधनकुशलं कुशलोपदेशकोशमिदम् ।
कुरुते विचक्षणः खलु निरीक्षितं श्रुतमतेर्बुद्ध्या ॥ ४ ॥

सामर्थ्यमखिलकरणे बहिराकारस्य गोपनं युक्तम् ।
शस्त्रव्यसनाभ्यसनं कार्यं विजिगीषुणा सततम् ॥ ५ ॥

प्रायः परिभवभुवनं पुरुषः परुषो निराकृतिः कथितः ।
तेन विशेषाडम्बरमपि हेयं न च बुधैर्जातु ॥ ६ ॥

कोऽपि न विश्वस्तव्यो विशेषतो दुष्टमनुजनिवहानाम् ।
ज्ञानप्ररूपिताखिलधर्मभ्रंशं समीप्सुवताम् ॥ ७ ॥

निजमतपक्षस्थापनसमुत्थदुर्ध्यानतार्तरौद्रभृताम् ।
पाखण्डिदुष्टसत्त्वप्रत्यन्तनिवासिनां सङ्गम् ॥ ८ ॥

योषिद्बालाचिरन्तनविरुद्धधूर्ताम्बुवह्निनृपतीनाम् ।
हेमकृदसत्यशपथप्रचिकीर्षूणां परित्याज्यम् ॥ ९ ॥

नीचालसशस्त्रभृतां शृङ्गिसरिन्नखिनरेशवश्यानाम् ।
बलवन्नास्तिकचौरकृतघ्नदुर्बुद्धिपुरुषाणाम् ॥ १० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रातस्त्यशान्तसमये कः कालः को व्ययागमो देशः ।
कोऽहं का मम शक्तिः को वैरी सम्पदनुबन्धः ॥ ११ ॥

को देवः कस्याहं किं कुलमसुखं सुखं ममास्ति कुतः ।
प्रत्याहते परैः किमु सद्यः प्रत्युत्तरं दातुम् ॥ १२ ॥

इति चिन्तयति मुहुर्मुहुरहर्मुखे किं दिनस्य मम कृत्यम् ।
के सुहृदो गुरुरपि कः सदसत्कृत्यं किमिह बन्धुः ॥ १३ ॥

स्थितिरिह सातत्यवती यदन्तिकं गम्यते प्रयोजनतः ।
तस्य स्थैर्यादिगुणव्यसनानि च चिन्तयेन्मतिमान् ॥ १४ ॥

खिन्नैरपि मोक्तव्यं न कालकृत्यं कदाचिदपि सुहृदा ।
क्लेशजितः पुरुषोऽपि हि पुरुषार्थफलं न चाप्नोति ॥ १५ ॥

उन्नतमनोरथानां मनस्विना माननीयमपि करणम् ।
तद्विधिरनुमानवशाद् यतते सम्पत्सु सोद्योगः ॥ १६ ॥

परुषं कर्म न कुर्यात् क्षमावते सज्जनाय जातु च न ।
मथितादपि चन्दनतः प्रायः प्रादुर्भवत्यग्निः ॥ १७ ॥

सत्सङ्गतिर्विधेया शुभोपदेशप्रदा वयोवृद्धाः ।
बहुशास्त्रश्रुतकुशला निरन्तरं सेवनीयास्ते ॥ १८ ॥

इह-परलोकविरुद्धं कुर्वाणं नरमभित्यजेद् विबुधः ।
यो हन्ति निजं स कथं परमवति गरिष्ठमन्दमतिः ॥ १९ ॥

विद्यातपःप्रयासैः शौर्येण धनेन धर्मसदृशैश्च ।
अकुलीनोऽपि कुलीनो भवति नरस्तत्क्षणादेव ॥ २० ॥

नात्मानमतीवोच्चैःप्रयासतः खलु गरीयसः कुर्यात् ।
यदि तस्मादवपातो महते दुःखाय तद् भवति ॥ २१ ॥

गतवस्तुनो न शोकः कार्यः प्रतिपन्नकार्यपरिहारः ।
निश्चिन्तस्वापकृतो निद्राभङ्गो न कर्तव्यः ॥ २२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दैविकमानुषदोषैर्भूयः कार्यं न जायतेऽवश्यम् ।
शान्त्या दैविकदोषान्निवारयेन्मानुषान् स्वधिया ॥ २३ ॥

येषामयशो दौःस्थ्यं कार्पण्यं मूर्खताऽतिपापत्वम् ।
नित्यक्लिष्टसरोगा मृतोपमास्तेऽपि जीवन्तः ॥ २४ ॥

दैन्या वृत्तिरनीहितमनोरथत्वं विरुद्धकरणं च ।
परवशताऽसन्तुष्टिर्नरकः किमतः परं तस्य ॥ २५ ॥

सकलकुटुम्बः स्ववशः सन्तोषः स्वजनता च विद्वत्त्वम् ।
इष्टमनोरथलब्धिः स्वर्गे किमतःपरं रम्यम् ॥ २६ ॥

दुर्मन्त्रिणि निर्भीकः कृतघ्नतस्तूपकारबुद्धिरपि ।
दुर्नयतो नयतेच्छुः स नेष्टसिद्धिं लभेत नरः ॥ २७ ॥

वैरमकुर्वन् बहुभिर्दद्याद् बहुसम्मते स्वयं स्वमतम् ।
सुमुखैर्भाव्यमवश्यं सर्वासु शुभक्रियासु बुधैः ॥ २८ ॥

मायाविनामपि नृणां निःस्पृहता खलु फलप्रदा भवति ।
द्रोहप्रयोजनेन च कार्योत्सुकता स्वतः सुजनैः ॥ २९ ॥

पात्रेषु न कर्तव्या मत्सरता जातुचित् कुलीनेन ।
स्वज्ञातिकष्टमधिकं नोपेक्ष्यं कार्यमेकत्वम् ॥ ३० ॥

मानवतामपमानस्तद्दोषादयशसोऽपि वृद्धिः स्यात् ।
नश्यन्ति ज्ञातिजना भूयः कलहादतिक्रोधात् ॥ ३१ ॥

वर्धन्तेऽधिकमधिकं कमलिन्यो ज्ञातयोऽम्बुना मिलिताः ।
परिपूजयेद् विशेषाद् निःस्वं साधर्मिकं मित्रम् ॥ ३२ ॥

स्वकुलानुचिताय नरो न याति कार्याय गौरवगरिष्ठः ।
अधमक्रयाणकक्रयविक्रयणायाप्रयोजनतः ॥ ३३ ॥

न निजाङ्गवाद्यमनिशं त्रैणच्छेद्यं मुधा क्षितौ लिखनम् ।
न नखैर्दशननखानां निघर्षणं कार्यमार्येण ॥ ३४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आत्मानमात्मनैव प्रवर्तमानं निवारयेत् कुपथे ।
पाथोनिधिरुद्वेलः परेण किं वार्यते स्वस्मात् ॥ ३५ ॥

दानं यदि मानयुतं यद्यौचित्येन पूजितं वचनम् ।
यदि शौर्यं नयवर्यं त्रिजगद्वशकृत् त्रयं चैतत् ॥ ३६ ॥

अर्थादधिनेपथ्यो महाधनी सुष्ठुवेषपरिहीनः ।
विबलः सबलद्वेषी महतामुपहासनिलयः स्यात् ॥ ३७ ॥

चौर्याद्यगुणेषु सदा बद्धधनाशो गुणेषु संशयवान् ।
शक्तौ च निरभियोगो नेहितलक्ष्मीमवाप्नोति ॥ ३८ ॥

फलसमये सालस्यः कृताभियोगो विनिष्फलत्वेऽपि ।
निःशङ्को रिपुसङ्गे न नरश्चिरमेधतेऽवश्यम् ॥ ३९ ॥

धूर्तेष्वधिसन्मानी निर्मायिनरेष्वनादरी सततम् ।
स्त्रीशठवचःप्रतीतः शीघ्रविनाशं समभ्येति ॥ ४० ॥

सेर्क्षः(र्ष्यः) कुलट्यकामी गणिकालुब्धोऽपि निर्धनः पुरुषः ।
प्रवयाविवाहकाङ्क्षी सकलजनस्योपहासाय ॥ ४१ ॥

कामिस्पर्धा(र्धी)निस्वस्तरुणीकोपाद् विवाहकर्ता यः ।
दोषस्फुटः प्रियास्पृक् पश्चात्तापं स समुपैति ॥ ४२ ॥

पण्याङ्गनाहिषु रिपुर्निवारितार्थप्रियो भियाऽत्यर्थम् ।
स्त्रीरन्ता दारिद्र्ये स हीयते सकलसम्पद्भिः ॥ ४३ ॥

निर्बुद्धिः सिद्ध्यर्थी कार्यस्य सुदुःखितः सुखाकाङ्क्षी ।
अचरक्रयी परस्वैर्मन्दमतीनां त्रयो गुरवः ॥ ४४ ॥

दैन्यः स्वसुतायत्ते भार्यावित्ते वनीपकसदृक्षः ।
दत्त्वानुग्रहणमतिस्तदपरपुरुषाधमः कोऽस्ति ॥ ४५ ॥

मतिगौरवादहंयुर्बहुगर्वी मागधोक्तिभिर्भवति ।
लिप्सुर्लुब्धे नृपतौ दुर्मतयस्तु त्रयः पुरुषाः ॥ ४६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हितवादिषु स द्वेषी रोगी यदपथ्यसेवको भवति ।
नीरुग्भेषजभक्षी निःसंशयतो मुमूर्षुमतिः ॥ ४७ ॥

भोजनकाले कुपितो गन्ताऽमार्गेऽपि शुक्लकुलजातः ।
कुलमदतोऽसेवाकृत् त्रयो महामन्दमतिमुख्याः ॥ ४८ ॥

मित्रोद्वेगकरो यो धूर्तैर्विश्वास्य वञ्च्यते सततम् ।
गुणवान् मत्सरसहितः सकला विकलाः कलास्तस्य ॥ ४९ ॥

रमणीरमणीयतरोऽन्यदारसक्तोऽप्रियोऽपि सिद्धार्थे ।
गोष्ठीनिरतो निधनो निर्बुद्धिशिरोमणिः पुरुषः ॥ ५० ॥

धातुवादादिकृते विहितधनाशो रसायने रसिकः ।
विषभुक् परीक्षणार्थं त्रिकमेतदनर्थकोशगृहम् ॥ ५१ ॥

गुह्योक्ता परवश्यः कुकर्मणो भृत्यभीतिकर्ता यः ।
निजकोपसमापाती दुर्यशसामपि पदममी स्युः ॥ ५२ ॥

दोषेष्वधिको रसिकः क्षणानुरागी च गुणगणाभ्यासे ।
बहुहानिरल्परक्षी नास्यदमपि सम्पदां भवति ॥ ५३ ॥

प्रणतेष्वनतो मौनी दुर्बलपीडितनरेषु सोत्साहः ।
बहुगर्वेण स्तब्धो न भवेज्जनवल्लभः क्वचन ॥ ५४ ॥

दीनवदनोऽतिदुःखे सुखसम्पत्तौ न दुर्गतेर्भयकृत् ।
दुष्कर्मणि निर्लज्जो बालैरुपहस्यते स भृशम् ॥ ५५ ॥

धूर्तस्तुत्या भ्रमितस्त्वात्मनि यशसैव पात्रपोषकरः ।
आत्महितेष्वविमर्शी क्षयमेव स शीघ्रमुपयाति ॥ ५६ ॥

वाचालः कुशलोऽहं चपलः सहितोद्यमोऽस्मि सोऽहमिति ।
निःशङ्कः शूरोऽहं स मन्यते यस्तु मूढात्मा ॥ ५७ ॥

धर्मद्रोहसुखेच्छुरन्यायेन च विवर्धिषुर्नितराम् ।
श्रेयःसंबलमुक्तो मरणान्ते दुर्गतेरतिथिः ॥ ५८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुखरत्वेनाभिज्ञः सम्पल्लाभे भवेत् सदा विकृतः ।
गणकोक्तौ सुतकामी न धीमतां माननीयः स्यात् ॥ ५९ ॥

बुधसदसि स्वश्लाघी क्लिष्टोक्त्या मन्यते कविंमन्यः ।
व्याचष्टे श्रुतमश्रुतं तन्मतये खलु नमस्कुर्मः ॥ ६० ॥

परगतमर्मस्पर्शी हसन्निवोद्वेजकोऽतिचाटूक्त्या ।
अगुणी गुणिनिन्दाकृत् क्रकचप्रतिमः परः स पुमान् ॥ ६१ ॥

दक्षः स्वसभाधीती महातुरः साभिलाषुकोऽत्यन्तम् ।
अनवसरज्ञोऽपि गतः कपिकच्छुसमा इमे ख्याताः ॥ ६२ ॥

वचनास्मारकदूतः खरस्वरो गीतगानकारी च ।
योगी गृहाश्रमरतः सोद्वेगकरास्त्रयश्चैते ॥ ६३ ॥

स्फुटदोषिजनश्लाघी गुणिजनगुणनिन्दकोऽसमर्थः सन् ।
राजाद्यवर्णवादी सद्योऽनर्थस्य भवति गृहम् ॥ ६४ ॥

निजधर्मणोऽपमानं वित्तार्युर्मर्मवञ्चनं मन्त्रम् ।
गृहदुश्चरितं च तथा प्रकाशयेज्जातु नो मतिमान् ॥ ६५ ॥

मूर्खः पण्डितमान्यो मूर्खंमन्योऽपि पण्डितो मान्यः ।
पण्डितमूर्खान्तरतः स पण्डितः पण्डितंमन्यः ॥ ६६ ॥

विच्छिन्नश्रुतवचनः खण्डस्फुटिताक्षरोक्तिवाचालः ।
खण्डितपण्डितमान्यो न खण्डितः पण्डितंमन्यः ॥ ६७ ॥

व्याकरणतर्कछन्दोज्योतिर्वैद्यश्रुतिस्मृतिपुराणैः ।
षड्दर्शनमर्मज्ञः सार्वपथीनो भवेत् कुशलः ॥ ६८ ॥

तद्विपरीतो मूर्खो गणयति बुधमान्यमात्मनाऽऽत्मानम् ।
शठधूर्तादिस्तुतिभिः स च मूर्खशिरोमणिः प्रवरः ॥ ६९ ॥

तीव्रक्रोधाहङ्कृतिमायालोभादयो हि सन्ति निजे ।
पात्रमपकीर्तिगुणिनां ततः परः प्राप्यते कुत्र ॥ ७० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अकथितपरमर्मज्ञो द्वन्द्वालापावरोधसि परस्य ।
प्रविशेन्नानाहूतो नाङ्गस्पर्शी भवति चतुरः ॥ ७१ ॥

योऽपृष्टो बहुभाषी परासनग्राहको बहुविरुद्धः ।
बहुहास्यमर्मवक्ता विद्वेषं याति तत्क्षणतः ॥ ७२ ॥

वक्तुर्नवरसमर्म स्वयमनभिज्ञो विनिन्दते तस्मै ।
विद्वद्वचनेष्वरुचिर्निगद्यते ज्ञानदग्धनरः ॥ ७३ ॥

गम्भीरमतिविदग्धास्तत्त्वविदः सर्वशास्त्रकुशलाश्च ।
नीरागद्वेषरता दुर्लभ्या मानुषे लोके ॥ ७४ ॥

विख्यातकीर्तिधवलाः सत्कायो दानशीलिततपोभिः ।
प्रगुणा धर्मणि चतुराः किमुत मृताः सन्ति जीवन्तः ॥ ७५ ॥

मुनिपद्ममेरुसुगुरोः पदारविन्दद्वयैकमधुपेन ।
मुनिपद्मसुन्दरेण कृतमिति कुशलोपदेशमिदम् ॥ ७६ ॥

कुशलोपदेशकोशं निजहृदि सदने दधाति यः कुशलः ।
तस्याक्षयनिधितुल्या बुद्धिर्न क्षयमवाप्नोति ॥ ७७ ॥

पू. आ. श्रीजिनदत्तसूरिविरचितः

## ॥ श्रुतस्तव ॥

निम्महिय-मोहमाएण, कणयकाएण विगयराएण ।
उवलद्ध-विमल-केवल-नाणेण विसुद्धझाणेण ॥ १ ॥

लोयालोयं मुणिजण जेण तित्थप्पवत्तण-खणम्मि ।
चउविह-देव-विणिम्मियउ सरणे तिजय जियसरणे ॥ २ ॥

सरणागय-जणरक्खण-खम विरइय-पवर-वयण-लक्खेण ।
सम्मं जिणवीरेणं भवद-नीरेण धीरेण ॥ ३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सयमिच्छ पसत्था जा पयासिया अत्थउ गणहरेहिं ।
विहिया दुवालसंगी सपरेसि सुत्तउ विहया ॥ ४ ॥

तत्थायारो रोविय पंचविहायार वत्थुवित्थारो ।
वित्थारिया मुणि-गणि-गणसारो संसारमवहरउ ॥ ५ ॥

सूयगडो सुत्तिय सुत्त सियवडो पवर-वयण-फल-गमउ ।
भवजलहिपारगामी जसहइ सत्ताण पोउच्चा ॥ ६ ॥

नीसेस पयत्थाण ठाणं ठाणपहाणमिह नाणं ।
वंदेह समवायं पडिहय-संदेह-समवायं ॥ ७ ॥

तं नमह पंचमंगं जं नमिउं पंचमं गइं जीवो ।
पावइ पावखयाउ भगवइ नामं च नामं च ॥ ८ ॥

नायाधम्मकहाउ कय भवविरहाउ निहयवाहाउ ।
हरिसुल्लसंत पुलउ वंदेहमुवासगदसाउ ॥ ९ ॥

तह अंतगडदसाउ अणुत्तरोववाइयाणदसाउ ।
पण्हावागरणंगं जयइ जणे जणियभवभंगं ॥ १० ॥

सुह-दुह-विवाग-सूयग-मित्तो दसमं विवागसुयमंगं ।
हयसेण दुट्ठ-दिट्ठि-प्पवाय सह दिट्ठिवायं च ॥ ११ ॥

उप्पायसुद्धमग्गेणियं च विरियाणुवायमिह तइयं ।
अत्थिण्णत्थिपवायं नाणपवायं च पंचमयं ॥ १२ ॥

सच्चप्पवाय-मायप्पवाह कम्मप्पवायमट्ठमयं ।
पच्चक्खाणं विज्जाणु-वाय कल्लाणनामं च ॥ १३ ॥

तह पाणाउं किरिया-विसालमह लोगबिंदुसारं च ।
उववाइय रायपसेणइज्ज जीवाभिगम नामं ॥ १४ ॥

पण्णवणोवंग सूर-चंदपण्णत्ति-जंबूपण्णत्ति ।
वंदामि निरियावलिया सुयखंधं चेह पंचण्हं ॥ १५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इह जे जिणवीरेणं सयं च पव्वाविया य सिक्खविया ।
तेहिं कयाइं चउदस-सहसाणि पइण्णगाणं च ॥ १६ ॥

दसवेयालिय-मावस्सयं च तह ओह-पिंड-निज्जुत्ति ।
पज्जुसण-कप्पयकप्प कप्प पणकप्प जियकप्पो ॥ १७ ॥

वंदे महानिसीहं उत्तरज्झयणे वायगकयाणि ।
पसमरइ-पमुह-पयरण पंचसयाइं महत्थाणि ॥ १८ ॥

जुगपवरागम हरिभद्दसूरि रइयाणि चउदस-सयाणि ।
सद्धम्म-सत्थमत्थय-मणिपयरण-पभिइ चित्ताणि ॥ १९ ॥

नंदि-मणुओगदरप्प सुहं सुत्तमित्थ सुमहत्थं ।
अत्थि सुपसत्थ वित्थर भणण समत्थं पसत्थं च ॥ २० ॥

आसज्जतं मणवज्जं जुगपहाणागमेहिं सूरिहिं ।
गुणगणभूरीहिं कयं वंदे तं पयरणाइं वि ॥ २१ ॥

जुगपवर-गुरु-जिणेसरसूरीहिं अभयदेवसूरीहिं ।
सिरिजिणवल्लहसूरीहिं विरइयं जमिह तं वंदे ॥ २२ ॥

कलिकाल-कुमुइणी-वणसंकोयणकारि सूर-किरणव्व ।
इह सुत्तासुत्तपया व भासणुल्लासिणो जेसिं ॥ २३ ॥

ठाणट्ठाण-ट्ठियमग्ग नासि संदेहि मोहतिमिरहरा ।
कुग्गहिवग्गकोसियकुलकवलिय लोयणालोया ॥ २४ ॥

तेहिं पभासियं जं तं विहडइ नेय घडइ जुत्तीए ।
वंदे सुत्तं सुत्ताणुसारि संसारिभयहरणं ॥ २५ ॥

गुरु-गयणयल-पसाहण-पत्त पहो पयडिया समदि सोहो ।
हय सिवपह-संदेहो कय भव्वंभोरुहविबोहो ॥ २६ ॥

सूरूव्वसूरि जिणवल्लहो य जाउजए जुगपवरो ।
जिणदत्त-गणहर-पयंत-प्पय पणयाण होई फुडं ॥ २७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीदिवाकरमुनिविरचिता

# ।। शृङ्गार-वैराग्य-तरङ्गिणी ।।

(शार्दूलविक्रीडित)

सत्पुण्यार्जितरूपतर्जितशचीं संत्यज्य राजीमतीं
राज्यं चाऽश्वशताङ्गपत्तिकरिभिर्युक्तं शिवानन्दनः ।
यः संपर्यणयच्चरित्रयुवतिं नत्वा तदंह्रिद्वयं
कर्त्ता किञ्चिदनिन्द्यवर्णनमहं शृङ्गार-वैराग्ययोः ।। १ ।।

केशवर्णनम् - (स्रग्धरा)

चञ्चच्चन्द्रावदाताहितकुसुमरुचा तारताराविराजि-
व्योम्नो लक्ष्मीं जयन्तं जगति गुरुतरं केशपाशं सुकेश्याः ।
हर्षोत्कर्षं निरीक्ष्य व्रजसि मनसि यं तं शमारामभूमी-
जातव्रातच्छिदायै निशितमसिमिव श्राग् न जानासि नासि ।। २ ।।

कालिन्दीस्थूलकूलोन्मिलदमलजलारालकल्लोललोलां
बालायाः कुन्तलालीमलिकुलगवलश्यामलामाविलोक्य ।
लोकाः ! कौतूहलं मा कलयत किल तां कल्मषोत्तालकाल-
व्यावल्गद्व्यालपालीमिव कवलयितुं शीललीलायितं च ।। ३ ।।

भालवर्णनम् (शार्दूलविक्रीडित)

कामं कामिनि ! हंसगामिनि ! जगन्नृणां मनोमोहने
यस्मिन्नादधतेऽर्धचन्द्रधिषणां ये धीधनास्तावके ।
भालं भाभरभासुरं समभवत् तेषां शिवश्रीस्पृहा-
भाजां कण्ठतटेऽर्धचन्द्रमिव तत् तद्वीक्षणाकाङ्क्षिणाम् ।। ४ ।।

स्मेराक्ष्याः प्रविसारितापरिगतं भालं विभालङ्कृतं
रेखालक्षितमक्षदक्षविलसत्क्रीडानिवासास्पदम् ।
सारीणां फलकं किमेतदिति यैराशिश्रिये पण्डित-
म्मन्यैरज्ञजनैर्हहा ! नृजनुषः सारं हि तैर्हारितम् ।। ५ ।।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## भ्रूवर्णनम् – (मन्दाक्रान्ता)

अन्तःस्वान्तं स्फुरति सुतरां सारसारङ्गनेत्र्या
येषां कुल्यासलिललहरीभङ्गुरो भ्रूविलासः ।
युक्तं तेषां सुकृतवपुषो जायते भङ्गरङ्गो
दुःसंसर्गाद् व्रजति विपदं को न यस्मादकस्मात् ? ॥ ६ ॥

एणाक्षीणां कुटिलकुटिलं श्यामलं भ्रूयुगं यद्
दर्शं दर्शं वहसि मनसः स्नेहसन्दोहमत्र ।
सृष्टं स्रष्ट्रा भुवि रतिपतेश्चारुचारित्रवीर-
भ्रंशार्थं तत् स्मरसि किमु नो चण्डकोदण्डदण्डम् ? ॥ ७ ॥

## नेत्रवर्णनम् (शिखरिणी)

कटाक्षानेणाक्षी क्षिपति मयि दक्षाक्षित इति
स्वसौन्दर्योद्रेकाद् वहसि हृदये यन्मदमरे ! ।
विवेकाख्यं ज्योतिः सुगतिपथपान्थं तदसितैः
शरासारैः स्फारैरिव न मनुषे तैर्हतहतम् ॥ ८ ॥

कृशाङ्ग्या विस्मेराम्बुरुहनिकराहंकृतिकषं
यदैक्ष्याक्षिद्वन्द्वं विपुलमतुलां प्रीतिमगमः ।
स्मरेणेदं तत् ते शमहरशरोत्तेजनकृते
स्फुरच्छाणायुग्मं किमुत विहितं कूटमतिना ? ॥ ९ ॥

## कर्णवर्णनम् – (हरिणी)

श्रवणयुगलं लोलद्दोलोपमं तव निर्मितं
शशिमुखि ! रतिप्रीत्योः क्रीडाकृते विधिनाऽत्र यत् ।
चरणतरुणीसक्तप्राणिप्रबन्धनहेतवे
तदहमहहाऽऽशङ्के पाशं प्रसारितमञ्जसा ॥ १० ॥

नलिननयनाश्रोत्रस्यूते मणीमयकुण्डले
प्रकृतिसुभगे दर्शं दर्शं प्रयासि मुधा मुदम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शमभटशिरश्छेत्तुं सज्जीकृतेऽत्र कुवेधसा
सुजड ! किममू रज्जूत्क्षिप्ते न विन्दसि चक्रके ॥ ११ ॥

नासिकावर्णनम् (पृथ्वी)

इदं तिलमणीवकं सुजन ! नासिकासम्पुटं
विभाव्य हरिणीदृशामिति मतौ मुधा धावसि ।
अहेर्वदनमुत्फणं सविषफूत्कृताहंकृतं
विचारय तदुद्यतं चरणजीवितं हिंसितुम् ॥ १२ ॥

इहास्यत शुकाननं स्मरमहेषुधिर्वेति किं
वितर्कयसि वीक्ष्य रे जड ! मृगीदृशो नासिकाम् ।
न विन्दसि मलाविलां नरककुम्भिकामेतकां
निपीतमदिरोऽथवा श्रयति चेतनां कर्हिचित् ॥ १३ ॥

कपोलवर्णनम् (मालिनी)

सुतनु ! तव सितांशोर्बिम्बमाभिद्य मध्याद्
दलयुगलनिवेशात् कल्पितौ किं कपोलौ ? ।
इति दधति धियं ये ते न जानन्ति सम्यग्
निजसुकृतशरीरं भिन्नमाभ्यामविज्ञाः ॥ १४ ॥

स्मरमयमवगन्तुं कामिनः सुभ्रु ! चेतो
न्यधित विधिरयं ते दर्पणौ गल्लदम्भात् ।
अमृतमिव पिबन्तो नेति संविन्दते द्राग्
नरककुहरकुण्डे स्वं हि सङ्क्रान्तमज्ञाः ॥ १५ ॥

ओष्ठवर्णनम् (वसन्ततिलका)

रे मुग्ध ! मुग्धवनिताऽधरसीधुपानाद्
मा माद्य मेदुरतरां मुदमादधानः ।
काऽस्माद्गताधरगतेर्भविता गतिस्ते
तप्तत्रपुर्धयनविह्वलिताङ्गयष्टेः ॥ १६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दन्तच्छदद्वयमुदीक्ष्य नितम्बिनीनां
पीयूषयूषमयमेव हि मेति मंस्थाः ।
किम्पाकजं द्विदलतां फलमाप्य किन्तु
सङ्क्रान्तमत्र शमजीवितहारि विद्धि ॥ १७ ॥

दन्तवर्णनम् (प्रहर्षिणी)

चन्द्रस्य श्रयति कलातुलामलोलां
लोलाक्ष्याः दशनततिः सुधानुविद्धा ।
एवं ते हृदि दधतः शिवं यियासो-
र्नैषा किं स्खलनकृते वृत्तिर्भवित्री ? ॥ १८ ॥

साम्यं ते सुतनु ! भजेत् तदा रदाना-
मुद्गच्छेद् यदि शिखरालिकात्र शाणे ।
तुष्टूषोरिति सुकृताङ्घ्रयष्टिभेदे
जायन्ते क्रकचमुखोपमा न किं ते ? ॥ १९ ॥

मुखवर्णनम् (वंशस्थ)

श्रियो निधिः श्राग् विधिना दधे स्त्रियां
मुखच्छलात् किं कनकाम्बुजं निजम् ।
इति स्मरन् न स्मरसि स्मरातुर !
प्रलोललालावलिपिच्छिलं तकत् ॥ २० ॥

शशाङ्कबिम्बप्रतिबिम्बडम्बरं नतभ्रुवो बिभ्रददभ्रविभ्रमम् ।
स्तुवन्मुखं दुर्गतिदुर्गसागरं स्वसम्मुखीनं किमु नेक्षसे सखे ! ॥ २१ ॥

कण्ठवर्णनम् (द्रुतविलम्बित)

सरलताकलितां गलकन्दलीं मृगदृशां मुदमैक्ष्य मुधागमः ।
अवितथां खलु तां गरकन्दलीं विबुध ! विद्धि सुबुद्धिविरोधिनीम् ॥ २२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निगरणे किमु हारिणि हारिणि स्वयमुपैषि निवेश्य दृशौ स्त्रियः ।
नरकपालकपाशमलं गले निपतितं न न पश्यसि रे ! स्वके ॥ २३ ॥

भुजवर्णनम् (उपजाति)

गाङ्गेयगौराङ्गि ! भुजानुषङ्गमङ्गी तवाङ्गीकुरुतेतरां यः ।
समूलमुन्मूलित एव तस्य पुण्यद्रुमोऽहःकरिणा करेण ॥ २४ ॥

मृणालिनीबालमृणाललीलं बालाभुजं मा भजताऽङ्गभाजः ! ।
यियासतां निर्वृतिपत्तने वो विघ्नाय तं वित्थ भुजङ्गमेव ॥ २५ ॥

करवर्णनम् - (शार्दूलविक्रीडित)

भामिन्या भुजशाखयोः परिलसत्पाणिद्वयव्याजतः
सङ्क्रान्तौ किमु पारिजातकतरोरेतौ नवौ पल्लवौ ।
इत्थं भ्रान्तिमितो भविष्यत इमौ संसारकारागृहे
क्षिप्तस्याऽऽशु तवासुभूतसुकृतध्वंसाद् महापल्लवौ ॥ २६ ॥

कामिन्याः करपल्लवं स्वजयिनं सम्भाव्य शोभाद्भुतं
युक्तं कोकनदं नवाम्बुनि तपस्तप्तुं स्थितं सम्प्रति ।
भ्रान्तस्येति तदङ्गसङ्गमवशादेवाप्तरागस्य ते
किं नो भावि भवाम्बुराशिभुवनस्याभ्यन्तरे मज्जनम् ॥ २७ ॥

नखवर्णनम् (इन्द्रवज्रा-उपजाति)

नार्याःकराम्भोजयुगे विभान्ति कामाङ्कुशाः किंशुकशोणभासः ।
मैवं धियं धेहि शुभेभशुम्भे कामाङ्कुशांस्तांस्तु विदांकुरु त्वम् ॥ २८ ॥

चेत्पल्लवा जाग्रति पल्लवेषु तन्व्यास्तदा हस्तनखोपमाः स्युः ।
इति स्तुवानस्य वृषाख्यवृक्षो न पल्लवैः पल्लविता सखे ! ते ॥ २९ ॥

स्तनवर्णनम् - (द्रुतविलम्बित)

रमणि ! काञ्चनकौ यदि मन्दरौ हृदिजयोर्भजतस्तव तां तदा ।
इति विमर्शपराः परितो व्यधुः स्वशमसौधधराधरपातनम् ॥ ३० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्त्रि ! किमिमावलियुक्कजकुड्मलावुत कुचौ तव चूचुकचञ्चुरौ ? ।
भ्रममिति प्रथयन् भ्रमिता भृशं कनकवद् नरकानलतापितः ॥ ३१ ॥

हृद्गतहारवर्णनम् (वंशस्थ)

वधूमुखेन्दुं किमुपासितुं स्थितं भमण्डलं हृद्गतहारदम्भतः ।
वितर्कसम्पर्कपरः परेतवत् त्वमित्यहो ! हा ! खवान् भविष्यसि॥ ३२ ॥

हृदम्बुजाद् बालमृणालमण्डली समुद्ययौ हारमिषात् किमु स्त्रियः ।
निबद्धबुद्धिस्त्वमिति प्रबध्यसे न कितरामान्तरवैरिणां भरैः ॥ ३३ ॥

उदरवर्णनम् (प्रहर्षिणी)

सम्माद्यन्मृगपतिजैत्रमध्यमासां नारीणामुदरमिहास्ति वा न वेति ।
आरेकां तव दधतो मदान्धबुद्धेरारेका गतिरधरा न का भवित्री ? ॥ ३४ ॥

सच्छायामुदरलतां लतामिवैक्ष्य
ध्यायो मा स्तनफलशालिनीम् ।
युवत्याः सुध्यानस्थगनविधानसावधानां
मत्वैनामिति सुजनास्तपश्चरन्ति ॥ ३५ ॥

रोमलतावर्णनम् (वसन्ततिलका)

नाभ्यालवालवलयोद्गतलोमवल्ली
शृङ्गाररसाररसपूरमयी कृशाङ्ग्याः ।
आश्चर्यमेवमभितो भजतस्तवेयं
सम्पत्स्यते किमुरगीव न जीवहन्त्री ॥ ३६ ॥

रोमावलीं वरतनो रतिकेलियष्टि
मा नृत्य रे हृदय ! नेत्रहरीं विदित्वा ।
किन्तु स्मरेण रचितां मुनिमानसानां
बुध्यस्व बन्धनकृते खलु शृङ्खलां ताम् ॥ ३७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## नाभिवर्णनम् (मालिनी)

सुभगमतिगभीरं नाभिदेशं सुदत्याः
किमनुभवसि पश्यन् मन्दबुद्धे ! प्रमोदम् ? ।
तमसमशमचञ्चच्चन्द्रबिम्बादनाय
प्रसृततममिवास्यं विद्धि वैधुन्तुदं भोः ! ॥ ३८ ॥

स्त्रि ! तव रतिपकेलीहेतवे नाभिवापी
रसतरलतरङ्गा वेधसेयं व्यधायि ।
उपमितिमिति कुर्वन् यासि यच्छ्वभ्रगर्त्ते
तदुचितमथवा किं नीचसङ्गः शुभाय ? ॥ ३९ ॥

## नितम्बवर्णनम् (पृथ्वी)

नितम्बिनि ! नितम्बकं तव रतीशकेलीस्पृशो
नितम्बमिव भूभृतः समधिरोढुमीहेत यः ।
ततो विषयवायुना तरुपलाशवत् तस्य किं
प्रकम्पिततनोरधः पतनमौचितीं नाञ्चति ? ॥ ४० ॥

घनं जघनमण्डलं तरुणि ! राजहंसादृतं
तवैक्ष्य सुरवाहिनीपुलिनमित्यहो ! संश्रयन् ।
स भूरिजडतोल्लसद्बहललोलकल्लोलकै-
र्विलोडितमतिर्ध्रुवं भवपयोनिधौ मज्जति ॥ ४१ ॥

## ऊरुवर्णनम् (हरिणी)

अनघजघनाजङ्घादम्भात् स्मरस्मरवल्लभा-
कलभयुगलीबन्धस्तम्भद्वयं विदधे विधिः ।
इति विमृशतस्तस्याघक्ष्मापतिः किमु नो हहा
निबिडनिबिडं कारागारे करिष्यति बन्धनम् ॥ ४२ ॥

तव वरतनो ! येषामूरूयुगं क्रमवर्त्तुलं
करिवरकराकारं स्फारं मनो मदयत्यलम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुरशिवपुरद्धारद्धन्द्वे निरर्गलमर्गला-
युगलमभवत् तेषामेतत् प्रवेशविघातकृत् ॥ ४३ ॥

चरणवर्णनम् - (शिखरिणी)

यदस्याः सुन्दर्य्याश्चरणयुगवीक्षाऽऽदृतमति-
र्मदान्निन्दस्यब्जं जलगततपस्विव्रतधरम् ।
सखे ! तत्तन्निन्दाफलमविकलं संसदि सतां
कलङ्कावाप्त्याख्यं किमु न लभसे दुर्जन इव ? ॥ ४४ ॥

निशम्यारं तारं तरुणतरुणीनां चरणयो-
श्चमत्कार्षीर्मा त्वं रणदनणुमञ्जीरविरवम् ।
अमाङ्गल्यं शोकध्वनितमिव मन्यस्व तमरे !
शिवश्रीणां पाणिग्रहणकरणारम्भसमये ॥ ४५ ॥

नखवर्णम् (मन्दाक्रान्ता)

सीमन्तिन्याः क्रमुयुगनखाः पल्लवोल्लासिभासः
किं गाहन्तेऽरुणमणिमयादर्शसर्वस्वशोभाम् ।
मेत्थं मंस्थाः स्फुरदुरुदशाकारधर्मस्य दाहे
दीप्रा दीपा इव तव न किं मानसे ते स्फुरन्ति ? ॥ ४६ ॥

वक्त्राब्जेनाधिकतररुचा निर्जितोऽनेकरूपं
कृत्वाऽऽत्मानं पदनखमिषाद् इन्दुरिन्दीवराक्ष्याः ।
सेवां धत्ते नियतमिति मा मानसे धारय त्वं
कुद्दालांस्तानुपशमरसाभेदनेऽवेहि किन्तु ॥ ४७ ॥

याऽलङ्कारचयप्रचाररुचिरा प्रोद्यत्प्रसादास्पदा
दोषावेशसमुच्छ्रिता गुणमयी माद्यत्पदन्यासिका ।
विद्वन्मानसहारिणी वररसाश्लेषोदयोल्लासिनी
वैदर्भीव सुलक्षणा क्षितितले व्यावर्ण्यते वर्णिनी ॥ ४८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तामेवाऽस्नतया प्रसूनधनुषो–पादाय सम्माद्यता
स्वाऽऽज्ञैश्वर्यमवर्ध्यत त्रिभुवनव्यामोहनेन ध्रुवम् ।
बाढं मूढतमा इति स्तुतिपरा हा पापपङ्कान्तरे
स्वात्मानं किमु पातयध्वमधुना ध्यान्ध्यं दधाना जनाः ॥ ४९ ॥

मुक्त्वा संसारसिन्धुं जिगमिषसि शिवश्रीपुरं चेत् तदानीं
माकार्षीर्वासबुद्धेर्विषयसुखजलावर्त्तगर्ते प्रवृत्तिम् ।
एतस्मिन् मग्नमग्नो जनयति सुतरां स्वस्य मूर्च्छामतुच्छां
यस्यां सत्यां कथञ्चित् पदमपि न पदाद् गन्तुमीशो मनुष्यः ॥ ५० ॥

सर्वज्ञाज्ञां तदा त्वं कुरु हृदि कमले राजहंसीमिवैतां
बुद्धौ सिद्धान् निधेहि प्रगुणगुणगुरून् श्रीगुरुनाद्रियस्व ।
सद्वाक्यैर्वाचकेन्द्रान् स्तुहि मुनिनिवहान् सम्मुखीनांस्तनुष्व
स्त्रीणां सङ्गं त्यजोच्चैर्यदि महसितमां मुक्तिकान्तामनन्ताम् ॥ ५१ ॥

श्रीवाचंयमराजसङ्घतिलकाङ्घ्रिद्वन्द्वसेवापरो
विज्ञस्वान्तमुदे दिवाकरमुनिर्यां सूत्रयामासिवान् ।
रम्यामत्र तरङ्गिणीं रसभूतां शृङ्गार–वैराग्ययो–
स्तस्यां स्नानविधिं विधाय परमानन्दं लभन्तां जनाः ! ॥ ५२ ॥

कविश्रीमण्डनविरचितम्

## ॥ शृङ्गारमण्डनम् ॥

जीयाज्जगत्यत्र जडानुपेतः स कोपि शृङ्गाररसाम्बुराशिः ।
आकण्ठमाचामति नीलकण्ठो यद्गाहने गौर्यधरामृतानि ॥ १ ॥

जानन्ति यस्यास्यसरोजराजौ वेदान्तवादं मकरन्दमाप्ताः ।
स किङ्करोऽकारि कुरङ्गदृष्टेर्येनाप्यनङ्गो जयतात्स तावत् ॥ २ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगन्ति जेतुश्च जयन्त्यमोघमस्त्रं स्त्रियः स्त्रीकृतशूलपाणेः ।
अर्द्धेन शृङ्गाररसप्रणीतब्रह्मैकतानोपमितेः स्मरस्य ॥ ३ ॥

कवयो नवयोजनाविदः कति सन्तीह च भूतलेऽखिले ।
रसिकोरसि कोऽपि कोविदः कुरुते चारुचमत्कृतिं कृती ॥ ४ ॥

विलासहासेक्षणभूषणानि क्रीडापरीरम्भणभाषणानि ।
तान्येव तासामसितभ्रुवां किं न स्युर्नवीनानि गिरा कवीनाम् ॥ ५ ॥

सदारम्भासमान श्रीरालिङ्ग्या श्रीफलस्तनी ।
यतो रम्भापरीरम्भाः संभाव्यन्ते मुदे दिवि ॥ ६ ॥

सारङ्गनयनासारं संसारं के न जानन्ति ।
यत्सेवयाऽधिगम्येत ब्रह्मानन्दाद्वयोदयम् ॥ ७ ॥

विश्वं यस्य वशंवदं त्रिभुवनोत्संसर्पिदर्पोन्नतेः
कन्दर्पस्य विलोललोचनचलप्रान्तप्रवृत्तिः स्मरः ।
यस्याः सोऽपि कलाविलासविततेस्तस्याः कटाक्षच्छटा-
विक्षेपक्षमवक्षसं विजयिनं जाने पुमांसं परम् ॥ ८ ॥

............................................... भ्रूमङ्ग पुनः,
........................................................ ।
अस्याः कोऽप्ययमित्येवेत्य तदहो धन्या वयं नाकिनां
सङ्कल्पो न मृषा भवेच्च बलवान्नोपेक्षते स्वं प्रभुः ॥ ९ ॥

सदादर्शो दृश्यो युवजनमुखाम्भोरुहकुलं
सहासं संतन्वन्नलमखिलदोषात्ययरुचिः ।
समुद्वेलानन्दाम्बुधिमधि परिप्लावितजग-
न्नवीनस्तन्वङ्ग्या विशदवदनेन्दुर्विजयते ॥ १० ॥

सुमुखीमुखवारिजन्मना स्मितभाजा युवलोचनालिनः ।
यदहो बहुशो बबन्धिरे तदिहान्धकरणं स्मरव्रतम् ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मरमोहमयीममी तमीं तमसस्तोममुचा रुचा कचाः ।
रचयन्त्यतिविस्तरं दिनं वदनेन्दुद्युतयो मृगीदृशः ॥ १२ ॥

हरिणीसदृशा दृशाच्छवपि नीत्वा विपिने निवेशिता ।
तपतस्तपनस्य तेन सा सलिलानीप्सति नाम धामनि ॥ १३ ॥

अनिमिषैः समिषैरपि लोचनैर्मृगदृशामिह यः परिपीयते ।
तममृतं सुकृतैः परितो भृतं कथयताममृतं तदपाकृतम् ॥ १४ ॥

जानन्तु यदि जानन्ति देवा एवान्तरं द्वयोः ।
प्रेयसीभिः प्रियालापात्पीयूषं न पुनः पृथक् ॥ १५ ॥

सच्छायः सुरसाल एष सुदतीलोको भुजावल्लरी
लोलश्रीरधरप्रवाललतितः पत्रावलीलीलया ।
शालसद्बीजराजिराजिततरः पीनस्तनश्रीफलः
शश्वद्यस्य वशंवदोऽस्ति सुरतेऽत्याकाङ्क्षते तेन किम् ॥ १६ ॥

रतिरतिपत्योः क्रीडाकनकगिरी कामिनिकुचद्वन्द्वम् ।
यौवनविधिना विहिताविह मेघं पश्यतोऽग्रतः किं स्यात् ॥ १७ ॥

तीर्थं मन्मथदैवतं शुचिरसस्रोतस्विनी संनम
न्नाभ्यावर्त्तवती घनोन्नतकुचोपासीनचक्रद्वया ।
लावण्यत्रिवलीतरङ्गविलसद्रोमावलीशैवला
बालाऽऽविष्कुरुते दृगञ्चलचलन्मीना नदी नादरम् ॥ १८ ॥

इदमुरुयुगलजनने कदलीकरणं कृता न केनापि ।
यदकदलीकरणं स्मरतप्तानामत्र दृश्यते सुदृशि ! ॥ १९ ॥

दृष्ट्वा रम्भामनयो रम्भास्तम्भान्वितेति नो चलति ।
वरमिति संभाव्येते रम्भास्तम्भौ मृगीदृशामूरू ॥ २० ॥

हंसो मानसवासी यत्पदगतिमेतुमीहते सततम् ।
सुगतितामपहायोपेक्षन्तेऽक्षाणि न क्षणं दक्षैः ॥ २१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुलाननलिनास्याया ललनायाः प्रभुर्भवेत् ।
तुलाकोटियुगं यस्याः समुपास्ते पदद्वयम् ॥ २२ ॥

मनोभुवाद्वैतविवादवच्चिरं वितन्वतोर्नूपुरयोस्तव स्वनम् ।
निजेन नादेन ददाति विश्रमं न मेखला भाति मृगाक्षि ! मे खला ॥ २३ ॥

कम्बुकण्ठि ! तव कण्ठकन्दले चोरयत्ययि ! चिरं मनो मम ।
बाहुबन्धनमिदं मया कृतं नीयतां निबिडतामपि त्वया ॥ २४ ॥

कोटिरोच्छिखरान्नदीपि हरित्सञ्चारिणी दीपिका
शङ्के शम्बरसूदनस्य भवती रागान्धकारेऽध्वनि ।
कामं कामिनि यामिनीपतिमुखीं पाणैर्गृहीत्वा हीत्तमतो
मुञ्चामि क्षणमेणशावनयने न त्वां जितस्ते रुचा ॥ २५ ॥

मन्ये वाचां तव विशदतालब्धये हारयष्टिः
स्वर्गङ्गा तत्समुदयपदं कण्ठदेशं परीत्य ।
त्वत्पीनोच्चैः कुचभृगुशिखारूढमात्रा पतन्ती
मुक्ता भासा स्थगितजगता याति सारूप्यमासाम् ॥ २६ ॥

सम्मोहयन्ती वशमानयन्ती मनो मदीयं च चिरं हरन्ती ।
......................नानाभिचाकस्यापि किं सोदरः ॥ ३१ ॥

प्रियमप्रियकारणं प्रिये ! यदि जानासि ततः कुतो न माम् ।
भुजपञ्जरसङ्कटे कृतं तुदती दन्तनखैः प्रसीदसि ॥ ३२ ॥

हृदि न कर्कशता किल चण्डि ! ते किमुचिता सुतरामपि सम्प्रति ।
कठिनता सततं यदुदीतयो रवगता स्तनयोर्हृदयेन मे ॥ ३३ ॥

यत्ते वक्षसि चण्डि ! पण्डिततया कुर्वे नखाङ्कानहं
......................यच्च त्वन्मधुराधरामृतरसानां ॥ ३४ ॥

..................................................
सदयनं भवत्याविवोष्ठं यदहममरेशोऽस्मि चतुरे ! ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति नये करुणामरुणानने ! चरणयोररुणं तव यावकम् ।
उदयशैलतटेषु शनैः शनैररुणसारथिरेति तथा कुरु ॥ ३६ ॥

कान्तस्तेऽयमुपस्थितः सुनयने ! सत्यं सुखान्तोऽद्य मे
युक्तस्ते पतितापहार इह किं तादृग्न याति स्वयम् ।
यागान्माधव एष ते शुचिपदं ग्रीष्मे वसन्तः कुतो
यद्देवं सखि ! वां तदन्तरपथे मुग्धैव यातास्म्यहम् ॥ ३७ ॥

यस्मिन्पुरः प्रणयिनि प्रणते नताङ्गि !
किं साहसं वहसि दुर्वहभारमारात् ।

..............................................

.............................................. ॥ ३८ ॥

प्रसादितायाः प्रणयेन चाटु पटीयसालिङ्गनमिष्टमेव ।
स्वयंग्रहाश्लेषसुखानि तस्याः कस्याप्यवश्यं स्वरिहानयन्ति ॥ ३९ ॥

पिकेन कामाद्वयमादिशन्ती द्विजेन गीतोपनिषेविनासा ।
वियोगिता रागभृतेषु हृत्सु हृदामिदानीं कुरुते श्रुतिस्था ॥ ४० ॥

चन्दनोपचितसौरभः शुभ्रः शीतलो जलधिकेलिभिः शनैः ।
दक्षिणः क्षणमुपैतु मे मुदे वल्लभः सखि ! न नेति मारुतः ॥ ४१ ॥

पूर्णः कलाकलापेन यापयंस्तापसम्पदम् ।
तनोतु नयनानन्दं कान्तः किं सखि ! नो शशी ॥ ४२ ॥

रसालकुसुमामोदा वासिताशां वरे मधौ ।
आलिङ्गामि निमग्नास्मि वरमानन्दवारिधौ ॥ ४३ ॥

यैरेव शम्बररिपोरपिरोपपुरैर्गौरीगिरीशयुगलं गतमेकभावम् ।
तैः पञ्चता विरहिणमधुना मधौ तु जीयादयं जगति पञ्चशरप्रपञ्चः ४४ ॥

चन्दनानां च सर्पाणां गुणौ मलयमारुते ।
पतियुक्ता वियुक्ताश्च विभज्याददतेऽङ्गनाः ॥ ४५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वदनाऽऽमोदविनिर्जितमधुविभवा कापि कामिनी विरहे।
भ्रमरगुणं निजचापं कर्षति कामे जिजीव निःश्वासैः ॥ ४६ ॥

निजाय पित्रे मनसे ममत्वभूः सतीव्रतापायभयं ददासि किम्।
अनङ्ग किं ते कुसुमाशुगाद्भयं सतीव्रतापायभयं महन्न चेत्॥ ॥ ४७ ॥

मलयमारुतजं भयमालिमे न भवती भवति प्रतिकुर्वती।
व्रज बहिर्यदि नो कुरुषे किमप्युचितमेव भुजङ्गमुपानय ॥ ४८ ॥

कज्जलं नयनयोर्गलज्जलं स्वेदवारहरदङ्गलेपनम्।
तत्र मामपि नियुज्य वैससो व्यत्ययं किमकृथा वृथा विटे ॥ ४९ ॥

स्मरशरकुसुमोद्यद्रेणुधारान्धकारे
पथिक पथि कथं ते यानमानन्दकन्दाः।
विरहविधुरचिन्ता चिन्तयन्ती भवन्तं
कृतदयशयने मा नूनमेकाकिनी भूत् ॥ ५० ॥

नानाविनोदकुशलाः परितोऽपि सख्यो
दीर्घं दिनं गमयितुं प्रभवन्ति मुग्धे।
रात्रौ तु बन्धुजनवागमृतेन सिक्ता
का नाम काममुपयाति सुखं न निद्राम् ॥ ५१ ॥

एकाकिनी विरचिता विधिना ये दोषा
कुर्वन्ति तद्वधिकृतं वितथं न सख्यः।
तस्यास्तु बान्धवजनस्य कुतो दया स्या-
दिष्टो जनस्त्वमिव निर्दयतामुपैति ॥ ५२ ॥

दिष्ट्या स्वयं शुचममुञ्चदशोक एकः
पुष्पाणि पश्यत विटे वदनीति काचित्।
मध्ये सखी सभमये किमिदं वदन्ती
कर्णं निनाय पुरतश्च पदं व्युदास ॥ ५३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अद्यापि नो कुरुबकः कुरुते विकाश-
माशङ्क्यतेऽत्र समये तरवोऽप्यसत्याः ।
तन्नानृतं कुरुबक वृतमद्भुतं चे-
त्पश्याधुना कितव किं तव दर्शनं न ॥ ५४ ॥

प्रतिनिधिर्भवतो दयितो मयाऽनुजगृहे न पदोपनिषन्निति ।
यदि मयि स्मरसि स्मरवैरितां तदव मित्र ! कलत्रधियापि माम्

यस्ते श्रियं तनुरचाहरति स्म मार
तत्प्रेयसी सदहमित्यपहंसि चेन्माम् ।
पादावधि प्रणमिते पि मयाद्यतस्मि-
न्कर्णोत्पलेन निहितेन हितेहितं किम् ॥ ५६ ॥

आस्ते भालतले ललामरचना नेन्दोः कलां कामये
हारो वक्षसि नोज्वलश्च भुजगः पाण्डुत्वमङ्गेषु च ।
पश्यैतद्विरहोद्भवं नभसि तं कण्ठे च कस्तूरिका
तन्नेतद्गरलं तदुग्रमतितः कस्मात्प्रहर्त्ता मयि ॥ ५७ ॥

भवति भवति भूयः पुष्पबाणैः प्रयासो
मदन मदनपायं त्वन्मनो नोत्सहेत ।
अशनिमशनिपर्णि याहि याचस्व यन्मे
हृदयमदयशश्वत्कर्कशं शैलतोऽपि ॥ ५८ ॥

अत्रिलोचनभवस्त्रिनेत्रभूः कीर्तितोऽपि विबुधो जडात्मकः ।
तद्वदेष सखि शीतदीधितिर्निर्दहन्निह न मां विरुध्यते ॥ ५९ ॥

कन्दर्पदर्पपरिमुक्तशिलीमुखाली-
व्यालीढया वनितया स्वमीशम् ।
श्रीनन्दने मधुसुधाकरचन्दनेषु
किं नाम वामवचनं परिचीय तेन ॥ ६० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वालि शंवालि शंसेति विधुन्तुद विधुन्तुद ।
अहिते निहितेऽमुष्मिन्सुखिनः सखि नात्र के ॥ ६१ ॥

अशोकशाली सखि ते माधवोऽस्तु मुदे दृशोः ।
स वेद शोकतामेति न ते शापाद्भयं मम ॥ ६२ ॥

कान्तारभितमाचक्षे वसन्तं सर्वतोऽपि तम् ।
अन्यकान्तोपभोगं तत्कृतमाच्छ सतीह किम् ॥ ६३ ॥

यः कामः किल पञ्चकौसुमशरस्तस्याप्यमी साम्प्रतम्
नाराचा निशितास्तुदन्ति सविषा यन्मां परार्द्धाधिकाः ।
वामो दक्षिणमारुतो मलयजो लेपोऽग्निरेतद्गिरा
विश्वामित्रमयेऽपि कं द्विजमिदं कर्तारमालिस्तु हि ॥ ६४ ॥

विरहो दधाति तेऽखिलं तदिदं किं पतति प्रकुप्यसि ।
न निरागसि किं कदते पतनं चापि विरूप्यता ताप्यते ॥ ६५ ॥

पत्रं पतिं नय ममालि गिरेति वा मे,
धाता न मामिति निहन्ति भवद्वियोगे ।
त्वां प्राणनाथमनिशं हृदि भावयन्ती
प्राणप्रयाणसमयेऽपि भवद्भवामि ॥ ६६ ॥

प्राणैर्विना नो वरिवर्त्ति देहः प्राणा विना त्वां क्षणमक्षमा मे ।
त्वं च प्रवत्स्यन्नसि जीवितेश ! माभूदमीषां खलु सार्थभङ्गः॥ ६७ ॥

न जीवितायां मयि ते वियोगे कान्तापराधो भवता विभाव्यः ।
प्राणाधिकास्त्वं हृदयं न मे यद्यपि क्षणं मुञ्चसि किं करोमि ॥ ६८ ॥

निद्रा महाकैतविनी यतो मां मदेकदुःखाश्च सखीर्विहाय ।
पतिं प्रवासे भजते तमद्य कान्तः कुतो जाग्रदुपेक्षते माम् ॥ ६९ ॥

यन्मया क्षणमुपेतनिद्रया प्रातरद्य सखि ! ते श्रुतं मुखात् ।
स्वं परार्द्धगुणमेत्य याचिता देहि देहि तदहो तदेव मे ॥ ७० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वामो मुहुर्मुहुरयं स्फुरणच्छलेन किं भाषते विदुषि मे कथय त्वमूरुः ।
संवाहनानि पतिपाणिसरोरुहस्य नूनं नखाङ्कनमयेन बुभूषुरद्य॥ ७१ ॥

नोवेदद्यसमेतिमेतिविरहव्याधेरधन्वन्तरिः
कान्तः कान्ततनुर्ननु प्रणयिना प्राणाः समं संयताः ।
तस्यास्ये मम चन्द्रमस्यपि मनः प्रागेव लीनं पुन-
र्याचे तद्विरहानलं दहतु मे देहं स नान्योऽनलः ॥ ७२ ॥

मृतामृते तं निजरूपसम्पद्विज्ञानसर्वस्वमिमां प्रमाय ।
संयोजयाम सजयेन धाता जवेन भीतः स्वयशोविनाशात् ॥ ७३ ॥

वियोगिनी प्रच्युतपत्रराजी तापाकुला जीवितमुच्यमाना ।
घनाघनेनेव वनस्थली सा निर्वापिता वल्लभसङ्गमेन ॥ ७४ ॥

तावद्दुःखमहाभरादभिदुरे स्मृत्वायसा निर्मिते
दम्पत्योरुरसी वियोगदहने क्षिप्त्वा पुरा वेधसा ।
निश्वासश्वसनैश्चिरायधमता जानामि यन्तापिते
सद्यस्त्वद्य तदेकतां गमयितुं गाढे परीरम्भणे ॥ ७५ ॥

पत्युः परीरम्भणसम्भवोऽस्या न स्याद्गिरां गोचर एष हर्षः ।
भृतेऽन्तरे सत्यपि रोमराजीमुद्धर्षयेऽन्यो बहिराविरास्ते ॥ ७६ ॥

अनङ्गतप्तं मिलदक्षसर्यमालिङ्गि या दयितेन चेतः ।
तस्मानसे मग्नमतोयमस्यां न स्तम्भभावसमुदे तु कस्मात् ॥ ७७ ॥

चञ्चलेन चलतादिशा दृशोर्प्यचलेन यदनङ्गमङ्गना ।
जीवयत्यधरदानपानतः सानमर्त्यामिमरं करोति किम् ॥ ७८ ॥

भाले लोचनयोश्च गलयुगले कृत्वाचिरं चुम्बनं
प्राप्तानङ्गरसातिरेकमनसा माद्यत्रतायासवान् ।
विश्रीतो दयिताकुचस्थलभुवि प्रीत्यार्पितं प्रेयसी
बिम्बोष्ठामृतपानकं पिबति यः प्रत्यङ्गपुण्याभृता ॥ ७९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विपरीतो रतिपतिर्येन स्त्री पुरुषायते ।
अधःकृतोऽपि पुरुषः सन्महाप्रमदायते ॥ ८० ॥

रतातिरेके निजहारवल्ली धमिल्लमुक्ता कुसुमैः क्षरद्भिः ।
यं प्रेयसी पूजयतेति गौरी शिवं तमन्यं व (वः/वा) विं ब्रवीमि॥ ८१

कान्ताकुचस्थमकरीरचनाङ्कितोरा-
स्तद्दन्तदंशनयनाञ्जनमञ्जुलोष्ठः ।
तज्जाग्रदग्रकरजां च न रोचमानः
स्वं वीक्षतेऽत्र मुकुरे सुकृती दिनादौ ॥ ८२ ॥

चिकुराः कामकोदण्डगुणाः कृशतनोस्ततः ।
रते पुष्पाणि तद्बाणाः पतन्ति दयितोरसि ॥ ८३ ॥

ताम्बुलरागारुणनेत्रवर्त्मा पृष्ठा स्फुरत्कङ्कणलक्षणश्रीः ।
मुक्तावलीलाञ्छनलक्ष्यवक्षाः पतिः प्रियां लज्जयते सखीषु॥ ८४ ॥

नासत्यता कितव तेऽभिनवा विभाति
यन्मानुषीमपि रसेन चिकित्ससीति ।
गीर्वाण एव यदसि प्रति मां ब्रुवाणा-
स्त्वां सुराधिकगिरं प्रति किं ब्रवीमि ॥ ८५ ॥

वसति सका भवदन्तर्हृदयं निर्भिद्य माय निर्यातु ।
समहिमकुचकटिचक्रां मामयि चित्ते कथं कुरुषे ॥ ८६ ॥

यदभिदधासि भवत्या हृदयं मे बद्धमित्यहो न मृषा ।
अथ तन्मया विमुक्तं यातु यतो रोचते ततो रमताम् ॥ ८७ ॥

सखित्वादास्येन्दु वचोमृतानि किं मां पिबन्ती न सहेत निद्रा ।
त्वया तमिस्रामखिलमपीयं यदद्य भर्त्तुर्नयनान्निषिद्धा ॥ ८८ ॥

आयाति वारिरुहगन्धवहे समीरे
तारस्वरेण सखि कूजति ताम्रचूडे ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निद्रावियोगमनुमीय मया मुहूर्त-
माश्लेषबन्धनमभेदि न नायकस्य ॥ ८९ ॥

नीवीमद्य किमलि यद्द्रढयसे चक्रेऽपराधोऽनया
श्रान्तः कान्तकरोऽत्र किं नहि नहि प्राप्ते स्पर्शने
स्वनप्रच्युतबन्धनाजनिततः किं कथ्यते किं मया
लज्जामोहमनोभवैर्विधुरया किञ्चित्समाज्ञासि न ॥ ९० ॥

सर्वतो मणिनिर्माणे विजितेऽपि गृहान्तरे।
कथंचन चिरान्मुग्धां लज्जामत्याजयस्पतिः ॥ ९१ ॥

निर्भररतविश्रामे दयितोरस्तरलनायकं पीत्वा।
सहसा रमणं मुग्धा हन्ति सरोजेन मेखलाबद्धम् ॥ ९२ ॥

कान्तेन नीते तरसा दुकूले दीपेऽपि शान्ते निजचूर्णमुष्ट्या।
स्वमेखलाहारमणिप्रकाशे नवोढयालिङ्गितमां स्वयं सः ॥ ९३ ॥

रात्रौ किं किमकारि तत्र गतया कान्ते भवत्या मुहुः
पृष्ट्या कैतवदक्षयेति निजया सख्याभिमुख्या पुरः।
तत्तद्रात्रिकृतं तथैव सकलं संभावयन्ती क्वचि-
त्पृष्टेनेति गिरा न्यमज्जदहह व्रीडाम्बुधौ काचना ॥ ९४ ॥

वक्षोभक्षोभयन्ती तरलतरचलल्लोचनप्रान्तबाणै-
र्गात्रं भित्वातिमात्रं खरनखरमुखैराविशन्ती दशन्ती।
दोषारोषादशेषामपि तदनुनयं नाददानाददाना
तापं या पञ्चबाणात्तदपि किमु न सा वल्लभा वल्लभास्यात् ॥ ९५ ॥

आयातायासमाया स्मरणपथमपि प्रेयसीध्येयसीमा
चेतस्येत भ्रमेतत्सृजति वजति यत्तामृतेनामृतेन।
व्रीडाक्रीडासनीडासनहसितमुहुर्दर्शनस्पर्शनाद्यं
तस्याः कस्यात्र न स्यात्सकलकरणहृन्मोहसन्दोहहेतुः ॥ ९६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्फुरत्तारमणिश्रेणिमती गुणवती सती ।
अक्षमालाऽथवावाला करग्राहोचिता सताम् ॥ ९७ ॥

कान्ताकुचाकृतिदृशापि निपीयमानं
श्रीशैलसानुयुगलं न महो मुदे किम् ।
युक्ता गुणेन परितो यदुपासमाना
मुक्ता अपि स्वनयनातिथयो भवन्ति ॥ ९८ ॥

कामं नाम विपर्यये दयितया बद्धस्य मुक्तिः परं
मुक्तिः स्नेहसमीरितान्नतु परं मन्ये क्षरादक्षरम् ।
कान्तालिङ्गनसंभवान्नहि महानन्दः प्रमोदात्पृथक्
तत्किं तामपहाय कैश्चिदहह ब्रह्माप्तये क्लिश्यते ॥ ९९ ॥

यौवनस्था वनस्था वा सुन्दरी यदि वा दरी ।
रागेण वा विरागेण सेव्यतां सुरतेच्छया ॥ १०० ॥

नैपुण्यार्जितपुण्यपुण्यमतुलः सर्वेन्द्रियार्थोदयः
कन्दर्पैकविलासवासवसतिः संसारसारं परम् ।
सा सारङ्गविलोचना विजयते यस्याः परीरम्भणे
योगं कामिजनोऽनुभूय विशदानन्दाद्वयं विन्दति ॥ १०१ ॥

नित्योन्नीतोरुधराधरभरविगलद्वारिधाराभिषिक्तः
स श्रीमान्मालवोऽसौ जगति विजयते सर्वनीवृन्नरेन्द्रः ।
सुच्छायौवौरिवीरव्रजभुजमहसाक्रान्तभूकान्तसेव्यो
यस्मिन्सद्वंशशाली स च किल सकलो मण्डपो दुर्गमास्ते ॥ १०२ ॥

यस्याधीशो विधत्ते प्रणमदवनिभृद्भूरिकोटिरहीर
ज्योर्निराजितांह्रिप्रबलरिपुबलारण्यदावप्रभावः ।
श्रीमानालमासाहिससमररसिको बाणधाराभिवर्षी
चञ्चच्चक्षुस्तडागानरिनृपसदृशामुत्तराम्भः प्रवाहान् ॥ १०३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राचीनाः प्राप्तचीना अपि कपिकुलवद्दाक्षिणात्याः क्षणात्या
क्षोणीः क्षोणीमहेन्द्रा विजहति हतिभिर्जर्जरा गूर्जराश्च ।
अन्ये मन्ये नमन्ये चलचलनिलया किं च सर्वेप्यगर्वा
यस्मिन्नालंमासाहिक्षितिभृति विहितप्रस्थितौ दिग्जयार्थम् ॥ १०४ ॥

श्रीमालोरुकुले किलातिविमले जातो यदीयोभव-
न्मन्त्रीसोनगिरान्वयः श्रीतदयः श्रीझञ्झणो नाम सः ।
अद्‌बस्तैः शिशिरादिकैरिव लसत्सत्यक्षयं राजितो
वंशो यस्य विभाव्यते स्म भुवने षड्‌भिस्तनूजन्मभिः ॥ १०५ ॥

प्राक्‌पुण्यकार्मणवशीकृतसिन्धुजेषु
तेषु श्रीतेषु समतामपि धीरधीषु ।
सर्वज्ञसंज्ञमहसः स पुनः प्रसादा
च्छ्रीबाहडः समभवद्‌बहुनागरीयान् ॥ १०६ ॥

श्रीसङ्घप्रभुतामितस्य विमलाप्राचीनपुण्याचल-
श्रेणीसत्परिम एक उदितो यस्यात्मजो मण्डनः ।
यः सारस्वतकाव्यमण्डनकविर्दारिद्र्यभूभुत्पवि-
र्विज्ञानां च यथा रविर्विजयते तीव्रप्रतापैर्भुवि ॥ १०७ ॥

श्रीसर्वज्ञपदाम्बुजालिशिरसा धर्मैकधामोरसा
विद्वन्मण्डनपण्डितेन कविना कान्तेन तेनामुना ।
श्रीमन्मण्डनसंज्ञकेन कविना शृङ्गारभङ्ग्या सत
श्लोकीश्लोक्यतमा समा विरचिता पीयूषपाथोधिना ॥ १०८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ नानावृत्तकप्रकरणम् ॥

नमिऊण जिणं जय जीवबंधवं धम्म कणय कसवट्टं ।
वुच्छं धम्ममईणं धम्म विसेसं समासेण ॥ ॥ १ ॥

नाणा चित्ते लोए नाणा पासंडि मोहिय मईए ।
दुक्खं निव्वाहेउं सव्वण्णुवएसिओ धम्मो ॥ २ ॥

वत्तणुवत्त पउत्तो बहु कवि कोउसु बद्ध सण्णाहो ।
अविमग्गिय सब्भावो लोओ अलिओ य बलिओय ॥ ३ ॥

धम्मो धम्मुति जगम्मि घोसए बहुविहेहिं रूवेहिं ।
सो भे परिक्खियव्वो कणगव्व तिहिं परिक्खाहिं ॥ ४ ॥

न य तस्स लक्खणं पंडरं च नीलं च लोहियं वावि ।
एक्कोसि नवरि भेओ जमहिंसा सव्वजीवेसु ॥ ५ ॥

लद्धंति सुंदरं चिय सव्वो घोसेइ अप्पणोपणिय ।
केइएण वि घित्तव्वं सुंदर सुपरिक्खिउं काउं ॥ ६ ॥

नि[?ने]च्छंति विक्किणंता मंगुल पणियं पि मंगुलं वुत्तं ।
सव्वे सुंदर रागं उच्चय रागं च घोसंति ॥ ७ ॥

तो भे भणामि सव्वे नहु घोसण विम्हिएहिं होयव्वं ।
धम्मो परिक्खियव्वो तिगरण सुद्धो अहिंसा ए ॥ ८ ॥

हेरण्णिओ हिरण्णं वाहिं विज्जो मणिं च मणियारो ।
धाउं च धाउवाई जाणइ धम्मट्ठिउ धम्मं ॥ ९ ॥

धम्मं जणो वि मग्गइ मग्गंतो वि य न जाणइ विसुद्धिं ।
धम्मो जिणेहिं भणिओ जत्थ दया सव्व जीवाणं ॥ १० ॥

जह नयरं गंतुमणो कोइ भीमाडविं पविसिज्जा ।
पंथ समासग्गाही अपरिक्खिय पंथ सब्भावो ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पंथ सरिसा कुपंथो बहुं च कणयसरिसं न य सुवण्णं ।
धम्मं सरिसो अहम्मो नायव्वो बुद्धिमंतेहिं ॥ १२ ॥

जो न हिंसइ सो धम्मो जो न भुंजइ सो तवो ।
जो न लब्भइ सो साहू जो न रूसइ सो मुणी ॥ १३ ॥

नय मुंडिएण समणो न ओंकारेण बंभणो ।
न मुणी रण्ण वासेण कुसचीरेण न तावसो ॥ १४ ॥

तवेण तावसो होइ बंभचेरेण बंभणो ।
पावाइं परिहरंतो परिवा[य] उत्ति वुच्चइ ॥ १५ ॥

तो समणो जइ समणो[?सुमणो] भावेणय जह न होइ पावमणो ।
सयणेय [पर] जणेय समो समो य माणावमाणेसु ॥ १६ ॥

नत्थि असि कोइ वेसो पिओ य सव्वेसु चेव जीवेसु ।
एएण होइ समणो एसो अण्णो वि पज्जाओ ॥ १७ ॥

जाइवि अप्पमाणा कुल ववएसो विसुद्धओ डिंभो ।
पंडिच्चंपि पलालं सीलेण विसंवयंतस्स ॥ १८ ॥

वेया वागरणं वा भारह रामायणं पुराणाइं ।
जइ पढइ जीववहओ दुग्गइगमणं फुडं तस्स ॥ १९ ॥

किं ताए पढियाए पय कोडीए पलालभूयाए ।
जत्थित्तियं न नायं परस्स पीड़ा न कायव्वा ॥ २० ॥

च्छंद सर सद्द जुत्तेवि पवयणे सक्क[य] अक्खर विचित्ते ।
धम्मो जेहिं न नाओ नवरि तुसा खंडिया तेहिं ॥ २१ ॥

सम विसमंपि पढंता विरया पावेसु सुग्गइं जंति ।
सुट्ठुवि सक्कय पाढा दुस्सीला दुग्गइं जंति ॥ २२ ॥

बंभाणस्स हरस्स व अण्णस्स व जीवधायण रयस्स ।
अवसस्स नरय पडणं जइ से सव्वं-जगं पक्खे ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बाहत्तरि कला कुसला पंडिय पुरिसा अपंडिया चेव ।
सव्व कलाणं पवरं जे धम्म कलं न याणंति ॥ २४ ॥

संजम कला तव कला विण्णाणकला विणिच्छिय कला य ।
जस्सेसा नत्थि कला सो विकलो जीव लोगम्मि ॥ २५ ॥

पढइ नडो वेरग्गं निव्विज्जिज्जा बहुओ जणो जेण ।
पढिऊण तं तह सढो जालेण जालं समोयरइ ॥ २६ ॥

एयं नड पंडिच्चं भट्ठचरित्तं न सुग्गइं नेइ ।
लोयं च पण्णवेई गईय से पाविया होई ॥ २७ ॥

तिण्णिसया तेसट्ठा पासंडीणं परुप्पर विरुद्धा ।
नय दूसंति अहिंसंतं गिण्हह जत्थ सा सयला ॥ २८ ॥

जह उड्डुवइम्मि उइए सयल समत्थम्मि पुण्णिमा होइ ।
तह धम्मो वि दयाए होइ समत्थो समत्ताए ॥ २९ ॥

जो गिण्हइ कायमणी वेरुलियमणि त्ति नाम काऊण ।
सो पच्छा परितप्पइ जाणग जणो विउसंतो ॥ ३० ॥

न जलं न जडा न मुंडणं नेव य वक्कल चीवराणि वा ।
नरस्स पावाइं विसोहयंति जहा दया थावर जंगमेसु ॥ ३१ ॥

न धम्मो आसमे वसइ न धम्मो आसमे वसंतस्स ।
हियए आसमो तस्स जस्स निक्कलुसा मई ॥ ३२ ॥

किमदंतस्स रण्णेण दंतस्स वि किमासमे ।
जत्थ तत्थ च सदंतो तं रण्णं सो य आसमो ॥ ३३ ॥

वणे वसउ दुस्सीलो गामे वसउ सीलवं ।
जत्थ सीलं तहिं धम्मो गामेसु नगरेसु वा ॥ ३४ ॥

जिणो कोहं च माणं च माया लोभं च निज्जिणे ।
अभयं देहि जीवाणं गंगाए विय पुक्खरं ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोहग्गी माणग्गी मायग्गी निज्जिणेह लोहग्गी।
ता होहि आहियग्गी किं ते समिहाहि दड्डाहिं ॥ ३६ ॥

जइ डहसि भरसहस्सं समिहाणं चेय मंतजुत्ताणं।
जीवेसु वि नत्थि दया सव्वंपि निरत्थियं तस्स ॥ ३७ ॥

कोहस्स य माणस्स य माया लोभस्स निग्गहो नत्थि।
किं काहिंति जड़ाओ तिदंड मुंडं च छागे वा ॥ ३८ ॥

जइ वहसि केस भारं च्छारं खोरं च चीवरं दोरं।
नय वहसि सीलभारं वहसि य भारं अणत्थाणं ॥ ३९ ॥

कुव्वे णउरं पट्टं पिट्ठी घट्टा जडाकलावेण।
पासं च कुंडियाए तहावि नो जाणिओ धम्मो ॥ ४० ॥

कुव्वय तिदंडधारी निल्लज्जो अहिय वड्डु चुक्कारो।
तव नियमेसु असारो हिंडइ पच्चक्खओ गोणो ॥ ४१ ॥

तिण्णेव वहसि दंडे सगडं वा वहसि वेणु दंडाणं।
रत्तस्स नत्थि मुक्खो सद्द फरिस रस रूव गंधेसु ॥ ४२ ॥

नर सिर कवाल माला न तिदंडं कुंडिया जडा मउडो।
नवि छारो नवि दोरो सारो धम्मस्स जीवदया ॥ ४३ ॥

नय धम्मम्मि पमाणं नग्गो मुंडी जडी व कुच्ची वा।
नय नव खंड सुसीविय चीवर धरणं दया धम्मो ॥ ४४ ॥

सोहइ आहियग्गी समणो वा तावसो य सा चेव।
विसया जस्स वसम्मी विसयाणं जो वसे नत्थि ॥ ४५ ॥

गंगाए जउणाए उब्बुड्डा पुक्करे पहासे वा।
पुरिसा न हुंति चुक्खा जेसिं न चुक्खाइं कम्माइं ॥ ४६ ॥

चंडाला सोयरिया केवट्टा मच्छ बंधया पावा।
तित्थ सएसु वि ण्हाया नवि ते उदएण सुज्झंति ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पड मइल पंक मइला धूलीमइला न ते नरा मइला ।
जे पावकम्ममइला ते मइला जीवलोगम्मि ॥ ४८ ॥

सुचिरंपि धोयमाणो बाहिरओ सुबहुएण उदएण ।
नवि सुज्झंति मणुस्सा अंतो भरिया अमिज्झस्स ॥ ४९ ॥

जहा कालो इंगालो दुद्ध द्धोओ न पंडुरो होई ।
तह पावकम्ममइला उदएण न निम्मला हुंति ॥ ५० ॥

सच्चं सोयं तवं सोयं सोयमिंदिय निग्गहो ।
सव्व भूय दया सोयं जल सोयं च पंचमं ॥ ५१ ॥

एयं पंचविहं सोयं पंचिंदिय विसोहणं ।
जेसिं न विज्जए देहे ते मूढा सोय वज्जिया ॥ ५२ ॥

त ण्हाएणवि तणु सोही करेई अवणेई बाहिरं पंकं ।
एए उदयस्स गुणा नहु उदयं सुग्गइं नेइ ॥ ५३ ॥

सच्चेण संजमेण य तवेण नियमेण बंभचेरेण ।
सुद्धो मायंग रिसि नय सुद्धो तित्थ जत्ताहिं ॥ ५४ ॥

तित्थं जणो वि मग्गइ तित्थस्स विणिच्छियं अयाणंतो ।
तित्थं जिणेहि भणियं जत्थ दया सव्व जीवाणं ॥ ५५ ॥

नाणोदय पड़िहच्छं धिइ पालीयं चरित्त सोवाणं ।
अप्पा जेसि न तित्थं तित्थं खु निरत्थयं तेसिं ॥ ५६ ॥

किं निग्गुणस्स तित्थं काही हिंसालिए पवत्तस्स ।
परधण परदार रयस्स लोह मोहाभिभूयस्स ॥ ५७ ॥

जीवे न हणइ अलियं न जंपए चोरियं पि न करेइ ।
परदारं पि न वच्चइ घरेवि गंगा दहो तस्स ॥ ५८ ॥

जीवे हिंसइ अलियं पि जंपए चोरियं पि य करेइ ।
परदारं चिय गच्छइ गंगावि परम्मुहा तस्स ॥ ५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एगट्ठाणम्मि ट्ठिओ अहिंसेयं कुणइ सव्व तित्थेसु ।
जो इंदिए निरुंभइ अहिंसउ सच्चवाई य ॥ ६० ॥

वास सहस्संपि जले उब्बुड्डुं निब्बुड्डणं जइ करेइ ।
जीव वहओ न सुज्झइ सव्वेणवि सायर जलेण ॥ ६१ ॥

मच्छाय कच्छपा चिय गाहा मयराय सुंसमाराय ।
हिंडिज्ज विमाण गया जइ उदयं सुग्गइं नेइ ॥ ६२ ॥

जल मज्जणेण अंगं फुट्टं हुट्ठाय आयमंतस्स ।
नय कोइ गुणो पत्तो सीएण व मारिओ अप्पा ॥ ६३ ॥

जइ मट्टियाए सग्गो उदएणं मीलियाइं संतीए ।
मण्णामि कुंभकारा सपुत्त दारा गया सग्गं ॥ ६४ ॥

जइ थुणइ देवयाओ लोए हिंडइय सव्व तित्थाइं ।
जीवेसु वि नत्थि दया सव्वं पि निरत्थयं तस्स ॥ ६५ ॥

तप्पउ य उद्धबाहु होऊ सेवाल-मूल-फल-भक्खी ।
कंटय पह सयणं वा करेउ पंचग्गि तावं वा ॥ ६६ ॥

चरउ य वयाइं नाणा विहाइं हिंडउय सव्व तित्थाइं ।
वेसं च कुणउ किंची सीलेण विणा न से किंचि ॥ ६७ ॥

मोणं वा आसेवउ आसम-वासं अरण्ण-वासं वा ।
हियय़ं जस्स न सुद्धं सव्वमसुद्धं परिकिलेसं ॥ ६८ ॥

उज्जइय चीवराइं जइ हिंडइ नग्ग वेस भावेणं ।
जीवेसु य नत्थि दया सव्वंपि निरत्थयं तस्स ॥ ६९ ॥

तव नियम दिक्खियाणं पंचिंदिय अग्गिहुत्त ठवियाणं ।
जीवदय जण्णियाणं दिण्णंपि महाफलं तेसिं ॥ ७० ॥

सच्चं च जस्स कुंडं तवो य अग्गी मणं च समिहाओ ।
इंदिय गामा य पसू सयायणे दिक्खिओ होइ ॥ ७१ ॥



For Private And Personal Use Only

धम्मा वणे महल्ले पसारिए सव्व वणिय पासंडे ।
सुपरिक्खिऊण गिण्हह इत्थहु वंचिज्जए लोओ ॥ ७२ ॥

जेसिं पव्वइयाणं धणं च धण्णं च जाण जुग्गं च ।
कय विक्कएण वट्टइ सो पासंडो न पासंडीओ ॥ ७३ ॥

धम्मलिंगं च से हत्थे ववहारोय वट्टइ ।
का एसा नाम पवज्जा नेव आडी न कुक्कुडो ॥ ७४ ॥

आडीए मयणमत्ता ए रामिओ वण कुक्कुडो ।
तेण सपिल्लओ जाओ न च आडी न कुक्कुडो ॥ ७५ ॥

सो चेव य घरवासो नवरिं परियत्तिओ य सो वेसो ।
किं परियत्तिय वेसं विसं न मारेइ खज्जंतं ॥ ७६ ॥

सव्वो भणइ च देसे मज्झ कुलं उत्तमं च विउलं च ।
कह से पत्तिययव्वं सीलेण विसंवयंतस्स ॥ ७७ ॥

सव्वाओवि नईओ कमेण जह सायरम्मि निवडंति ।
तह भगवई अहिंसा सव्वे धम्मा [समज्जंति] ॥ ७८ ॥

तो भे भणामि सव्वे जावंति समागया मम सुणेह ।
चरह परलोग हिययं अहिंसा लक्खणं धम्मं ॥ ७९ ॥

तो अरय विरय विमले सयं पहे देव दुंदुहि निनाए ।
सग्गम्मि चिर वसिहह सुचरियं चरणाचरिह धम्मं ॥ ८० ॥

नाणंकुसेण रुंधह मण हत्थिं उप्पहेण वच्चंतं ।
मा उप्पह पड़िवण्णो सीलारामं विणासिज्जा ॥ ८१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ।। बालावबोधप्रकरणम् ।।

पणमवि जिणवइ देउ गुरू, अनु सरसइ सुमरेवि ।
धम्मुवएसु पयंपियइ, सुणि अवहाणु करेवि ॥ १ ॥

दुलहउ माणुस जम्म लहि, जे नवि धम्मु करंति ।
ते असरण दुह-सय-कलिय, चिरु संसारि भमंति ॥ २ ॥

जुव्वणि भुंजउँ विसय-सुहु, वुड्डउ धम्मु करेसु ।
एहउँ बाल-पयंपियउ, मा चि...(त्ते) वि धरेसु ॥ ३ ॥

वायाहय-धयवड़ समउ, जीविउ चंचलु जेण ।
बालत्तणि वि विवेइ-जण, धम्मि पयट्टहि तेण ॥ ४ ॥

इह जुव्वण अविवेय-घरु, सव्व - अणत्थ - निहाणु ।
एइण जो न विडंबियउ, सो पर भुयणि पहाणु ॥ ५ ॥

जाव न पीड़इ देहु जर, जाव न वाहँहि वाहि ।
जा इंदिय सुत्थत्तणउँ, ता सद्धम्मु पसाहि ॥ ६ ॥

पिय-जणु जुव्वणु धणु सयणु, सयलु वि लोइ असारु ।
नरइ पडंतह पावियह, नावि केणइ साहारु ॥ ७ ॥

घर-वावारि वि मोहियहँ, सयलु समप्पइ जम्मु ।
खणुवि न पावहिं पावयर, जित्थु ए साहहि धम्मु ॥ ८ ॥

थेवउ आउ सुतुच्छु सुहु, पय पय आवय-ठाण ।
दुक्कड-फलु अइ कडु यर, सधम्मु करेसु सुजाण ॥ ९ ॥

जिणि निज्जिय राणइ रिवु, जो इंदिहिं कय सेवु ।
निम्मलु नाणु पईवु जसु, सो पणमिज्जइ देवु ॥ १० ॥

पंच-महव्वय-भूसियउ, परिपूरिउ सुगुणेहिं ।
उवसम-निहि सुय-नीरनिहि, गुरु लब्भइ पुण्णेहिं ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सव्व-जिएसु वि दय करहिं, एस सधम्मह मूलु ।
एय विहूणउ तवु जवु वि, सव्वु वि भव-अणुकूलु ॥ १२ ॥

अलियउँ वयणु न भासियइ, दोस-सहस्स-निवासु ।
जेण हणिज्जइ सुह-निलउ, सव्वत्थ वि वीसासु ॥ १३ ॥

इह-पर-लोइ विडंबणहँ, विवि जह जइ बीहेहि ।
ता कइयवि पर-धण-हरणि, मं जिय मणु विविहेहि ॥ १४ ॥

जइ उप्पा(?ग्घा) डण कुड्डियउ, पुणु पुणु दुग्गइ-दारु ।
ता पइ-दिणु सच्छंद-मइ, जिय अहिलसु पर-दारु ॥ १५ ॥

जइ सोक्खिण्णुहि निव्विण्णु तुहु, जइ संसारिं कज्जु ।
ता परिगहि अ-पमाणि जि य, सुइरु निरंतर रज्जु ॥ १६ ॥

राई-भोयणु परिहरहु, निय-मणि नियमु धरेहु ।
जेण उवज्जिय सयल गुण, सिव-दिव-लच्छि वरेहु ॥ १७ ॥

रत्तिहिं हिंडहिं रयणियर, भुक्खिय रंक-समाण ।
तहिं उविट्ठउँ ते जिम्वहिं, जे निसि जिम्वहिं अयाण ॥ १८ ॥

मेह पिवीलिय उवहणइ, मच्छिय वम्वणु करेइ ।
जूयलोय स्संजणइ, कोलिउ कोढु वि होइ ॥ १९ ॥

लग्गिइ गलियइ दुक्खयरू, कंटउ दारुण दारु ।
भक्खिउ बालु वि तक्खणिण, सरु भंजइ अइचारु ॥ २० ॥

भुंजिज्जंतउ वंजणिहिं, समु अलि विंथ[?ध] इ तालु ।
निसिभोयणु बहुविहु हवइ, आमय जालु-करालु ॥ २१ ॥

दिवसि वि जे अइ-सुहुम जिय, अइ-जत्तिण दीसंति ।
कुंथुं पभिइ दीवाइ सुठि, ते निसि किम्व दीसंति ॥ २२ ॥

जइ किर केवल-नाणिणु वि, निसिभोयणु न करंति ।
ता छउमत्थ पमायपर, किह दूरिण न मुयंति ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संसज्जहि आहार निसि, जिय तिण-सम रस-वण्ण।
ते जाणंता किम गिलहि, जे नर सहिय सकण्ण ॥ २४ ॥

जे रयणिहिं दियहि वि अबुह अच्छहिं आहरम[।]ण।
ते रक्खस धर-भार-यर अहवा पसु अ-विसाण ॥ २५ ॥

जे दिणु मिल्लिवि मूढ़-मइ, रयणिहिं परिभुंजंति।
ते कप्प-द्दुमु अवगणिवि, विस-वल्लिहिं रज्जंति ॥ २६ ॥

जे निसि-भोयणि रइ करहिं, ते मय हुंति सियाल।
अहि विच्छिय गोहा नउल, घूयड़ काय बिडाल ॥ २७ ॥

निसि-भोयणि निरयहँ नरहँ, दुलहउ परि भवि होइ।
सयणु असणु धणु-कणु वसणु, जिह अंधह वर जोइ ॥ २८ ॥

दिणु अवहीरि विहावरिहिं, जे धम्मत्थु जिम्वंति।
ते संति वि पल्लवि अबुह, ऊसरि बीउ ववंति ॥ २९ ॥

जे विरमहिं निसि भोयणहँ, वंछिय सिव-पय-वास।
तह धण्णह सुविवेइयह, अद्धव जम्मुववास ॥ ३० ॥

जं सव्वण्णुहिं वारियउ, सत्थि अणेय-पयारु।
जम्म-दुगिवि निसि-भोयणह, तसु सोहणु परिहारु ॥ ३१ ॥

अहिं परिचत्तउ निसि-असणु, जाणेविणु परमत्थु।
तह पर-अप्प सुहावहह, भवि भवि मंगल मत्थु ॥ ३२ ॥

मज्जु विहोड़इ मइ-विहवु जिव कंजिउ वर-खीरू।
तेण विहूणउ दुह लहइ, तो तं पियइ न धीरु ॥ ३३ ॥

खण मित्तेण वि जो हरइ, जाया जणणि विहाउ।
भूरि विडंबण कुल भुवणु, सो कह होउ सुसाउ ॥ ३४ ॥

असमंजस चिट्ठिय जणइ, मज्जु अणेय पयार।
जिहिं दिट्ठिहिं विसिट्ठयण, लज्जहिं नट्ठवियार ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खमु-दमु-संजमु-तवु-नियमु, विहलइ सयलु वि मज्जु ।
मोहइ वियलइ इंदियइं, हालाहलु जिम्व सज्जु ॥ ३६ ॥

मइरा मइ मोहिय मइहिं, जायव कुमर वरेहिं ।
दीवायणु खलियारियउ, बहु दुवयण पहरेहिं ॥ ३७ ॥

दे वो हुइण सकोवणिण, धण जण कणय समिद्ध ।
तेण सदड्ढी वारवइ, तइलोक्के वि पसिद्ध ॥ ३८ ॥

जो मज्जह चुलउ वि पियइ, सज्जिर अणुवहु जंतु ।
भव सायर गंभीरि चिरु, सो मज्जइ मज्झंतु ॥ ३९ ॥

दुग्गइ पहि थिरु संबलउं, दीसंतउ बीभच्छु ।
मायंगह अविसेसयरु, मंसु न खाइ जु सच्छु ॥ ४० ॥

कथा यत्तु जु वण्णियइ, सुर भोयह तम सव्वु ।
गंसु जु भक्खइं नर तिरिय, निग्घिण ताह नसच्चु ॥ ४१ ॥

जसु खाएवा मंसु मइ, डाइणि जिम्व अइ किच्छ ।
दिट्ठउ दिट्ठउ जीवड़उ, मारेवा तसु इच्छ ॥ ४२ ॥

सव्वुवि जिउ सुक्खइ, महइ, तइ कउ विण धम्मेण ।
सो सव्वत्थ विवण्णियइ, सिज्झइ दय करणेण ॥ ४३ ॥

जे रसणि[इं] दिय लंपडा, मंसासणि आसत्त ।
ते हिंसक प्पलया सरिस, अइ दूरिण परिचत्त ॥ ४४ ॥

भक्खत्ता इर वत्थजण, सत्थ निबंधण दिट्ठ ।
तिण संसत्त अणंत जिउ, मंसु न खाइ विसिट्ठ ॥ ४५ ॥

कह मण्णह इत्थि त्तणइं, तुल्लइ माइ पियाहं ।
भिण्णउं भिण्णउं आयरणु, जुत्तेउं होइ पियाहं ॥ ४६ ॥

तेण जु केइवि इउ भणहिं, धण्णु वि पाणिहिं अंगु ।
मंसु वि तंपिव भक्खणिउं, एउ न जुत्तिहिं चंगु ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पाणंगुवि दुद्धाइ इह, सव्विहि इट्ठउ भक्खु ।
लोहिय हड्डु प्पभिइ पुणु, किण कारणिण अभक्खु ॥ ४८ ॥

बहुह वि एगिंदियहं बहु न पलासण सम रुद्द ।
घण कोडा कोडिवि जलह, किं अवहरइ समुद्दु ॥ ४९ ॥

जो काऊण वि ज्झाणु तवु, मंसासणि मणु देइ ।
सो गउ जिम्व मज्जेवि लहु, तणु रेणुहिं गुंडेइ ॥ ५० ॥

सव्विहिं तित्थिहिं जत्तकय, सव्वइं दाणइं दिण्ण ।
जिण आजम्मु दि आयरिय, मंस निवित्ति पइण्ण ॥ ५१ ॥

अन्तमुहुत्त परेण जहिं, सुहुमह जीवहँ रासि ।
सम्मुच्छहिं तं असिउ भण, लोणिउ माथरि पासि ॥ ५२ ॥

एगस्सवि जीवह वहणि, जायइ पाव बहुत्तु ।
ता जिय पिंड सरूवु इहु, बुह भक्खणह अजुत्तु ॥ ५३ ॥

एगह निय जीवह तणिण, जे जिय कोड़ि वहंति ।
ताहं अणंता भव गहणि, जम्मण मरण हवंति ॥ ५४ ॥

जइ पच्चउ जिणवर वयणि, तुहु जइ कज्जु सुहेहिं ।
तां होइवि करुणा परमु, मा लोणिउ भक्खेहिं ॥ ५५ ॥

बहु जिय घण घा उब्भवउं लाला जेम्व विलीणु ।
किम भक्खइ मक्खिउ वि बहु सुस्सावउ सुकुलीणु ॥ ५६ ॥

इक्किक्कहु कुसुमहु पियवि, रसु मक्खिय जु वमंति ।
महु उच्चिट्ठउ सिट्ठ-जणु, तं दूरिण उब्भं (?ज्झं) ति ॥ ५७ ॥

उसह कएवि जु भक्खियउ, नरयह कारणु होइ ।
तसु परिणामि सु दारुणहु, महु सम्मुहु वि म जोइ ॥ ५८ ॥

सुहि महुरं नयणहं सुहउं, अइ कसुयं परिणामि ।
हालाहलु जिम्व परिहरहु, महु इम भणइ सुसामि ॥ ५९ ॥



For Private And Personal Use Only

ए चारि वि जिणवइ समइ, विगइ उपडि कुट्ठाउ ।
जो वज्जेसइ वज्जिहिइ, सो चउगइ भव ठाउं ॥ ६० ॥

दक्खा पाणय लद्दुएहिं, मच्छंडिय सुघएहिं ।
एवं पाएहिं अण्णहि वि, किं मज्जाइहिं तेहिं ॥ ६१ ॥

मिल्लि पिलुंखह पिप्पलह, कवुंवर फलाइं ।
वड़ उंबर साहीण तह, किमि कलवल सवलाइं ॥ ६२ ॥

छहिउ वि भक्खंतरु अवरु, अरहण्णवि समयण्णु ।
पंचुंबर संभव फलइं, कोइ न खाइ सयणु ॥ ६३ ॥

बीहहिं जेणं तहु भवहु, सुमुणिय पवहण तत्त ।
सव्व अणंत काइयइं ते भक्खइ न सुसत्त ॥ ६४ ॥

मिस्सइ आमिण गोरसिण वियलइं मुयह सुदूरि ।
जेण तहिं दिट्ठा केवलिहिं सुहुमा जिय अइचूरि ॥ ६५ ॥

जं अण्णुवि फलु फुल्ल दलु मीसिउ जंतु सएहिं ।
संधाणं संसत्तु तह धम्मिय दूरि सुएहिं ॥ ६६ ॥

जूय रमंतिहिं कलु मइलिज्जइ
मुच्चइ सच्चउं जणि लज्जिजइ ।
किज्जइ सोउ मुकउ मिल्लिजइ
भवण दविणु सयलुवि हारिज्जइ ॥ ६७ ॥

दाणु न दिज्जइ भोग न भुंजहिं
मुय पियय मपिय माइ सुसिज्जहिं ।
देव गुरु वि तिण सम वि गणिज्जहिं
जुत्ताजुत्तहिं नवि याणिज्जहिं ॥ ६८ ॥

अप्पणु कोउअइ वारवइज्जइ
दुग्गइ सरलइ ए[प]हिं वंचिज्जइ ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धिइ मइ कित्तिवि दूरि चइज्जहिं
ता धम्मिय तहिं मा सज्जिज्झहिं ॥ ६९ ॥

तामु न सच्चु न सोउ न संजमु
सीलु न विज्ज न न इंदिय दमु।

तिण अप्पउं कि विरु दुग्गइ छूढउ
जा पण रमणि रमइ अइ मूढउ ॥ ७० ॥

जा जालोय जिम्व गेहहु देहह
देविणु रुहिरु आकड्डइ बहुलहु।
सुकुमारत्तणु पयड़वि गुण गणु
जीवहु सा किम्व रंजनु बुहमणु ॥ ७१ ॥

आवय आठहिं जहिं आसत्तह
पसरइ अजसु तिलोइ असत्तह।
सव्वत्थ वि रह गरह पयट्टइ।
तहिं वेसहिं किव रागु विसट्टइ ॥ ७२ ॥

दुवियड्डि..... (?य चुंबि) य नड भंडहिं
नयणिहिं अकयत्थहिं जे रंडहिं।
नीलुप्पल सूमाले... (हिं गालेहिं)
ते विसूर वण्णिजहिं बालेहिं ॥ ७३ ॥

राउ न जसु मयरद्धय रूविवि
कुट्ठिवि, तोसइ धणइं निरूविवि।
सग्ग पवग्गण वग्गह अग्गल
वेस स ढोपइ दुह सय अग्गल ॥ ७४ ॥

सिरि हिरि कंति धिइ मइ कित्ती
दंति संति दय सज्जण मत्ती।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

छड्डहि कंत पणत्थि पसत्तउ
नावइ ईस वसेण पमत्तउ ॥ ७५ ॥

सज्जणु उत्तमु कुल संभूयउ
पर गुण-दूषण घोसणि मूयउ ।
पूइउ पंडिउ गणयहिं रत्तउ
जइता दासत्तणु धुवु पत्तउ ॥ ७६ ॥

अग्गि जले जिंव तणु संतावइ
कायम्वर जिम्व मणु मोहावइ ।
छुरिया जिम्व जा देहु वियारइ
सा कुलह किम्व चित्तु वियारइ ॥ ७७ ॥

चारइ तव दविणइं सुह भवणइं
हणइं सुज्झाणइ कय निव्वाणइं ।
नाणु पणुल्लइ उप्पहि घल्लइ
वेस पराणइ नरइ महल्लइ ॥ ७८ ॥

इम जाणेविणु पण रमणि, दूसिय गुण - मणि-माल ।
दूरेण मिल्लहु जिमू लहउ, सुग्गइ सुक्ख विसाल ॥ ७९ ॥

पारधि वइर परंपर कारणु
पारधि जीवह करइ वियारणु ।
पारधि जहिं मुद्धिहिं पारद्धी
दद्धी तिहिं नारय गय लद्धी ॥ ८० ॥

रण्णि वसहिं जि तण चरहिं, फुल्लिण कुवि न हणंति ।
तह मय मारणु आयरवि, किह भड़वाउ वहंति ॥ ८१ ॥

अप्पा पर अवयारयरि, दीसइ फुडु पारद्धि
विहलइ सयलइं सुचरियइं, पोसइ पावह रिद्धि ॥ ८२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विरइय सयलवि जिहिं, खट्टिग साल - विसाल।
तह भव-वणि जम्मण-मरण, होसइ दह दुह-माल ॥ ८३ ॥

पूयउ देवय चरउ तवु, वियरउ दाणु पहाणु।
जइ पारद्धिहिं किम्वइ मणु ता सयलुवि अपमाणु ॥ ८४ ॥

आहेड़िय जूयारियहँ, थुव सुह उवरि अभाउ।
कह मण्णहह भोगवि मुयवि, घल्लहिं दुहि निउकाउ ॥ ८५ ॥

अवयारि वि जे उवयरहिं, ते नर धर लंकारु।
मज्जुत्थह जे असु हरहिं, ते धुउ धरणिहिं धा[भा]रु ॥ ८६ ॥

जे पंचिंदिय वहु करहिं, ते निग्घिण चंडाल।
सुहु एक्कह वि न इंदियह, भवि भवि लहइ ति आल ॥ ८७ ॥

जइ अप्पइं सव्वइं दुहइं, तुहु समुदियइ दि दिक्खु।
वावारंतर परिहरिवि, ता आहेड़उ सिक्खु ॥ ८८ ॥

धण्ण ति वण्णउं धर वलय, तिहुयण-जण-नय-पाय।
जह सव्वहँ जीवहँ वहहु, विरया मण वय काय ॥ ८९ ॥

सच्चं मिउ हिउ धम्मु परु, आलोचिउ जि वयंति।
लहु दुह सुहासहिं पूरियउ, ते भव-वासु वयंति ॥ ९० ॥

जह मणि कंचण लदुवल, समभावह सुपवित्तु।
वि[? चि]त्तु विरत्तउ चोरियहु, तह वन्दउ सुचरित्तु ॥ ९१ ॥

मेहुण सेवणि जाहँ मणु, सव्व पयारि निवित्तु।
सचराचर इहु जगवलउ, तहिं निम्मिउ सुपवित्तु ॥ ९२ ॥

धम्मोवगरण मेत्त धण, ते परिगहु न करिंति।
पंडिय जण आणंदयर, ते गुण रयण धरिंति ॥ ९३ ॥

ता राइहिं अब्भव हरइ, जो चउविहु आहारु।
नरसिरि सुरसिरि सिद्धसिरि, [?सुल] हहं सु पर आहारु ॥ ९४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जे चिइवंदणि वंदणइं - पडिकमणइ उज्जुत्त।
ते निय कुल सरवर कमल, सुस्सावय सुपुत्त ॥ ९५ ॥

जे जिण-पूयणि मुणि-नमणि, निच्चु पयच्चु करेंति।
ते कल्लाण निहाण फुडु, लहु पव्वज्ज धरेंति ॥ ९६ ॥

जे विज्जंतइं घणि दविणि, वियरहिं पत्ति न दाणु।
दीणह दुहियह दुत्थिय[ह], तह कहिं भवि सम्माणु ॥ ९७ ॥

निम्मलु सीलु न पालियउ, दमिय न करण तुरंग।
मण मयगलु नो वसिय कयउ, किह वुण्णइ नीसंगु ॥ ९८ ॥

सत्ति न गूहइ मिस करइ, चरइ न तवु समुद्दु।
दुग्गइ खड्डुहिं उडियहिं, तणु फुडु अप्पा छुट्टु ॥ ९९ ॥

जिण संसिउ निच्चुवि करहि, सम धम्मिय वच्छल्ल।
सासण सार मुदार मणु, जिम्व होयहि नीसल्लु ॥ १०० ॥

जण जिण पवयण मइलियइं, जं निय कुलह विरद्धु।
तं मा काहिसि जिम होयहिं, कम्म विसुज्जु विसुद्ध ॥ १०१ ॥

जह बुत्तिवि मणि तुल्ल गुण, सुसमण लिंगिय मुंड।
तह फुडु जड चूडामणि, हंस न कथूर [?कथइ] मुरण्डा ॥ १०२ ॥

जे पावेविणु जिण वयण, उस्सुत्तइं भासंति।
ते पाविवि चिंतारयणु, [खंडो] खंडि करंति ॥ १०३ ॥

जो चिंतामणि पत्थरह, सुरतरु विस रुक्खाण।
सो अन्तरु बुह वज्जरहिं, सुसमण लिंग-धराण ॥ १०४ ॥

जो अवगण्णिवि मुणि रयण, लिंग सुभत्ति करेइ।
सो छंडेविणु अमय रसु, हालाहलु चक्खेइ ॥ १०५ ॥

कोह दवानल उल्हवहु, समय मेय पूरेण।
भव संतावु...[व] समु जिम्व, मुसुसु सूरहु दूरेण ॥ १०६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

माण महीहरि मा चडहु, अवगुण भिल्लिहि किण्णि।
जइ कुसलिण रक्खिउ मणहु, भवियहु रयणिहिं तिण्णि ॥ १०७ ॥

माय भुयंगी गरुल भरु, जहि विक्खेरइ निच्चु।
तहिं गुरु-कम्मइं सुय अमउ, दूसिज्जइ निमिच्चु ॥ १०८ ॥

गुरु पवहणि आरुहिवि लहु, लोह-समुद्द तरेहि।
सो पायालि ट्टहावहइ, अप्पाणउं पाडेहि ॥ १०९ ॥

पाव वयंस पसंग रसु, मं कइयह वि करेसु।
धम्मु चरंतहु जिम्व सयलु, छिज्जइ कम्म किलेसु ॥ ११० ॥

तिविहु जु चेइउ वण्णियउं, भगवंतिहिं सिद्धंति।
निस्सु अणिस्सु अणाययणु, तं सद्दहहिं अ...[?च्चं] ति ॥ १११ ॥

विहि चेईहरि पइ-दियहु, गमणच्चणहिं करेहु।
अण्णइ दुण्णिवि परिहरहु, मा संसारि पडेहु ॥ ११२ ॥

निसणहु निच्चु वि जिण समउ, सेवहु सुहगुरु पाय।
सव्व विरइ मणु संठवहु, जेण न हुँति अवाय ॥ ११३ ॥

तित्थयराण परायणह, उवसंतह सुजयाण।
सिवसुह लालस माणसहं, भद्दु हवउ भवियाण ॥ ११४ ॥

भव विरसत्तणु भाविरह, तव संजम निरयह।
वेच्चइ जाह मणुस्स भवु, ते निहि सव्व सुहहं ॥ ११५ ॥

धम्मुवएसं पयं आराहेहिंति जे महासत्ता।
चारित्त वं[?चं]दन धवलिय तिजया जाहिंति ते सिद्धिं ॥ ११६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पू.आ.श्री जिनदत्तसूरिविरचिता

## ॥ सुगुरु-गुण-संथव-सत्तरिया ॥

(गणधर-सप्ततिका)

गुणमणिरोहणगिरिणो, रिसहजिणंदस्स पढममुणिवइणो ।
सिरिउसभसेण गणहारिणोऽणहे पणिवयामि पए ॥ १ ॥

अजियाइ जिणंदाणं, जणियाणंदाण पणय पाणीणं ।
थुणिमो दीणमणोहं, गणहारीणं गुरुगणोहं ॥ २ ॥

सिरिवद्धमाण-वरनाण-चरण-दंसण-मणीण जलनिहिणो ।
तिहुयणपहुणो पडिहणिय सत्तुणो सत्तमो सीसो ॥ ३ ॥

सुयनाण जस्सपईव-सण्णिहं हसिय हंसकर पसरं ।
विप्फुरइ जणमणो, गिहसंसय-तिमिरहरणम्मि, ॥ ४ ॥

जंति तिरिय मणुय दाणव देविंद नमंसियं महासत्तं ।
तं नाणसिरिनिहाणं, गोयमगणहारिणं वंदे ॥ ५ ॥

जिणवद्धमाणमुणिवइ, समप्पिया सेसतित्थभरधरणे ।
पडिहय-पडिवक्खेणं, जयम्मि धवलाइयं जेण ॥ ६ ॥

तं तिहुयण-पणय-पयारविंदमुद्दाम-काम-करिसरहं ।
अणहं सुहम्मसामिं, पंचमठाणं ठियं वंदे ॥ ७ ॥

जस्सण्ण तारुण्णे, तरल तारय हत्थिपेच्छिरीहिंपि ।
अयंपि मणो रमणीहिं, भाविया मुणिय भवभावं ॥ ८ ॥

जह तणु दिणावसाणे, मिहिरो अत्थयरि सिहरमारुहइ ।
तस्स-वसाण दिणंते, नाणदिणिंदो तहत्थमइ ॥ ९ ॥

तं जंबुनाम नामं, सुहम्मगणहारिणो गुणसमिहं ।
सीसो सुसीसनिलयं, गणहरपयपालणं वंदे ॥ १० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संपण्णवरविवेयं, जं गिहगय जंबु नाम वयणाओ।
पालिय पवज्जंतं, पभवायरियं सया वंदे ॥ ११ ॥

कहुमहो परमेयं, तत्तं न मुणिज्ज इत्तिसो।
जणा सेज्जंभवं रुवउ विरत्तचित्तं नमंसामि ॥ १२ ॥

संजणिय पणय रुद्दं, जसभद्दं मुणिगणाहिवं सगुणं।
संभूयं सुह संभूई, भायणं सूरिमणुसरिमो ॥ १३ ॥

जिणसमयसिंधुणो, पारगामिणो वरविवेय-नावाए।
सिरिभद्दबाहु गुरुणो, हियए नामक्खरे धरिमो ॥ १४ ॥

सो कहणु थूलभद्दो, लहइ सलाहं मुणीण मज्झम्मि।
लीलाइ जेण हणिउं, सरहेण य मयण-मायाउ ॥ १५ ॥

काम-पईवसिहाए, कोसाए बहुसिणेहभरियाए।
घणदढजणपयगाई, जीए जो सामिओ नेया ॥ १६ ॥

सोवि अपुव्व-पयंगेणं जयहरे सप्पहं पयासंती।
पडिहणिय पहा विहिया, मोहमहातिमिरहरणेण ॥ १७ ॥

तस पच्छिमं चउद्दस-पुव्वीणं चरणनाणसरिसरणं।
सिरिथूलभद्द समणं, वंदेहं, मत्तगयगमणं ॥ १८ ॥

विहिया अणिगूहिय-विरिय-सत्तिमा सत्तमेण संतूलणा।
जे अज्ज महागिरिणा, समइक्कंते वि जिणकप्पे ॥ १९ ॥

तस्स गणिट्ठं लट्ठं, अज्जसुहत्थि जणपणयं।
अवहत्थिय संसारं, सारं सूरिं च अणुसरिमो ॥ २० ॥

अज्ज समुद्दं गंभीरिमाए वंदे समुद्द-गंभीरं।
तह अज्जमंगुसूरिं, अज्ज सुधम्मं च धम्मरयं ॥ २१ ॥

मण-वयण-कायगो गुरु भद्दगुत्तं च गणनाहं।
छम्मासिउविसजूव भावओ गहिय पव्वज्जो ॥ २२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धणगिरिणो नंदाए, तणओ णग(र) णहयरिंदपहुपणओ ।
पढमुप्पत्ति पयंपि व, संवेगसिरीएसंविग्गो ॥ २३ ॥

सिरि अज्जसीहगिरिणो, गुरुणा विहिओ गुणाणुरागेणं ।
सेस जईणं लहुओ, विज्जो गुरु नाणदाणेणं ॥ २४ ॥

उद्धरिया जेण पयाणु-सारिणा गयणगामिणी विज्जा ।
सुमहा पयण्ण-पुव्वाओ, सव्वहा पसमरसिएणं ॥ २५ ॥

सुराय-चाय-विज्जमभमुहा धणुमुक्क-नयणबाणाए ।
कामग्गिसमीरण-विहिय पत्थणा वयण-घडणाए ॥ २६ ॥

लट्ठंग पईट्ठाए, सिद्धि-सुयाए विसिट्ठ-चिट्ठाए ।
गुणगणसमणाओ जेसि दंसणुक्कंठिय मणाए ॥ २७ ॥

निय जणय दिण्ण धण-कणग-रयण-रासीए जो न कण्णाए ।
तुच्छं पि मुच्छिओ जोव्वणेवि धणियं गुणट्ठाए ॥ २८ ॥

जलण-गिहाओ मोहसरीए कुसुमाणि जेण आणेउं ।
तच्च नीयाणमाणो, मलियो संपुण्णई विहिया ॥ २९ ॥

दुब्भिक्खम्मि दुव्वालस वारसीय सीयमाण संघम्मि ।
विज्जा बलेणमाणिय-मण्णं जेणण्ण छिण्णाओ ॥ ३० ॥

नमह दस पुव्वधरं, धम्मधरा धरणसेसमणिविरियं ।
सिरि वइरसामिसूरिं, वंदे थिरयाइ मेरुगिरिं ॥ ३१ ॥

निय-जणणि-वयण-करणम्मि उज्जओ दिट्ठिवाय-पढणत्थं ।
सुगुरु-समीवम्मि गओ, ढड्डर सड्ढाणुमग्गेणं ॥ ३२ ॥

सड्ढाणुसारओ विहियं, सयलमुणिवंदणीय जो गुरुणा ।
अकयाणुवंदणो सावयस्स एवं समणु भणिमो ॥ ३३ ॥

को धम्म गुरु तुम्हाण-मेत्थ तेणावि विणयपणएणं ।
गुरुणो निदंसिओ सो, ढड्डर सड्ढो वियड्ढेणं ॥ ३४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अकगुरु निण्हवेणं, सूरि सयासम्मि जिणमयं सोउं ।
परिवज्जिय सावज्जं, पव्वज्जगिरिसमारूढो ॥ ३५ ॥

सीहत्ता निक्खंतो, सीहत्ताएउ विहरिओ जो उ ।
साहिय नवपुव्व सुओ, संपण्ण पसण्णसूरिपओ ॥ ३६ ॥

सुरवरपहुबुद्धेणं, महाविदेहम्मि तित्थनाहेणं ।
कहिउं निगोयजीवाण-जाणओ भारहे सूरी ॥ ३७ ॥

जस्स सयासे सक्को, मोहणरूवेण पुच्छइ एवं ।
भयवं फुडमण्णेसि य, मह केत्तिय माउयं कहसु ॥ ३८ ॥

सक्को भवंति भणिओ, मुणिउं जेणाउयप्पमाणेणं ।
पुट्ठेण निगोयाणं पि, वण्णणा जेण निद्दिट्ठा ॥ ३९ ॥

हरिणा हरसियचित्तेण, संथुओ जो तवो महासत्तो ।
जेण समयम्मि ठवणा, विहिया गुणपक्खवाएणं ॥ ४० ॥

तं सूरिमज्ज-रक्खिय-मक्खयपयपावणम्मि पाणीणं ।
पडिहत्थमतुच्छ महं, वंदे निद्दलियदुरिओहं ॥ ४१ ॥

विहिय जिणसमय-सम्मय-सुदेसणाजणियजणमणाणंदा ।
अण्णे वि चरणगुणरयण-जलहिणो जे जए जाया ॥ ४२ ॥

परवाइवारवारण-वियारणा जे मियारणो गुरुणो ।
ते सुगहिय नामाणं, सरणं मह हुँतु पणय पया ॥ ४३ ॥

अण्णाणनीरपउरे, सण्णा संसारसायरे पडिया ।
करुणाए जेहि ठविया, जिणपवयणजाणवत्तम्मि ॥ ४४ ॥

पालियसीलंगाणं, संगहिय-समग्ग-समय-साराणं ।
चउदस-सय-पगरण-देसणेण संपण्णकित्तीणं ॥ ४५ ॥

जिणसमय-संजयाणं, मुद्धा किरिया परूविया जेहिं ।
तेण महं तेसि नमो, हरिभद्दमुणीसराणं पि ॥ ४६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आयार-वियारण वयण-चंदिमा निहयमोहतिमिरभरे।
सीलंको हुयण नहं, गणम्मि हरिणंक-संकासो ॥ ४७ ॥

तं तिहुयण-पहुपय-कमल-जुयलभसलं भवारिविहियभयं।
जीवाणमभयदाणम्मि, पच्चलं निच्चलं वंदे ॥ ४८ ॥

सुपसत्थ-वीरजिण-तित्थ-संभवो भव्वजणमणोहरणो।
सिरिवद्धमाणसूरी, जोगपसंगो तयं वंदे ॥ ४९ ॥

पुरओ दुल्लह-महिवल्लहस्स अणहिल्लवाडयपुरम्मि।
सुविहिय-विहार-पक्खो, पयडीओ समयजुत्तीए ॥ ५० ॥

अपडिबद्ध-विहारेण, विहरिया जे पणट्ठ-पडिवक्खा।
ताणं जिणेसरसूरीण संपयं पणिवयामि पए ॥ ५१ ॥

सिरिसूरिजिणेसर-वयण-पंकए महुयरव्व जे लीणा।
नाणगुणलद्धिनिलए, आसाइयसमयमयरंदा ॥ ५२ ॥

सिरिवीरजिणेसर-समय-रयण-कोसोवएस-रयणाई।
पुण परिवज्जिएहिं, कयाइनो पण्ण पुव्वाइं ॥ ५३ ॥

कय करणाहिं काउं, नवंग वित्तीउ जेहि दिण्णाई।
अविवेय-रोरयालिंगियाण जंतूण जियलोए ॥ ५४ ॥

जइ केइ नाण-चरणेहिं, सालिणो आगमेसिणो गुरुणो।
संपइ पुण ते गुण-तुल्लयाए लोए न दीसंति ॥ ५५ ॥

भवकूपनिवडियाणं, पाणिणं पाणिदाण-दुल्ललिया।
सिरिअभयदेवगुरुणा, विवरणकरणेन विक्खाया ॥ ५६ ॥

नाण-महुपाण-लालस-सुसीस भसलउलसंकुलविमले।
तेसि महं तिक्कालं, चरणंबुरुहे पणिवयामि ॥ ५७ ॥

जे समय-पाढया समय-जाणया समणभासया सम्मं।
समए समएण समं मुणिऊण कुणंति किच्चा ॥ ५८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालाईणं भवणं, भवियाणविबोहणं भवविणासं ।
तेसि महं नाणीणं, तं नाणगुणं पणिवयामि ॥ ५९ ॥

जे सपरपक्खविसयं, देवगयं गुरुगयं च मिच्छत्तं ।
सुहगुरु-संपत्तीए, मोत्तुं सम्मत्त-मणुपत्ता ॥ ६० ॥

निस्संकियाइ गुणरयण-रोहणं दोस-पणग-परिहीणं ।
निरुवम-सुहतरुपीयं, दंसणमिणमो पणिवयामि ॥ ६१ ॥

इरियासमियाईणं, पणगं मण-वयण-कायगुत्ति तियं ।
कुड्डंतर-वसहिंदिय-निसिज कह पुव्वरमिएहिं ॥ ६२ ॥

पणिया परिमिय-भोयण-विभूसणा दोसदूसियं जइणे ।
तेसिं सिवसिरिसरणं, चरणं तिविहेण पणमामि ॥ ६३ ॥

बज्झाब्भंतर-दुद्धर-तवो विहाणुज्जयाय जिणधणियं ।
समयाणुसारिकिरिया-पवत्तिनिरया नमो तेसिं ॥ ६४ ॥

भत्तं पाणं वत्थं, वसहिं च विसोहिऊण जयणाए ।
नियसत्ति पयडंता, विहरंति सया नमो तेसिं ॥ ६५ ॥

इय जे पंचपयारं, आयारं आयरंति आयरिया ।
उवज्झाया वि य जे केइ, साहुणो तेसि पणमामि ॥ ६६ ॥

पुढवाइ जीव नवभेय-जाणए देसए य तत्ताणं ।
सयमेव पालणाए, कारए य समयाणुवित्तीए ॥ ६७ ॥

आउढि दप्प-कप्पप्पमाय-परियाणए जिणाणाए ।
अणवज्जभासणे सई, समुज्जए चरणकरणेसु ॥ ६८ ॥

पुव्वाचरेण मुणिउं, अविचलचित्तेहिं समय-सुत्ताई ।
दव्वाईणं भणिया, पक्खा निरवेक्ख-सावेक्खा ॥ ६९ ॥

पत्तमपत्तं नाउं, कुणं जे देसणं महासत्ता ।
मग्ग-पवण्णा मग्गम्मि ठ्ठावणाठाइ पाणीणं ॥ ७० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जे दुज्जण-दुव्वयणं, सोउण न माणसम्मि ठवेंति ।
फरुसं भणिया वि न जे परप्प (प्फु) सम्मि वड्ढंति ॥ ७१ ॥

जइ कहवि पमायवसा, सम्मं सयमेव नो पयट्टंति ।
तह विहु जिणा भणियं, जहट्ठियं जे परूवेंति ॥ ७२ ॥

उप्पएण परमकरुणाहि, जेहि मह कम्मसत्तुणो सव्वे ।
पडिहय-पसराउकया, देउं चउरंग-बलममलं ॥ ७३ ॥

उमग्गओ मग्गम्मि, ट्ठाविंति सुगुणसंठिएहिं पयं ।
सिरिधम्मगुरुण महं, तेसिं वयणे पणिवयामि ॥ ७४ ॥

इय सुहगुरु-गुण-संथव-सत्तरिया सोमचंद-जुण्हव्व ।
भवभक्खरतावहरा, भणिज्जमाणा लहुं होउ ॥ ७५ ॥

आवश्यकनिर्युक्तिहारिभद्रीयटीकागत-

## ॥ द्वाविंशतिपरिषहाः ॥

क्षुधार्तः शक्तिमान् साधुरेषणां नातिलङ्घयेत् ।
यात्रामात्रोद्यतो विद्वानदीनोऽविप्लवश्चरेत् ॥ १ ॥

पिपासितः पथिस्थोऽपि, तत्त्वविद् दैन्यवर्जितः ।
शीतोदकं नाभिलषेन्मृगयेत् कल्पितोदकम् ॥ २ ॥

शीताभिघातेऽपि यतिस्त्वग्वस्त्रत्राणवर्जितः ।
वासोऽकल्प्यं न गृह्णीयादग्निं नोज्ज्वालयेदपि ॥ ३ ॥

उष्णतप्तो न तं निन्देच्छायामपि न संस्मरेत् ।
स्नानगात्राभिषेकादि, व्यजनं चापि वर्जयेत् ॥ ४ ॥

न दष्टो दंशमशकैस्त्रासं द्वेषं मुनिर्व्रजेत् ।
न वारयेदुपेक्षेत, सर्वाहारप्रियत्ववित् ॥ ५ ॥



For Private And Personal Use Only

वासोऽशुभं न वा मेऽस्ति, नेच्छेत् तत्साध्वसाधु वा।
लाभालाभविचित्रत्वं, जानन्नाग्न्येव विप्लुतः ॥ ६ ॥

गच्छंस्तिष्ठन्निषण्णो वा, नारतिप्रवणो भवेत्।
धर्मारामरतो नित्यं, स्वस्थचेता भवेन्मुनिः ॥ ७ ॥

सङ्गपङ्कसुदुर्बाधाः, स्त्रियो मोक्षपथार्गलाः।
चिन्तिता धर्मनाशाय, यतोऽतस्ता न चिन्तयेत् ॥ ८ ॥

ग्रामाद्यनियतस्थायी, सदा वाऽनियतालयः।
विविधाभिग्रहैर्युक्तश्चर्यामेकोऽप्यधिश्रयेत् ॥ ९ ॥

श्मशानादिनिषद्यासु, स्त्र्यादिकण्टकवर्जिते।
उपसर्गाननिष्टेष्टानेकोऽभीरस्पृहः क्षमेत् ॥ १० ॥

शुभाशुभासु शय्यासु, सुखदुःखे समुत्थिते।
सहेत सङ्गं नेयाच्च, श्वस्त्याज्येति च भावयेत् ॥ ११ ॥

नाकुष्टो मुनिराक्रोशेत्, साम्याद् ज्ञानाद्यवर्जकः।
अपेक्षेतोपकारित्वं, न तु द्वेषं कदाचन ॥ १२ ॥

हतः सहेतैव मुनिः, प्रतिहन्यान्न साम्यवित्।
जीवानाशात् क्षमायोगाद्, गुणासेः क्रोधदोषतः ॥ १३ ॥

परदत्तोपजीवित्वाद्, यतीनां नास्त्ययाचितम्।
यतोऽतो याचनादुःखं, क्षाम्येन्नेच्छेदगारिताम् ॥ १४ ॥

परकीयं परार्थं च, लभ्येतान्नादि नैव वा।
लब्धे न माद्येन्निन्देद्वा, स्वपरान्नाप्यलाभतः ॥ १५ ॥

नोद्विजेद् रोगसम्प्राप्तौ, न चाभीप्सेच्चिकित्सितम्।
विषहेत तथाऽदीनः, श्रामण्यमनुपालयेत् ॥ १६ ॥

अभूताल्पाणुचेलत्वे, कादाचित्कं तृणादिषु।
तत्संस्पर्शोद्भवं दुःखं, सहेन्नेच्छेच्च तान् मृदून् ॥ १७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मलपङ्करजोदिग्धो, ग्रीष्मोष्णक्लेदनादपि ।
नोद्विजेत् स्नानमिच्छेद्वा, सहेतोद्वर्तयेन्न वा ॥ १८ ॥

उत्थानं पूजनं दानं, स्पृहयेन्नात्मपूजकः ।
मूर्छितो न भवेल्लब्धे, दीनोऽसत्कारितो न च ॥ १९ ॥

अजानन् वस्तु जिज्ञासुर्न मुह्येत् कर्मदोषवित् ।
ज्ञानिनां ज्ञानमुद्वीक्ष्य, तथैवेत्यन्यथा न तु ॥ २० ॥

विरतस्तपसोपेतश्छद्मस्थोऽहं तथाऽपि च ।
धर्मादि साक्षान्नैवेक्षे, नैवं स्यात् क्रमकालवित् ॥ २१ ॥

जिनास्तदुक्तं जीवो वा, धर्माधर्मौ भवान्तरम् ।
परोक्षत्वात् मृषा नैवं, चिन्तयेत् महतो ग्रहात् ॥ २२ ॥

शारीरमानसानेवं, स्वपरप्रेरितान्मुनिः ।
परीषहान् सहेताभीः, कायवाङ्मनसा सदा ॥ २३ ॥

ज्ञानावरणवेद्योत्था, मोहनीयान्तरायजाः ।
कर्मसूदयभूतेषु, सम्भवन्ति परीषहाः ॥ २४ ॥

क्षुत्पिपासा च शीतोष्णे, तथा दंशमशादयः ।
चर्या शय्या वधो रोगः, तृणस्पर्शमलावपि ॥ २५ ॥

वेद्यादमी अलाभाख्यस्त्वन्तरायसमुद्भवः ।
प्रज्ञाऽज्ञाने तु विज्ञेयौ, ज्ञानावरणसम्भवौ ॥ २६ ॥

चतुर्दशैते विज्ञेयाः, सम्भवेन परीषहाः ।
ससूक्ष्मसम्परायस्य, च्छद्मस्थारागिणोऽपि च ॥ २७ ॥

क्षुत् पिपासा च शीतोष्णे, दंशश्चर्या वधो मलः ।
शय्या रोगतृणस्पर्शौ, जिने वेद्यस्य सम्भवाद् ॥ २८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ द्वादशभावना ॥

अह पुच्छइ कुमर-नराहिराउ, मण-मक्कड-नियमण-संकलाउ।
कह कीरहि बारह भावणाउ, तो अक्खइ गुरु घण-गहिर-नाउ १ ॥

चलु जीविउ जुव्वणु धणु सरीरु, जिव कमल-दलग्ग-विलग्गु नीरु।
अहवा इहत्थि जं किं पि वत्थु, तं सव्वु अणिच्चु हहा धिरत्थु २ ॥

पिय माय भाय सुकलत्तु पुत्तु, पहु परियणु मित्तु सिणेहजुत्तु।
पहवंतु न रक्खइ को वि मरणु, विणु धम्मह अण्णु न अत्थि सरणु३

राया वि रंकु सयणो वि सत्तु, जणओ वि तणउ जणणि वि कलत्तु।
इह होइ नडु व्व कुकम्मवंतु, संसार-रंगि बहुरूवु जंतु ॥ ४ ॥

एकल्लउ पावइ जीवु जम्मु, एकल्लउ मरइ विढत्त-कम्मु।
एकल्लउ परभवि सहइ दुक्खु, एकल्लउ धम्मिण लहइ मुक्खु ॥ ५ ॥

जहिं जीवह एउ वि अण्णु देहु, तहिं किं न अण्णु धणु सयणु गेहु।
जं पुण अणण्णु तं एक्क-चित्तु, अज्जेसु नाणु दंसणु चरित्तु ॥ ६ ॥

वस-मंस-रुहिर-चम्मऽट्ठि-बद्ध, नव-छिड्ड झरंत मलावणद्ध।
असुइ-सरूव-नर-थी-सरीर, सुइबुद्धि कह वि मा कुणसु धीर७ ॥

मिच्छत्त-जोग-अविरइ-पमाय, मय-कोह-लोह-माया-कसाय।
पावासव सव्वि इमे मुणेहि, जइ महसि मोक्खु ता संवरेहि ॥ ८ ॥

जह मंदिरि रेणु तलाइ वारि, पविसइ न किंचि ढक्किय दुवारि।
पिहियासवि जीवि तहा न पावु, इय जिणिहि कहिउ संवरु पहावु ॥ ९

परवसु अण्णाणु जं दुहु सहेइ, तं जीवु कम्मु तणु निज्जरेइ।
जो सहइ सवसु पुण नाणवंतु, निज्जरइ जिइंदिउ सो अणंतु॥ १० ॥

जहिं जम्मणु मरणु न जीवि पत्तु, तं नत्थि ठाणु वालग्ग-मत्तु।
उड्ढा-ऽहो-चउदस-रज्जु-लोगि, इय चिंतसु निच्चु सुओवओगि ११



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुह-कम्म-निओगिण कहवि लद्धु, बहु पावु करेविणु पुण विरुद्धु ।
जलनिहि-चुय-रयणु व दुलह बोहि, इय मुणिवि पमत्तु म जीव होहि

धम्मु त्ति कहंति जि पावु पाव, ते कुगुरु मुणसु निद्दय-सहाव ।
पइ पुण्णिहि दुल्लहु सुगुरु पत्तु, तं वज्जसु मा तुहु विसय-सत्तु ॥ १३ ॥

इय बारह भावण सुणिवि राउ, मणमज्झि वियंभिय भव-विराउ ।
रज्जु वि कुणंतु चिंतइ इमाउ, परिहरिवि कुगइ-कारणु पमाउ॥ १४ ॥

## शाम्ब-प्रद्युम्नचरित्रान्तर्गता
# ॥ द्वादशभावना ॥

अनित्यत्वमशरणं भवस्वरूपमेकता ।
अन्यत्वमाश्रवविधि-रशौचं संवरः पुनः ॥ १ ॥

कर्मैकनिर्जरा रम्य-धर्ममाहात्म्यवर्णनम् ।
चतुर्दशरज्जुमानो, लोकश्च बोधिभावना ॥ २ ॥

मनोज्ञैरशनैः पानैः, खाद्यैः स्वाद्यैश्च पोषितम् ।
शरीरं तदपि स्वीयं, विनश्यति क्षणादपि ॥ ३ ॥

गजारूढा हयारूढा, रथारुढाश्च ये नराः ।
अभ्रमन् पार्थिवंमन्या-स्तेषामपि दरिद्रता ॥ ४ ॥

यत्स्वरूपं प्रभाते स्या-न्मध्याह्ने तन्न दृश्यते ।
त्रियामायां विरूपं त-द्वस्तूनामित्यनित्यता ॥ ५ ॥

ऊढो गर्भो यया मात्रा, नवमासान् सुताशया ।
आत्मना विहिते मन्तौ, भूपालात्सा न रक्षिका ॥ ६ ॥

बाल्येऽपि वर्धितो येन, पूरयित्वा मनोरथान् ।
जनकेन न तेनापि, रक्ष्यते यमतः सुतः ॥ ७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यया पञ्चेन्द्रियाह्लादा, भुक्ता भोगा अहर्निशम् ।
मृगेक्षणा न साप्याधि-व्याधिभ्यः शरणं भवेत् ॥ ८ ॥

सिद्धान्तपारदृश्वानो, ये भवन्ति तपोधनाः ।
तेषामप्येष संसारो-ऽसारो नरककारणम् ॥ ९ ॥

स्निह्यन्ति ये जना:स्वार्थ-कृतये बान्धवा इव ।
तदप्राप्तौ त एव स्यु-र्वैरिभ्योप्यधिका इह ॥ १० ॥

अनादिकालमेतेन, संसारे भ्रमतात्मना ।
न स्पृष्टं जन्ममृत्युभ्यां, यत्तत्स्थानकमस्ति न ॥ ११ ॥

एकाकी लभते जन्मै-काक्येव म्रियते पुमान् ।
एकाकी दुःखमाप्नोत्ये-काक्येव याति दुर्गतिम् ॥ १२ ॥

एकेनोपार्जितं वित्तं, प्राज्या भोक्तुं मिलन्ति च ।
तस्य दुःखे समायाते, विभज्य कोऽपि लाति न ॥ १३ ॥

एक एव भवत्यन्ध, एक एव जडत्वभृत् ।
एक एव धरेन्मौढ्य-मेक एव च रोगिताम् ॥ १४ ॥

भिन्ना माता पिता भिन्नो, भिन्नाः स्वजनबान्धवाः ।
भिन्नानि धनधान्यानि, भिन्नाः कलत्रपुत्रकाः ॥ १५ ॥

एतेभ्यो निखिलेभ्योऽपि, भिन्नोऽहं निजकर्मभिः ।
यास्यामि देवतामर्त्यतिर्यग्नारककां गतिम् ॥ १६ ॥

य एवं चिन्तयेच्चित्ते, स एव धर्मकर्मठः ।
विजानन्नन्यमात्मानं, मोक्षसौख्यानि साधयेत् ॥ १७ ॥

श्रवन्ति पापकर्माणि, पञ्चेन्द्रियेषु देहिनाम् ।
कथिता आश्रवास्तेन, स्वर्गादिसौख्यवारिणः ॥ १८ ॥

श्रवणेनान्यपैशुन्य-श्रवणेश्वर्यधारणात् ।
नेत्रेण परदाराणां, रूपावलोकनेन च ॥ १९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गन्धादानेन पुष्पाणां, भोगार्थं नासया पुनः ।
परेषामतिनिन्दैक-प्रविधानेन जिह्वया ॥ २० ॥

स्पर्शनेन्द्रियकेणोच्चै, परेषां दारसेवया ।
पापकर्मागमः पुंसां, भवेत्पञ्चभिराश्रवैः ॥ २१ ॥

यद्भुक्तं घृतपूरादि, पक्वान्नं चारुपायसम् ।
जठरान्तः प्रविष्टं तद् भवेद्दौर्गन्ध्यसंयुतम् ॥ २२ ॥

यासां मृगीदृशां रूपं, वक्त्रकटाक्षविभ्रमान् ।
अवलोक्य प्रजायेत, शरीरी विकलस्त्रिधा ॥ २३ ॥

तदङ्गे द्वादशश्रोत्र-श्रवद्दौर्गन्ध्यमुच्चकैः ।
मूढात्मानो न जानन्ति, किं मोहाच्छादिताशयाः ॥ २४ ॥

आश्रवाणां च पञ्चानां, संवरः स्यान्निरोधकः ।
जिनैर्द्वेधा स तु द्रव्य-भावभेदेन भाषितः ॥ २५ ॥

शिरोनयनहस्तानां, चरणानां तथैव तत् ।
यतः संवरणं भूयात्, स द्रव्यसंवरः स्मृतः ॥ २६ ॥

क्रोधतो मानतो दुष्ट-मायातो लोभतस्तथा ।
मनसः संवृतिर्या स्यात्, स भवेद् भावसंवरः ॥ २७ ॥

यत्क्षुधातृषया शीता-तपाभ्यां दुःखवेदनम् ।
निर्जरा सोदिता सार्वैः, सकामाकामभेदतः ॥ २८ ॥

विपत्तावामये दुःखे, संकटे च समागते ।
स्वकर्मण्येव यः शोचेत्, सकामा तस्य निर्जरा ॥ २९ ॥

यस्तदा परकीयानि, दूषणानि विचिन्तयेत् ।
अकामा निर्जरा तस्य, संजायते शरीरिणः ॥ ३० ॥

नरके नरनारीर्यो, निपतन्तीः समुद्धरेत् ।
धर्मोऽभिधीयते तेना-नादिकालं जिनेश्वरैः ॥ ३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पापिनामपि मर्त्यानां, कालत्रयप्रवर्त्तिनाम् ।
उद्धारकरणाद्धर्मः, सत्यां प्रकुरुतेऽभिधाम् ॥ ३२ ॥

अतीते समये मर्त्या-श्चतुर्हत्याविधायिनः ।
आसन् दृढप्रहार्याद्या-स्तेऽपि धर्माच्छिवं गताः ॥ ३३ ॥

पुमांसोऽनागते काले, सेत्स्यन्त्यपि च धर्मतः ।
द्वैपायनादयो दुष्टा, भूयः संहारकारिणः ॥ ३४ ॥

कैवल्यगमनौचित्यं, क्षेत्रे बिभ्रति सर्वदा ।
वर्तमानेऽपि काले च, सिद्धयन्ति धर्मतो जनाः ॥ ३५ ॥

ज्ञातव्योऽयमुपास्योऽयं, ध्यातव्योऽयं मनीषिभिः ।
कर्तव्योऽयं विशेषेण, धर्मः सर्वार्थसाधकः ॥ ३६ ॥

धर्मेण वाञ्छितं सौख्यं, धर्मेण रोगहानयः ।
धर्मेण कुलवृद्धिश्च, धर्मेण शिवसंपदः ॥ ३७ ॥

वैशाखस्थानकस्थस्य, कटिस्थितकरस्य च ।
नरस्य तुल्ययाकृत्या, लोक एष प्रवर्तते ॥ ३८ ॥

धर्मास्तिकायाधर्मास्ति-कायाकाशास्तिकायकाः ।
पुद्गलजीवास्तिकायौ, कालोऽस्तिकायवर्जितः ॥ ३९ ॥

एभिः षड्भिर्भृतो द्रव्यैः, स्थित्युत्पत्तिव्ययान्वितः ।
ब्रह्मादिभिः कृतो लोको, नायमाधारवर्जितः ॥ ४० ॥

अनाद्यनन्तसंसारे, जीवेन भ्रमता सता ।
स्थावरत्वं त्रसत्वं वा, लभ्यते कर्मलाघवात् ॥ ४१ ॥

ततः पञ्चेन्द्रियत्वं च, मानुष्यमार्यदेशकः ।
सर्वाक्षपटुता जातिः -प्रभुता प्राप्यतेतमाम् ॥ ४२ ॥

प्राप्तेष्वपि पदार्थेष्व-मीषु सर्वेषु चारुषु ।
बोधिबीजं मनुष्याणां, माणिक्यमिव दुर्लभम् ॥ ४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भास्वतीर्भावयन्नेता, भावना भवभेदिनीः ।
स साधुः सर्वसत्त्वेषु, साम्यं विशेषतो दधौ ॥ ४४ ॥

# ॥ द्वादशभावनाः ॥

## अनित्यभावना

ग्रस्यन्ते वज्रसाराङ्गास्तेऽप्यनित्यत्वरक्षसा ।
किं पुनः कदलीगर्भनिःसारानिह देहिनः ? ॥ १ ॥

विषयसुखं दुग्धमिव स्वादयति जनो बिडाल इव मुदितः ।
नोत्पाटितलकुटमिवोत्पश्यति यममहह किं कुर्मः ॥ २ ॥

धराधरधुनीनीरपूरपारिप्लवं वपुः ।
जन्तूनां जीवितं वातधूतध्वजपटोपमम् ॥ ३ ॥

लावण्यं ललनालोकलोचनाञ्चलचञ्चलम् ।
यौवनं मत्तमातङ्गकर्णतालचलाचलम् ॥ ४ ॥

स्वाम्यं स्वप्नावलीसाम्यं, चपलाचपलाः श्रियः ।
प्रेम द्वित्रिक्षणस्थेम, स्थिरत्वविमुखं सुखम् ॥ ५ ॥

सर्वेषामपि भावानां भावयन्नित्यनित्यताम् ।
प्राणप्रियेऽपि पुत्रादौ, विपन्नेऽपि न शोचति ॥ ६ ॥

सर्ववस्तुषु नित्यत्वग्रहग्रस्तस्तु मूढधीः ।
जीर्णतार्णकुटीरेऽपि, भग्ने रोदित्यहर्निशम् ॥ ७ ॥

ततस्तृष्णाविनाशेन, निर्ममत्वविधायिनीम् ।
शुद्धधीर्भावयेन्नित्यमित्यनित्यत्वभावनाम् ॥ ८ ॥

**अशरणभावना**

पितुर्मातुर्भ्रातुस्तनयदयितादेश्च पुरतः,
प्रभूताऽऽधिव्याधिव्रजनिगडिताः कर्मचरटैः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रटन्तः क्षिप्यन्ते यममुखगृहान्तस्तनुभृतो,
हहा कष्टं लोकः शरणरहितः स्थास्यति कथम् ? ॥ ९ ॥

ये जानन्ति विचित्रशास्त्रविसरं ये मन्त्रतन्त्रक्रिया-
प्रावीण्यं प्रथयन्ति ये च दधति ज्योतिःकलाकौशलम् ।
तेऽपि प्रेतपतेरमुष्य सकलत्रैलोक्यविध्वंसन-
व्यग्रस्य प्रतिकारकर्मणि न हि प्रागल्भ्यमाबिभ्रति ॥ १० ॥

नानाशस्त्रपरिश्रमोद्भटभटैरावेष्टिताः सर्वतो,
गत्युद्दाममदान्धसिन्धुरशतैः केनाप्यगम्याः क्वचित् ।
शक्रश्रीपतिचक्रिणोऽपि सहसा कीनाशदासैर्बला-
दाकृष्टा यमवेश्म यान्ति हहहा निःस्त्राणता प्राणिनाम् ॥ ११ ॥

उद्दण्डं ननु दण्डसात्सुरगिरिं पृथ्वीं पृथुच्छत्रसात्,
ये कर्तुं प्रभविष्णवः कृशमपि क्लेशं विनैवात्मनः ।
निःसामान्यबलप्रपञ्चचतुरास्तीर्थङ्करास्तेऽप्यहो,
नैवाशेषजनौघघस्मरमपाकर्तुं कृतान्तं क्षमाः ॥ १२ ॥

कलत्रमित्रपुत्रादिस्नेहग्रहनिवृत्तये ।
इति शुद्धमतिः कुर्यादशरण्यत्वभावनाम् ॥ १३ ॥

**संसार भावना**

सुमतिरमतिः श्रीमानश्रीः सुखी सुखवर्जितः,
सुतनुरतनुः स्वाम्यस्वामी प्रियः स्फुटमप्रियः ।
नृपतिरनृपः स्वर्गी तिर्यङ् नरोऽपि च नारक-
स्तदितिबहुधा नृत्यत्यस्मिन् भवी भवनाटके ॥ १४ ॥

बद्ध्वा पापमनेककल्मषमहारम्भादिभिः कारणै-
र्गत्वा नारकभूमिषूद्भटतमःसङ्घट्टनष्टाध्वसु ।
अङ्गच्छेदनभेदनप्रदहनक्लेशादिदुःखमह-
ज्जीवो यल्लभते तदत्र गदितुं ब्रह्मापि जिह्मानन: ॥ १५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मायात्त्यादिनिबन्धनैर्बहुविधैः प्राप्तस्तिरश्चां गतिं,
सिंहव्याघ्रमतङ्गजैणवृषभच्छागादिरूपस्पृशाम् ।
क्षुत्तृष्णावधबन्धताडनरुजावाहादिदुःखं सदा,
यज्जीवः सहते न तत्कथयितुं केनाप्यहो शक्यते ॥ १६ ॥

खाद्याखाद्यविवेकशून्यमनसो निर्ह्रीकताऽऽलिङ्गिताः,
सेव्यासेव्यविधौ समीकृतधियो निःशूकतावल्लभाः ।
तत्रानार्यनरा निरन्तरमहारम्भादिभिर्दुस्सहं,
क्लेशं सङ्कलयन्ति कर्म च महादुःखप्रदं चिन्वते ॥ १७ ॥

मर्त्याः क्षत्रियवाडवप्रभृतयो येऽप्यार्यदेशोद्भवा-
स्तेऽप्यज्ञानदरिद्रताव्यसनितादौर्भाग्यरोगादिभिः ।
अन्यप्रेषणमानभञ्जनजनावज्ञादिभिश्चानिशं,
दुःखं तद्विषहन्ति यत्कथयितुं शक्यं न कल्पैरपि ॥ १८ ॥

रम्भागर्भसमः सुखी शिखिशिखावर्णाभिरुच्चैरयः-
सूचीभिः प्रतिरोमभेदितवपुस्तारुण्यपुण्यः पुमान् ।
यद् दुःखं लभते तदष्टगुणितं स्त्रीकुक्षिमध्यस्थितौ,
सम्पद्येत तदप्यनन्तगुणितं जन्मक्षणे प्राणिनाम् ॥ १९ ॥

बाल्ये मूत्रपुरीषधूलिलुठनाज्ञानादिभिर्निन्दिता,
तारुण्ये विभवार्जनेष्टविरहानिष्टागमादिर्व्यथा ।
वृद्धत्वे तनुकम्पदृष्ट्यपटुता श्वासाद्यसुस्थात्मता,
तत्का नाम दशाऽस्ति सा सुखमिह प्राप्नोति यस्यां जनः ? ॥ २० ॥

सम्यग्दर्शनपालनादिभिरथ प्राप्ते भवे त्रैदशे,
जीवाः शोकविषादमत्सरभयस्वल्पर्धिकत्वादिभिः ।
ईर्ष्याकाममदक्षुधाप्रभृतिभिश्चात्यन्तपीडार्दिताः,
क्लेशेन क्षपयन्ति दीनमनसो दीर्घं निजं जीवितम् ॥ २१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्थं शिवफलाधायिभववैराग्यवीरुधः ।
सुधावृष्टिं सुधीः कुर्यादेनां संसारभावनाम् ॥ २२ ॥

**एकत्वभावना**

उत्पद्यते जन्तुरिहैक एव, विपद्यते चैकक एव दुःखी ।
कर्मार्जयत्येकक एव चित्रमासेवते तत्फलमेक एव ॥ २३ ॥

यज्जीवेन धनं स्वयं बहुविधैः कष्टैरिहोपार्ज्यते,
तत्सम्भूय कलत्रमित्रतनयभ्रात्रादिभिर्भुज्यते ।
तत्तत्कर्मवशाच्च नारकनरस्वर्वासितिर्यग्भवे-
ष्वेकःसैष सुदुःसहानि सहते दुःखान्यसङ्ख्यान्यहो ॥ २४ ॥

जीवो यस्य कृते भ्रमत्यनुदिशं दैन्यं समालम्बते,
धर्माद् भ्रश्यति वञ्चयत्यतिहितान् न्यायादपक्रामति ।
देहः सोऽपि सहात्मना न पदमप्येकं परस्मिन् भवे,
गच्छत्यस्य ततः कथं वदत भोः साहाय्यमाधास्यति ? ॥ २५ ॥

स्वार्थैकनिष्ठं स्वजनस्वदेहमुख्यं ततः सर्वमवेत्य सम्यग् ।
सर्वत्र कल्याणनिमित्तमेकं, धर्मं सहायं विदधीत धीमान् ॥ २६ ॥

**अन्यत्व भावना**

जीवः कायमपि व्यपास्य यदहो लोकान्तरं याति यद्
भिन्नोऽसौ वपुषोऽपि कैव हि कथा द्रव्यादिवस्तुव्रजे ? ।
तस्माल्लिम्पति यस्तनुं मलयजैर्यो हन्ति दण्डादिभि-
र्यःपुष्णाति धनादि यश्च हरते तत्रापि साम्यं श्रयेत् ॥ २७ ॥
अन्यत्वभावनामेवं, यः करोति महामतिः ।
तस्य सर्वस्वनाशेऽपि, न शोकांशोऽपि जायते ॥ २८ ॥

**अशुचित्वभावना**

लवणाकरे पदार्थाः पतिता लवणं यथा भवन्तीह ।
काये तथा मलाः स्युस्तदसावशुचिः सदा कायः ॥ २९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कायः शोणितशुक्रमीलनभवो गर्भो जरावेष्टितो,
मात्रास्वादितखाद्यपेयरसकैर्वृद्धिं क्रमात्प्रापितः ।
क्लिद्यद्धातुसमाकुलः कृमिरुजागण्डूपदाद्यास्पदं,
कैर्मन्येत सुबुद्धिभिः शुचितया सर्वैर्मलैः कश्मलः ? ॥ ३० ॥

सुस्वादं शुभगन्धिमोदकदधिक्षीरेक्षुशाल्योदन-
द्राक्षापर्पटिकामृताघृतपूरस्वर्गच्युताम्रादिकम् ।
भुक्तं यत्सहसैव यत्र मलसात्सम्पद्यते सर्वत-
स्तं कायं सकलाशुचिं शुचिमहो मोहान्धिता मन्वते ॥ ३१ ॥

अम्भःकुम्भशतैर्वपुर्ननु बहिर्मुग्धाः शुचित्वं कियत्
कालं लम्भयथोत्तमं परिमलं कस्तूरिकाद्यैस्तथा ।
विष्ठाकोष्ठकमेतदङ्गकमहो मध्ये तु शौचं कथ-
ङ्कारं नेष्यथ सूत्रयिष्यथ कथङ्कारं च तत्सौरभम् ? ॥ ३२ ॥

दिव्यामोदसमृद्धिवासितदिशः श्रीखण्डकस्तूरिका-
कर्पूरागुरुकुङ्कुमप्रभृतयो भावा यदाश्लेषतः ।
दौर्गन्ध्यं ददति क्षणेन मलतां चाबिभ्रते सोऽप्यहो,
देहः कैश्चन मन्यते शुचितया वैधेयतां पश्यत ॥ ३३ ॥

इत्यशौचं शरीरस्य, विभाव्य परमार्थतः ।
सुमतिर्ममतां तत्र, न कुर्वीत कदाचन ॥ ३४ ॥

**आस्रवभावना**

मनोवचोवपुर्योगः, कर्म येनाशुभं शुभम् ।
भविनामास्रवन्त्येते, प्रोक्तास्तेनास्रवा जिनैः ॥ ३५ ॥

मैत्र्या सर्वेषु सत्त्वेषु, प्रमोदेन गुणाधिके ।
माध्यस्थ्येनाविनीतेषु, कृपया दुःखितेषु च ॥ ३६ ॥

सततं वासितं स्वान्तं, कस्यचित्पुण्यशालिनः ।
वितनोति शुभं कर्म, द्विचत्वारिंशदात्मकम् ॥ ३७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रौद्रार्त्तध्यानमिथ्यात्वकषायविषयैर्मनः ।
आक्रान्तमशुभं कर्म, विदधाति द्व्यशीतिधा ॥ ३८ ॥

सर्वज्ञगुरुसिद्धान्तसङ्घसद्गुणवर्णकम् ।
ऋतं हितं च वचनं, कर्म सञ्चिनुते शुभम् ॥ ३९ ॥

श्रीसङ्घगुरुसर्वज्ञधर्मधार्मिकदूषकम् ।
उन्मार्गदेशि वचनमशुभं कर्म पुष्यति ॥ ४० ॥

देवार्चनगुरूपास्ति-साधुविश्रामणादिकम् ।
वितन्वती सुगुप्ता च, तनुर्वितनुते शुभम् ॥ ४१ ॥

मांसाशनसुरापानजन्तुघातनचौरिकाः ।
पारदार्यादि कुर्वाणमशुभं कुरुते वपुः ॥ ४२ ॥

एनामाश्रवभावनामविरतं यो भावयेद् भावत-
स्तस्यानर्थपरम्परैकजनकाद् दुष्टाश्रवौघात् मनः ।
व्यावृत्याखिलदुःखदावजलदे निःशेषशर्मावली-
निर्माणप्रवणे शुभाश्रवगणे नित्यं रतिं पुष्यति ॥ ४३ ॥

## संवरभावना

आश्रवाणां निरोधो यः, संवरः स प्रकीर्तितः ।
सर्वतो देशतश्चेति, द्विधा स तु विभज्यते ॥ ४४ ॥

अयोगिकेवलिष्वेव, सर्वतः संवरो मतः ।
देशतः पुनरेकद्विप्रभृत्याश्रवरोधिषु ॥ ४५ ॥

प्रत्येकमपि स द्वेधा, द्रव्यभावविभेदतः ।
यत्कर्मपुद्गलादानमात्मन्याश्रवतो भवेत् ॥ ४६ ॥

एतस्य सर्वदेशाभ्यां, छेदनं द्रव्यसंवरः ।
भवहेतुक्रियायास्तु, त्यागोऽसौ भावसंवरः ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिथ्यात्वकषायादीनामाश्रवाणां मनीषिभिः ।
निरोधाय प्रयोक्तव्याः, उपायाः प्रतिपन्थिनः ॥ ४८ ॥

मिथ्यात्वमार्त्तरौद्राख्यकुध्याने च सुधीर्जयेत् ।
दर्शनेनाकलङ्केन, शुभध्यानेन च क्रमात् ॥ ४९ ॥

क्षान्त्या क्रोधं मृदुत्वेन, मानं मायामृजुत्वतः ।
सन्तोषेण तथा लोभं, निरुन्धीत महामतिः ॥ ५० ॥

शब्दादिविषयानिष्टानिष्टांश्चापि विषोपमान् ।
रागद्वेषप्रहाणेन, निराकुर्वीत कोविदः ॥ ५१ ॥

य एतद्भावनासङ्गी, सौभाग्यं भजते नरः ।
एति स्वर्गापवर्गश्रीरवश्यं तस्य वश्यताम् ॥ ५२ ॥

## निर्जरा भावना

संसारहेतुभूताया, यः क्षयः कर्मसन्ततेः ।
निर्जरा सा पुनर्द्वेधा, सकामाकामभेदतः ॥ ५३ ॥

श्रमणेषु सकामा स्यादकामा शेषजन्तुषु ।
पाकः स्वत उपायाच्च कर्मणां स्याद् यथाऽऽम्रवत् ॥ ५४ ॥

कर्मणां नः क्षयो भूयादित्याशयवतां सताम् ।
वितन्वतां तपस्यादि, सकामा शमिनां मता ॥ ५५ ॥

एकेन्द्रियादिजन्तूनां, सज्ज्ञानरहितात्मनाम् ।
शीतोष्णवृष्टिदहनच्छेदभेदादिभिः सदा ॥ ५६ ॥

कष्टं वेदयमानानां, यः शाटः कर्मणां भवेत् ।
अकामनिर्जरामेनामामनन्ति मनीषिणः ॥ ५७ ॥

तपःप्रभृतिभिर्वृद्धिं, व्रजन्ती निर्जरा यतः ।
ममत्वं कर्म संसारं, हन्यात्तां भावयेत्ततः ॥ ५८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## लोकस्वभाव भावना

वैशाखस्थानस्थितकटिस्थकरयुगनराकृतिर्लोकः ।
भवति द्रव्यैः पूर्णः, स्थित्युत्पत्तिव्ययाक्रान्तैः ॥ ५९ ॥

ऊर्ध्वतिर्यगधोभेदैः, स त्रेधा जगदे जिनैः ।
रुचकादष्टप्रदेशान्मेरुमध्यव्यवस्थितात् ॥ ६० ॥

नवयोजनशत्यूर्ध्वमधोभागेऽपि सा तथा ।
एतत्प्रमाणकस्तिर्यग्लोकश्चित्रपदार्थभृत् ॥ ६१ ॥

ऊर्ध्वलोकस्तदुपरि, सप्तरज्जुप्रमाणकः ।
एतत्प्रमाणसंयुक्तश्चाधोलोकोऽपि कीर्तितः ॥ ६२ ॥

रत्नप्रभाप्रभृतयः, पृथिव्यः सप्त वेष्टिताः ।
घनोदधिघनवाततनुवातैस्तमोघनाः ॥ ६३ ॥

तृष्णाक्षुधावधाघातभेदनच्छेदनादिभिः ।
दुःखानि नारकास्तत्र, वेदयन्ते निरन्तरम् ॥ ६४ ॥

प्रथमा पृथिवी पिण्डे, योजनानां सहस्रकाः ।
अशीतिर्लक्षमेकं च, तत्रोपरि सहस्रकम् ॥ ६५ ॥

अधश्च मुक्त्वा पिण्डस्य, शेषस्याभ्यन्तरे पुनः ।
भवनाधिपदेवानां, भवनानि जगुर्जिनाः ॥ ६६ ॥

असुरा नागास्तडितः, सुपर्णा अग्नयोऽनिलाः ।
स्तनिताब्धिद्वीपदिशः, कुमारान्ता दशेति ते ॥ ६७ ॥

व्यवस्थिताः पुनः सर्वे, दक्षिणोत्तरयोर्दिशोः ।
तत्रासुराणां चमरो, दक्षिणावासिनां विभुः ॥ ६८ ॥

उदीच्यानां बलिर्नागकुमारादेर्यथाक्रमम् ।
धरणो भूतानन्दश्च, हरिर्हरिसहस्तथा ॥ ६९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेणुदेवो वेणुदाली, चाग्निशिखाग्निमाणवौ ।
वेलम्बः प्रभञ्जनश्च, सुघोषमहाघोषकौ ॥ ७० ॥

जलकान्तो जलप्रभस्ततः पूर्णो विशिष्ठकः ।
अमितो मितवाहनः, इन्द्रा ज्ञेया द्वयोर्दिशोः ॥ ७१ ॥

अस्या एव पृथिव्या उपरितने मुक्तयोजनसहस्रे ।
योजनशतमध उपरि च मुक्त्वाऽष्टसु योजनशतेषु ॥ ७२ ॥

पिशाचाद्यष्टभेदानां व्यन्तराणां तरस्विनाम् ।
नगराणि भवन्त्यत्र, दक्षिणोत्तरयोर्दिशोः ॥ ७३ ॥

पिशाचा भूता यक्षाश्च, राक्षसाः किन्नरास्तथा ।
किम्पुरुषा महोरगा, गन्धर्वा इति तेऽष्टधा ॥ ७४ ॥

दक्षिणोत्तरभागेन, तेषामपि च तस्थुषाम् ।
द्वौ द्वाविन्द्रौ समाम्नातौ, यथासङ्ख्यं सुबुद्धिभिः ॥ ७५ ॥

कालस्ततो महाकालः, सुरूपः प्रतिरूपकः ।
पूर्णभद्रो माणिभद्रो, भीमो भीमो महादिकः ॥ ७६ ॥

किन्नरकिम्पुरुषौ सत्पुरुषमहापुरुषनामकौ तदनु ।
अतिकायमहाकायौ गीतरतिश्चैव गीतयशाः ॥ ७७ ॥

अस्या एव पृथिव्या उपरि च योजनशतं हि यन्मुक्तम् ।
तन्मध्यादध उपरि च योजनदशकं परित्यज्य ॥ ७८ ॥

मध्येऽशीताविह योजनेषु तिष्ठन्ति वनचरनिकायाः ।
अप्रज्ञप्तिकमुख्या अष्यवल्पर्धिकाः किञ्चित् ॥ ७९ ॥

अत्र प्रतिनिकायं च, द्वौ द्वाविन्द्रौ महाद्युती ।
दक्षिणोत्तरभागेन, विज्ञातव्यौ मनीषिभिः ॥ ८० ॥

योजनलक्षोन्नतिना स्थितेन मध्ये सुवर्णमयवपुषा ।
मेरुगिरिणा विशिष्टे जम्बूद्वीपे भवन्त्यत्र ॥ ८१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्षाणि भारतादीनि, सप्त वर्षधरास्तथा ।
पर्वता हिमवन्मुख्याः, षट् शाश्वतजिनालयाः ॥ ८२ ॥

योजनलक्षप्रमिताज्जम्बूद्वीपात्परो द्विगुणमानः ।
लवणसमुद्रः परतस्तद्द्विगुणद्विगुणविस्ताराः ॥ ८३ ॥

बोद्धव्या धातकीखण्डकालोदाद्या असङ्ख्यकाः ।
स्वयम्भूरमणान्ताश्च, द्वीपवारिधयः क्रमात् ॥ ८४ ॥

प्रत्येकरससम्पूर्णाश्चत्वारस्तोयराशयः ।
त्रयो जलरसा अन्ये, सर्वेऽपीक्षुरसाः स्मृताः ॥ ८५ ॥

सुजातपरमद्रव्यहृद्यमद्यसमोदकः ।
वारुणीवरवार्धिः स्यात्, क्षीरोदजलधिः पुनः ॥ ८६ ॥

सम्यक्क्वथितखण्डादिमुग्धदुग्धसमोदकः ।
घृतवरः सुतापितनव्यगव्यघृतोदकः ॥ ८७ ॥

लवणाब्धिस्तु लवणास्वादपानीयपूरितः ।
कालोदः पुष्करवरः, स्वयम्भूरमणस्तथा ॥ ८८ ॥

मेघोदकरसाः किन्तु, कालोदजलधेर्जलम् ।
कालं गुरुपरिणामं, पुष्करोदजलं पुनः ॥ ८९ ॥

हितं लघुपरिणामं, स्वच्छस्फटिकनिर्मलम् ।
स्वयम्भूरमणस्यापि, जलधेर्जलमीदृशम् ॥ ९० ॥

त्रिभागावर्तसुचतुर्जातकेक्षुरसोपमम् ।
शेषासङ्ख्यसमुद्राणां, नीरं निगदितं जिनैः ॥ ९१ ॥

समभूमितलादूर्ध्वं, योजने शतसप्तके ।
गते नवतिसंयुक्ते, ज्योतिषां स्यादधस्तलः ॥ ९२ ॥

तस्योपरि च दशसु, योजनेषु दिवाकरः ।
तदुपर्यशीतिसङ्ख्ययोजनेषु निशाकरः ॥ ९३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्योपरि च विंशत्यां योजनेषु ग्रहादयः ।
स्यादेवं योजनशतं, ज्योतिर्लोको दशोत्तरम् ॥ ९४ ॥

जम्बूद्वीपे भ्रमन्तौ च द्वौ चन्द्रौ द्वौ च भास्करौ ।
चत्वारो लवणाम्भोधौ, चन्द्राः सूर्याश्च कीर्तिताः ॥ ९५ ॥

धातकीखण्डके चन्द्राः, सूर्याश्च द्वादशैव हि ।
कालोदे द्विचत्वारिंशच्चन्द्राः सूर्याश्च कीर्तिताः ॥ ९६ ॥

पुष्करार्धे द्विसप्ततिश्चन्द्राः सूर्याश्च मानुषे ।
क्षेत्रे द्वात्रिंशमिन्दूनां, सूर्याणां च शतं भवेत् ॥ ९७ ॥

मानुषोत्तरतः पञ्चाशद्योजनसहस्रकैः ।
चन्द्रैरन्तरिताः सूर्याः, सूर्यैरन्तरिताश्च ते ॥ ९८ ॥

मानुषक्षेत्रचन्द्रार्कप्रमाणार्धप्रमाणकाः ।
तत्क्षेत्रपरिधेर्वृद्ध्या, वृद्धिमन्तश्च सङ्ख्यया ॥ ९९ ॥

स्वयम्भूरमणं व्याप्य, घण्टाकारा असङ्ख्यकाः ।
शुभलेश्या मन्दलेश्यास्तिष्ठन्ति सततं स्थिराः ॥ १०० ॥

समभूमितलादूर्ध्वं, सार्धरज्जौ व्यवस्थितौ ।
कल्पावनल्पसम्पत्ती, सौधर्मेशाननामकौ ॥ १०१ ॥

सार्धरज्जुद्वये स्यातां, समानौ दक्षिणोत्तरौ ।
सनत्कुमारमाहेन्द्रौ, देवलोकौ मनोहरौ ॥ १०२ ॥

ऊर्ध्वलोकस्य मध्ये च, ब्रह्मलोकः प्रकीर्तितः ।
तदूर्ध्वं लान्तकः कल्पो, महाशुक्रस्ततः परम् ॥ १०३ ॥

देवलोकः सहस्रारोऽथाष्टमो रज्जुपञ्चके ।
एकेन्द्रौ चन्द्रवद् वृत्तावानतप्राणतौ ततः ॥ १०४ ॥

रज्जुषट्के ततः स्यातामेकेन्द्रावारणाच्युतौ ।
चन्द्रवद्वर्तुलावेवं, कल्पा द्वादश कीर्तिताः ॥ १०५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रैवेयकास्त्रयोऽधस्त्यास्त्रयो मध्यमकास्तथा ।
त्रयश्चोपरितनाः स्युरिति ग्रैवेयका नव ॥ १०६ ॥

अनुत्तरविमानानि, तदूर्ध्वं पञ्च तत्र च ।
प्राच्यां विजयमपाच्यां, वैजयन्तं प्रचक्षते ॥ १०७ ॥

प्रतीच्यां तु जयन्ताख्यमुदीच्यामपराजितम् ।
सर्वार्थसिद्धं तन्मध्ये, सर्वोत्तममुदीरितम् ॥ १०८ ॥

स्थितिप्रभावलेश्याभिर्विशुद्ध्यवधिदीप्तिभिः ।
सुखादिभिश्च सौधर्माद्यावत्सर्वार्थसिद्धिकम् ॥ १०९ ॥

पूर्वपूर्वत्रिदशेभ्यस्तेऽधिका उत्तरोत्तरे ।
हीनहीनतरा देहगतिगर्वपरिग्रहैः ॥ ११० ॥

घनोदधिप्रतिष्ठाना, विमानाः कल्पयोर्द्वयोः ।
त्रिषु वायुप्रतिष्ठानास्त्रिषु वायूदधिस्थिताः ॥ १११ ॥

ते व्योमविहितस्थानाः, सर्वेऽप्युपरिवर्तिनः ।
इत्यूर्ध्वलोकविमानप्रतिष्ठानविधिः स्मृतः ॥ ११२ ॥

सर्वार्थसिद्धाद् द्वादशयोजनेषु हिमोज्ज्वला ।
योजनपञ्चचत्वारिंशल्लक्षायामविस्तरा ॥ ११३ ॥

मध्येऽष्टयोजनपिण्डा, शुद्धस्फटिकनिर्मला ।
सिद्धशिलेषत्प्राग्भारा, प्रसिद्धा जिनशासने ॥ ११४ ॥

तस्या उपरि गव्यूतत्रितयेऽतिगते सति ।
तुर्यगव्यूतषड्भागे, स्थिताः सिद्धा निरामयाः ॥ ११५ ॥

अनन्तसुखविज्ञानवीर्यसद्दर्शनाः सदा ।
लोकान्तस्पर्शिनोऽन्योऽन्यावगाढाः शाश्वताश्च ते ॥ ११६ ॥

एनां भव्यजनस्य लोकविषयामभ्यस्यतो भावनां,
संसारैकनिबन्धने न विषयग्रामे मनो धावति ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किन्त्वन्यान्यपदार्थभावनसमुन्मीलत्प्रबोधोद्धुरं,
धर्मध्यानविधाविह स्थिरतरं तज्जायते संततम् ॥ ११७ ॥

**बोधिदुर्लभत्वभावना**

पृथ्वीनीरहुताशवायुतरुषु क्लिष्टैर्निजैः कर्मभि-
र्भ्राम्यन् भीमभवेऽत्र पुद्गलपरावर्ताननन्तानहो ।
जीवः काममकामनिर्जरतया सम्प्राप्य पुण्यं शुभं,
प्राप्नोति त्रसरूपतां कथमपि द्वित्रीन्द्रियाद्यामिह ॥ ११८ ॥

आर्यक्षेत्रसुजातिसत्कुलवपुर्नीरोगतासम्पदो,
राज्यं प्राज्यसुखं च कर्मलघुताहेतोरवाप्नोत्ययम् ।
तत्त्वातत्त्वविवेचनैककुशलां बोधिं न तु प्राप्तवान्,
कुत्राप्यक्षयमोक्षसौख्यजननीं श्रीसर्वविद्देशिताम् ॥ ११९ ॥

बोधिर्लब्धा यदि भवेदेकदाऽप्यत्र जन्तुभिः ।
इयत्कालं न तेषां तद्भवे पर्यटनं भवेत् ॥ १२० ॥

द्रव्यचारित्रमप्येतैर्बहुशः समवाप्यत ।
सज्ज्ञानकारिणी क्वापि, न तु बोधिः कदाचन ॥ १२१ ॥

येऽसिध्यन् ये च सिद्ध्यन्ति, ये सेत्स्यन्ति च केचन ।
ते सर्वे बोधिमाहात्म्यात्तस्माद्बोधिरुपास्यताम् ॥ १२२ ॥

**धर्मकथकोऽर्हन्निति भावना**

अर्हन्तः केवलालोकालोकितालोकलोककाः ।
यथार्थं धर्ममाख्यातुं, पटिष्ठा न पुनः परे ॥ १२३ ॥

वीतरागा हि सर्वत्र, परार्थकरणोद्यताः ।
न कुत्राप्यनृतं ब्रूयुस्ततस्तद्धर्मसत्यता ॥ १२४ ॥

क्षान्त्यादिभेदैर्धर्मं च, दशधा जगदुर्जिनाः ।
यं कुर्वन् विधिना जन्तुर्भवाब्धौ न निमज्जति ॥ १२५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वापरविरुद्धानि, हिंसादेः कारकाणि च ।
वचांसि चित्ररूपाणि, व्याकुर्वद्भिर्निजेच्छया ॥ १२६ ॥

कुतीर्थिकैः प्रणीतस्य, सद्गतिप्रतिपन्थिनः ।
धर्मस्य सकलस्यापि, कथं स्वाख्यातता भवेत् ? ॥ १२७ ॥

यच्च तत्समये क्वापि, दयासत्यादिपोषणम् ।
दृश्यते तद्वचोमात्रं, बुधैर्ज्ञेयं न तत्त्वतः ॥ १२८ ॥

यत्प्रोद्दाममदान्धसिन्धुरघटं साम्राज्यमासाद्यते,
यन्निःशेषजनप्रमोदजनकं सम्पद्यते वैभवम् ।
यत्पूर्णेन्दुसमद्युतिर्गुणगणः सम्प्राप्यते यत्परं,
सौभाग्यं च विजृम्भते तदखिलं धर्मस्य लीलायितम् ॥ १२९ ॥

यन्न प्लावयति क्षितिं जलनिधिः कल्लोलमालाकुलो,
यत्पृथ्वीमखिलां धिनोति सलिलासारेण धाराधरः ।
यच्चन्द्रोष्णरुची जगत्युदयतः सर्वान्धकारच्छिदे,
तन्निःशेषमपि ध्रुवं विजयते धर्मस्य विस्फूर्जितम् ॥ १३० ॥

अबन्धूनां बन्धुः सुहृदसुहृदां सम्यगगदो,
गदार्त्तिक्लान्तानां धनमधनभावार्तमनसाम् ।
अनाथानां नाथो गुणविरहितानां गुणनिधिः,
जयत्येको धर्मः परमिह हितव्रातजनकः ॥ १३१ ॥

अर्हता कथितो धर्मः, सत्योऽयमिति भावयन् ।
सर्वसम्पत्करे धर्मे, धीमान् दृढतरो भवेत् ॥ १३२ ॥

एकामप्यमलामिमासु सततं यो भावयेद्भावनां,
भव्यः सोऽपि निहन्त्यशेषकलुषं दत्तासुखं देहिनाम् ।
यत्स्वभ्यस्तसमस्तजैनसमयस्ता द्वादशाप्यादरा-
दभ्यस्येल्लभते स सौख्यमतुलं किं तत्र कौतूहलम् ? ॥ १३३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पू.आ.श्री भावदेवसूरिविरचितश्रीपार्श्वनाथचरित्रान्तर्गत

# ॥ धर्माराधन-शिक्षा ॥

सर्वत्रौचित्यवर्तित्वमुपेक्षा परदूषणे ।
परेणात्ते गुणे दोषे, क्षमायां धर्मसंग्रहः ॥ १ ॥

औचित्याच्चक्षुषि न्यस्तं, श्रिये कज्जलमप्यहो ।
अनौचित्येन पादस्थं न कुण्डलमपीष्यते ॥ २ ॥

विमृश्याऽऽय-व्ययं धर्मकार्यं कुर्यात् तथा बुधः ।
निश्चय-व्यवहाराभ्यां, यथा बहुगुणं भवेत् ॥ ३ ॥

केवलं व्यवहारोऽन्तं, नैति नद्योघगामिवत् ।
सदोत्सर्गोऽप्यगच्छेदाद्, ऋजुगामीव नो मतः ॥ ४ ॥

यथैवाऽछिन्दता वृक्षं, गृह्यते तस्य तत् फलम् ।
व्यवहारमनुल्लङ्घ्य, ध्यातव्यो निश्चयस्तथा ॥ ५ ॥

निश्चयस्तत्त्वसारोऽपि, व्यवहारेण निर्वहेत् ।
सकलस्याऽपि देवस्य, रक्षा प्राहरिकैर्भवेत् ॥ ६ ॥

निम्नोन्नतादिवैषम्यं, विदित्वा सर्ववस्तुषु ।
मध्याङ्कव्यवहारेण, सूत्रधारः प्रवर्तते ॥ ७ ॥

आत्मोत्कर्ष-परद्वेष-परे प्रायः कलौ जने ।
प्राप्य तत्त्वामृतं धीरः, कलिं कृत्वा न हारयेत् ॥ ८ ॥

जिनेन निगृहीता ये, रागद्वेषादयो हठात् ।
तान् ये पुष्णन्त्यसौ, तेषां कथं नाथः प्रसीदति ? ॥ ९ ॥

अज्ञानाद् दृष्टिबन्धेन, पदबन्धेन गेहिनः ।
रुध्यन्ते ते पुनः शोच्या, ये रुद्धा बन्धनं विना ॥ १० ॥

दूरेऽस्तु परदोषस्याऽऽदानं स्वपरतापकम् ।
धत्ते तत्स्पर्शमात्रेऽपि, हृद् वाग् मालिन्यमुल्बणम् ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सन्तो गुणप्रियास्तेन, परेणात्ते गुणे भृशम् ।
हृष्टाः, नीचास्तु दूयन्ते, येन ते दोषवत्सलाः ॥ १२ ॥

कृतप्रतिकृता वृद्धिः स्यात् सम्बन्धविरोधयोः ।
परोक्तं तेन नो धत्ते, योगी लाभनकोपमम् ॥ १३ ॥

महतां दूषणोद्धारादुपकारी खलः खलु ।
मुधा निदायकं सस्यक्षेत्रे, को नाऽभिनन्दति ? ॥ १४ ॥

अर्थमिच्छन्ति सन्तोऽपि, किन्त्वनौपाधिकत्वतः ।
स्वगुणख्यापनान्मध्याः, नीचास्तु परदूषणात् ॥ १५ ॥

आस्तां स्वात्ताऽऽतपत्राभं, स्वगुणोच्चारणं स्वयम् ।
अन्येनाऽपि गुणे ह्यात्ते, साधुर्नम्रो ह्रिया भवेत् ॥ १६ ॥

दूषयित्वाऽन्यवस्तूनि, गुणारोपं स्ववस्तुनः ।
वणिग्धर्मेऽपि शौचात्मा, न कुर्यात् किं पुनर्यतिः ॥ १७ ॥

उद्धर्तुं नैव शक्यन्ते, सर्वतो भुवि कण्टकाः ।
स्वयं तु शक्यते मोक्तुं, पादो निष्कण्टकक्षितौ ॥ १८ ॥

रक्ता देह-यशो-धर्मे, पत्र पुष्प-फलप्रभे ।
तदा त्वचिरनित्यस्थे, स्वल्पधी-मध्यमो-त्तमाः ॥ १९ ॥

चक्षुः-श्रवणवैकल्यात् पापानां मोहनिद्रया ।
दिवाऽपि रजनी साऽपि, धर्मिणां दिवसायते ॥ २० ॥

कलिकालकुवातेऽत्र, वाति यस्य विनश्यति ।
न सस्यं, शस्यते लोके, स एव पृथुभाग्यभूः ॥ २१ ॥

रजःक्रीडापरे लोके, धूलिपर्वसमे कलौ ।
तद्वाक्यतिलकं मत्वा, रक्षत्यात्मानमात्मवित् ॥ २२ ॥

सुषमत्वात् सुखोत्तारास्ततश्चापि कृतादयः ।
दुस्तरो विषमावर्त्तः, स्वल्पोऽपि हि कलिः पुनः ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुरुषार्थद्विषं ज्ञात्वा, प्रकृतिं स्वार्थतत्पराम् ।
धूर्तमैत्र्या ततः स्वार्थं, यः करोति स चेतनः ॥ २४ ॥

अजीर्णं तपसः क्रोधो, ज्ञानाजीर्णमहंकृतिः ।
परतप्तिः क्रियाजीर्णं, जित्वा त्रीन् निर्वृतो भव ॥ २५ ॥

सद्यः प्रीतिकरं लोके, वचो वाच्यं हितं मतम् ।
मूर्खः स्वमुखलालाभिरेव लूतेव बध्यते ॥ २६ ॥

सामकः कायिको दोषः, प्रायोऽत्यर्थस्तु वाचिकः ।
यतः पश्चादवस्थायि, व्यापकं च वचो जने ॥ २७ ॥

परार्थं व्यापयन् जीवो, खं कान्दविकायते ।
न तु स्थूलोपयोगोऽपि, यस्य कः स्यात् ततोऽधमः ? ॥ २८ ॥

तुच्छा देहस्य सौन्दर्याद्, रज्यन्ते मध्यमा गिराम् ।
चित्तस्य तूत्तमा जीवे, सुदुर्लभं पुनस्त्रयम् ॥ २९ ॥

वीक्ष्य बाह्यान्त्रसंहर्षात्, खेदितव्यं जनार्जने ।
रज्येत् त्वन्तर्मुखीभूय, लक्ष्यं भित्त्वात्मपार्थिवः ॥ ३० ॥

शमसर्वस्वमादाय, जितो मोहमहारिणा ।
धत्ते यस्तज्जयेऽमर्षं, स योग्यो मुक्तिसम्पदः ॥ ३१ ॥

यदि शत्रुजये वाञ्छा, तदात्मानं विनिर्जय ।
अयमात्मा जितो येन, तेन सर्वे द्विषो जिताः ॥ ३२ ॥

बहिर्मुक्तोऽप्यमुक्तोऽन्तर्बद्धपक्षीव वल्गितः ।
निस्तुषोऽपि तिलस्तापकरोऽन्तः स्नेहधारणात् ॥ ३३ ॥

एकत्र वसतां यस्य वाक्-काय-मनसां भवेत् ।
परस्परं पृथग्भावः कुतः तस्यात्मनः शिवम् ? ॥ ३४ ॥

एकान्ते मुखरोधेन, निर्लम्पटमतेः सतः ।
क्षणाद् मोहज्वरे क्षीणे, भोगो भूरितरो भवेत् ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदाऽरिष्टकुलादन्यं, स्वं विदित्वा तदुज्झति ।
तदा व्यक्तगुणो जीवः, श्लाघ्यः स्यात् परपुष्टवत् ॥ ३६ ॥

मध्येछाद्यगृहं बद्धभूमिकस्याऽतिभीर्यथा ।
प्रदीपेन तथा लोक-मध्ये साधोरपि स्फुटम् ॥ ३७ ॥

सदोषः पादधानीव प्रमादीवाऽङ्गरक्षकः ।
धर्मेऽशस्यमुनिर्बाढं न ग्राह्यस्तेन तं त्यजेत् ॥ ३८ ॥

यतित्वं यः समादाय, विरुद्धं चेष्टते कुधीः ।
आमपात्रमिव न्यायध्वस्तं कस्तं न निन्दति ? ॥ ३९ ॥

पण्डितेन मनो लक्ष्ये, शिक्षणीयं मुहुर्मुहुः ।
शैक्षवद् वञ्चयित्वैनं, भवक्रीडारसं व्रजेत् ॥ ४० ॥

घटी निरवधानस्य, गणकस्येव मज्जति ।
युञ्ज्यात् तेन मनो लक्ष्ये, धन्वीवाऽभ्यासतः शरम् ॥ ४१ ॥

धीरः सचेतनो मौनी, यो मार्गे यात्यसङ्गतः ।
बलिष्ठैरपि मोहाद्यैः, स शिवं यात्यगञ्जितः ॥ ४२ ॥

अज्ञानाज्जायते दुःखं, सज्ञानाच्च सुखं पुनः ।
अभ्यस्यं तत् तथा तेन, स्वात्मा ज्ञानमयो भवेत् ॥ ४३ ॥

अल्पज्ञानेन नो शान्तिं याति दृप्तात्मनां मनः ।
स्तोकवृष्ट्या यतस्तप्तभूमिरूष्मायतेतराम् ॥ ४४ ॥

बह्वासङ्गेन जीवस्याऽत्यासन्ना अपि पापिनः ।
ज्ञातास्तेन स्वयं यान्ति, दोषा ह्रीता इव ध्रुवम् ॥ ४५ ॥

विज्ञातभवतत्त्वस्य, दुःखं शोकेऽपि नो भवेत् ।
ताम्रं स्वर्णं विदित्वा यो, गृह्णीते तस्य कः क्लमः ? ॥ ४६ ॥

पङ्गुरूपं नृणां भाग्यं, व्यवसायोऽन्धसन्निभः ।
यथा सिद्धिस्तयोर्योगे, तथा ज्ञान-चरित्रयोः ॥ ४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मैत्री-प्रमोद-कारुण्य-माध्यस्थाख्या महागुणाः ।
युक्तस्तैर्लभते मुक्तिं, जीवोऽनन्तचतुष्टयम् ॥ ४८ ॥

मैत्री परहिते चिन्ता, परार्तिच्छेदधीः कृपा ।
मुदिता सद्गुणे तुष्टिर्माध्यस्थ्यं पाप्युपेक्षणम् ॥ ४९ ॥

क्षिप्तोऽपि लघुकर्माधः, स्यादुच्चैस्तुम्बवज्जले ।
अश्मवद् गुरुकर्मा तु, नीतोऽप्यूर्ध्वमधो व्रजेत् ॥ ५० ॥

निर्माय स्वभवं चैत्यमादिमध्यान्तसुन्दरम् ।
निर्वाहकलशं कोऽप्यारोप्य, कीर्तिध्वजां नयेत् ॥ ५१ ॥

पू.आ.श्रीसोमसूरिविरचितम्

## ॥ आराधनाप्रकरणम् ॥

नमिउण भणइ एवं, भयवं समउच्चियं समाइससु ।
तत्तो वागरइ गुरु, पज्जंताराहणं एयं ॥ १ ॥

आलोअसु अइयारे, वयाइ उच्चरसु खमिसु जीवेसु ।
वोसिरिसु भाविअप्पा, अट्ठारस पावठाणाइं ॥ २ ॥

चउसरण दुक्कड गरिहणं च, सुकडाणुमोयणं कुणसु ।
सुहभावणं अणसणं, पंच नमुक्कार सरणं च ॥ ३ ॥

नाणम्मि दंसणम्मि य, चरणम्मि तवम्मि तहय वीरियम्मि ।
पंचविहे आयारे, अइआरालोयणं कुणसु ॥ ४ ॥

काल विणयाई अट्ठ, प्पयार आयार विरहियं नाणं ।
जं किंचि मए पढियं, मिच्छा मि दुक्कडं तस्स ॥ ५ ॥

नाणीण जं न दिण्णं, सइ सामत्थम्मि वत्थ असणाइ ।
जा विहिया य अवण्णा, मिच्छा मि दुक्कडं तस्स ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जे पंच भेअ नाणस्स, निंदणं जो इमस्स उवहासो ।
जो उ कओ उवघाओ, मिच्छा मि दुक्कडं तस्स ॥ ७ ॥

नाणोवगरण भूयाणं, कवलिया फलिह पुत्थियाईणं ।
आसायणा कया जं, मिच्छा मि दुक्कडं तस्स ॥ ८ ॥

जं सम्मत्तं निस्सं, कियाइ अट्ठविह गुण समाउत्तं ।
धरियं मए न सम्मं, मिच्छा मि दुक्कडं तस्स ॥ ९ ॥

जं न जणिया जिणाणं, जिण पडिमाणं च भावओ पूया ।
जं च अभत्ति विहिया, मिच्छा मि दुक्कडं तस्स ॥ १० ॥

जं विरईओ विणासो, चेईय दव्वस्स जं विणासंतो ।
अण्णे उविक्खिओ मे, मिच्छा मि दुक्कडं तस्स ॥ ११ ॥

आसायणं कुणंतो, जं कहवि जिणिंद मंदिराइसु ।
सत्तीए न निसिद्धो, मिच्छा मि दुक्कडं तस्स ॥ १२ ॥

जं पंचहिं समिइहिं, तीहिं गुत्तीहिं संगयं सययं ।
परिपालियं न चरणं, मिच्छा मि दुक्कडं तस्स ॥ १३ ॥

एगिंदियाण जं कहवि, पुढवि जल जलण मारुय तरूणं ।
जीवाण वहो विहिओ, मिच्छा मि दुक्कडं तस्स ॥ १४ ॥

किमि संख सुत्ति पुयर, जलोय गंडोल अलसप्पमुहा ।
बेइंदिया हया जं, मिच्छा मि दुक्कडं तस्स ॥ १५ ॥

गद्दह कुंथु जूआ, मंकुण मंकोड कीडियाईया ।
तेइंदिया हया जं, मिच्छा मि दुक्कडं तस्स ॥ १६ ॥

करोलिय कुत्तिय विच्छू, मच्छिया सलहच्छप्पय पमुहा ।
चउरिंदिया हया जं, मिच्छा मि दुक्कडं तस्स ॥ १७ ॥

जलयर थलयर खयरा, आउट्टि प्पमाय दप्प कप्पेसुं ।
पंचिदिया हया जं, मिच्छा मि दुक्कडं तस्स ॥ १८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जं कोह लोह भय हास, परवसेणं मए विमूढेणं ।
भासियमसच्च वयणं, तं निंदे तं च गरिहामि ॥ १९ ॥

जं कवडवावडेण, मए परं वंचिउण थोवं पि ।
गहियं धणं अदिण्णं, तं निंदे तं च गरिहामि ॥ २० ॥

दिव्वं व मणुस्सं वा, तेरिच्छं वा सराग हियएणं ।
जं मेहुण मायरियं, तं निंदे तं च गरिहामि ॥ २१ ॥

जं धणधण्णसुवण्ण, पमुहम्मि परिग्गहे नवविहे वि ।
विहिओ ममत्तभावो, तं निंदे तं च गरिहामि ॥ २२ ॥

जं राईभोयणविरमणाई, नियमेसु विविहरूवेसु ।
खलियं मह संजायं, तं निंदे तं च गरिहामि ॥ २३ ॥

बाहिरमब्भिंतरयं, तवं दुवालसविहं जिणुद्दिट्ठं ।
जं सत्तीए न कयं, तं निंदे तं च गरिहामि ॥ २४ ॥

जोगेसु मुक्खपहसाहगेसु, जं वीरियं न य पउत्तं ।
मणवयकाइएहिं, तं निंदे तं च गरिहामि ॥ २५ ॥

पाणाइवायविरमणं, पमुहाई तुमं दुवालसवयाइं ।
सम्मं परिभावंतो, भणसु जहा गहिअभंगाइं ॥ २६ ॥

खामेसु सव्वसत्ते, खमेसु तेसिं तुमं विगयकोवो ।
परिहरिअ पुव्ववेरो, सव्वे मित्तित्ति चिंतेसु ॥ २७ ॥

पाणाइवाय मलियं, चोरिक्कं मेहुणं दविणमुच्छं ।
कोहं माणं मायं, लोभं पिज्जं तहा दोसं ॥ २८ ॥

कलहं अब्भक्खाणं, पेसुन्नं रइअरइ समाउत्तं ।
परपरिवायं माया, मोसं मिच्छत्तसल्लं च ॥ २९ ॥

वोसरिसु इमाइं, मुक्खमग्गसंसग्गविग्घभूयाइं ।
दुग्गइ निबंधणाइं, अट्ठारसपावठाणाइं ॥ ३० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चउत्तीसअइसयजुआ, अट्ठमहापाडिहेरपडिपुण्णा ।
सुरविहियसमवसरणा, अरिहंता मज्झ ते सरणं ॥ ३१ ॥

चउविहकसायचत्ता, चउवयणाचउपयारधम्मकहा ।
चउगइदुह निद्दलणा, अरिहंता मज्झ ते सरणं ॥ ३२ ॥

जे अट्ठकम्ममुक्का, वरकेवलनाणमुणियपरमत्था ।
अट्ठमयठाण रहिया, अरिहंता मज्झ ते सरणं ॥ ३३ ॥

भवखित्ते अरुहंता, भावारिप्पहणणेण अरिहंता ।
जे तिजगपूअणिज्जा, अरिहंता मज्झ ते सरणं ॥ ३४ ॥

तरिऊण भव समुद्दं, रउद्दं दुहलहरिलक्खदुल्लंघं ।
जे सिद्धि सुहं पत्ता, ते सिद्धा हुंतु मे सरणं ॥ ३५ ॥

जे भंजिऊण तवमुग्गरेणं, निबिडाइं कम्मनियडाइं ।
संपत्ता मुक्खसुहं, ते सिद्धा हुंतु मे सरणं ॥ ३६ ॥

झाणाणलजोगेणं, जाण निद्दड्ढसयलकम्ममलो ।
कणगं व जाण अप्पा, ते सिद्धा हुंतु मे सरणं ॥ ३७ ॥

जाण न जम्मो न जरा, न वाहिणो न मरणं न वा बाहा ।
न य कोहाइ कसाया, ते सिद्धा हुंतु मे सरणं ॥ ३८ ॥

काउं महुअर वित्तिं, जे बायालीसदोसपरिसुद्धं ।
भुंजंति भत्तपाणं, ते मुणिणो हुंतु मे सरणं ॥ ३९ ॥

पंचिंदियदमणपरा, निज्जिय कंदप्पदप्पसरपसरा ।
धारंति बंभचेरं, ते मुणीणो हुंतु मे सरणं ॥ ४० ॥

जे पंचसमिइसमिया, पंचमहव्वय - भरुव्वहणवसहा ।
पंचमगइअणुरत्ता, ते मुणिणो हुंतु मे सरणं ॥ ४१ ॥

जे चत्तसयलसंगा, सममणितिणमित्तसत्तुणो धीरा ।
साहंति मुक्खमग्गं, ते मुणिणो हुंतु मे सरणं ॥ ४२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जो केवलनाणदिवायरेहिं, तित्थंकरेहिं पण्णत्तो ।
सव्वजगज्जीवहियओ, सो धम्मो होउ मे सरणं ॥ ४३ ॥

कल्लाणकोडिजणणी, जत्थ अण्णत्थ – प्पबंधाइ निद्दलणी ।
वण्णिज्जइ जीवदया, सो धम्मो होउ मे सरणं ॥ ४४ ॥

जो पावभरुक्कंतं, जीवं भीमम्मि कुगइकुवम्मि ।
धारेई निवडमाणं, सो धम्मो होउ मे सरणं ॥ ४५ ॥

सग्गापवग्गपुरमग्गलग्गलोआण सत्थवाहो जो ।
भव – अडविलंघणखमो, सो धम्मो होउ मे सरणं ॥ ४६ ॥

एवं चउण्हं सरणं पवण्णो, निविण्णचित्तो भवचारगाओ ।
जं दुक्कडं किं पि समक्खमेसिं, निंदामि सव्वं पि अहं तमिण्हिं ॥ ४७ ॥

जं इत्थ मिच्छत्तविमोहिएणं, मए भमंतेणं कयं कुतित्थं ।
मणेण वायाइ कलेवरेणं, निंदामि सव्वं पि अहं तमिण्हिं ॥ ४८ ॥

पच्छाइओ जं जिणधम्ममग्गो, मए कुमग्गो पयडीकओ जं ।
जाओ अहं जं परपावहेऊ, निंदामि सव्वं पि अहं तमिण्हिं ॥ ४९ ॥

जंताणि जं जंतु दुहावहाइं, हलुक्खलाइणि मए कयाइं ।
जं पोसियं पाव कुडुंबयं तं, निंदामि सव्वं पि अहं तमिण्हिं ॥ ५० ॥

जिणभवणबिंबपुत्थय, संघसरुवाइ सत्तखित्ताइं ।
जं ववियं धणबीयं, तमहं अणुमोअए सुकयं ॥ ५१ ॥

जं सुद्धनाणदंसणचरणाइं भवण्णवप्पवहणाइं ।
सम्ममणुपालियाइ, तमहं अणुमोयए सुकयं ॥ ५२ ॥

जिणसिद्धसुरिउवज्झायसाहुसाहम्मियप्पवयणेसु ।
जं विहिओ बहुमाणो, तमहं अणुमोअए सुकयं ॥ ५३ ॥

सामाईयचउवीसत्थयाइ, आवस्सयम्मि छभेएण ।
जं उज्जमियं सम्मं, तमहं अणुमोअए सुकयं ॥ ५४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुव्वकयपुण्णपावाण, सुक्खदुक्खाण कारणं लोए।
न य अण्णो कोवि जणो, ईय मुणिय कुणसु सुहभावं ॥ ५५ ॥

पुव्विं दुचिण्णाणं, कम्माण वेइअण जं मुक्खो।
न पुणो अवेइआणं, इय मुणिय कुणसु सुहभावं ॥ ५६ ॥

जं तुमए नरए नारएणं, दुक्खं तितिक्खियं तिक्खं।
तत्तो कित्तिय मित्तं, इय मुणिय कुणसु सुहभावं ॥ ५७ ॥

जेण विणा चारित्तं, सुयं तवं दाणसीलमवि सव्वं।
कासकुसुमं व विहलं, इय मुणिय कुणसु सुहभावं ॥ ५८ ॥

जं भुंजिऊण बहुहा, सुरसेलसमुहपव्वएहिंतो।
तित्ती तए न पत्ता, तं चयसु चउव्विहाहारं ॥ ५९ ॥

जो सुलहो जीवाणं, सुरनरतिरिनरयगइचउक्केसु।
मुणिय दुल्लहं विरयं, तं चयसु चउव्विहाहारं ॥ ६० ॥

छज्जीवनिकायवहे, अकयम्मि कहं पि जो न संभवइ।
भवभमणदुहाहारं, तं चयसु चउव्विहाहारं ॥ ६१ ॥

चत्तम्मि जम्मि जीवाणं, होइ करयलगयं सुरिंदत्तं।
सिद्धिसुहं पिय सुलहं, तं चयसु चउव्विहाहारं ॥ ६२ ॥

नाणाविह पावपरायणो वि, जं पाविऊण अवसाणे।
जीवो लहइ सुरत्तं, तं सरसु मणे नमुक्कारं ॥ ६३ ॥

सुलहाओ रमणीओ, सुलहं रज्जं सुरत्तणं सुलहं।
इक्कुच्चिय जो दुल्लहो, तं सरसु मणे नमुक्कारं ॥ ६४ ॥

जेण सहाएण गयाण, परभवे संभवंति भवियाणं।
मणवंछियसुक्खाइं तं सरसु मणे नमुक्कारं ॥ ६५ ॥

लद्धम्मि जम्मि जीवाणं, जायइ गोपयं व भवजलही।
सिवसुहसच्चंकारं, तं सरसु मणे नमुक्कारं ॥ ६६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं गुरुवइट्ठं पज्जंताराहणं निसुणिऊणं।
वोसिट्ठ सव्वपावो, तहेव आसेवए एसो ॥ ६७ ॥

पंचपरमिट्ठिसमरणपरायणो पाविऊण पंचत्तं।
पत्तो पंचमकप्पम्मि, रायसीहो सुरिंदत्तं ॥ ६८ ॥

तप्पत्ती रयणवइ, तहेव आराहिउण तक्कप्पे।
सामाणियत्तं पत्ता, तओ चुआ निव्वइस्संति ॥ ६९ ॥

सिरि सोमसूरिरईयं, पज्जंताराहणं पसमजणणं।
जे अणुसरंति सम्मं, लहंति ते सासयं सोक्खं ॥ ७० ॥

पू. श्री सिद्धसेनाचार्यविरचितम्

## ॥ नमस्कारमाहात्म्यम् ॥

### प्रथमः प्रकाशः।

नमोऽस्तु गुरवे कल्प-तरवे जगतामपि।
वृषभस्वामिने मुक्ति-मृगनेत्रैककामिने ॥ १ ॥

तपोज्ञानधनेशाय, महेन्द्रप्रणतांह्रये।
सिद्धसेनाधिनाथाय, श्रीशान्तिस्वामिने नमः ॥ २ ॥

नमोऽस्तु श्रीसुव्रताया-ऽनन्तायाऽरिष्टनेमिने।
श्रीमत्पार्श्वाय वीराय, सर्वार्हद्भ्यो नमो नमः ॥ ३ ॥

देव्योऽच्छुप्ताऽम्बिकाब्राह्मी-पद्मावत्यङ्गिरादयः।
मातरो मे प्रयच्छन्तु, पुरुषार्थपरम्पराम् ॥ ४ ॥

जीयात् पुण्याङ्कजननी, पालनी शोधनी च मे।
हंसविश्रामकमल-श्रीः सदेष्टनमस्कृतिः ॥ ५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कटुकोऽप्येष संसारो, जन्मसंस्थितिदानतः ।
मान्यो मे यन्मया लेभे, जिनाज्ञाऽस्यैव संश्रयात् ॥ ६ ॥

भवतु नमोऽर्हत्सिद्धा-चार्योपाध्यायसर्वसाधुभ्यः ।
श्रीजिनशासनमनुज-क्षेत्रान्तःपञ्चमेरुभ्यः ॥ ७ ॥

ये नमो अरिहन्ताणं, नमो सिद्धाणमित्यथ ।
नमो आयरियाणं चो-वज्झायाणं नमोऽग्रगम् ॥ ८ ॥

नमो लोए सव्वसाहू-णमेवं पदपञ्चकम् ।
स्मरन्ति भावतो भव्याः, कुतस्तेषां भवभ्रमः ? ॥ ९ ॥

वर्णाः सन्तु श्रिये पञ्च-परमेष्ठिनमस्कृतेः ।
पञ्चत्रिंशज्जिनवचो-ऽतिशया इव रूपिणः ॥ १० ॥

तेषामनाद्यनन्तानां, श्लोकैस्त्रैलोक्यपावनैः ।
वितनोत्यात्मनः शुद्धिं, सिद्धसेनसरस्वती ॥ ११ ॥

नरनाथा वशे तेषां, नतास्तेभ्यः सुरेश्वराः ।
न ते बिभ्यति नागेभ्यो, येऽर्हन्तं शरणं श्रिताः ॥ १२ ॥

मोहस्तं प्रति न द्रोही, मोदते स निरन्तरम् ।
मोक्षं गमी सोऽचिरेण, भव्यो योऽर्हन्तमर्हति ॥ १३ ॥

अर्हन्ति यं केवलिनः, प्रादक्षिण्येन कर्मणा ।
अनन्तगुणरूपस्य, माहात्म्यं तस्य वेद कः ? ॥ १४ ॥

रिपवो रागरोषाद्याः, जिनेनैकेन ते हताः ।
लोकेशकेशवेशाद्याः, निबिडं यैर्विडम्बिताः ॥ १५ ॥

हंसवत् श्लिष्टयोः क्षीर-नीरयोर्जीवकर्मणोः ।
विवेचनं यः कुरुते, स एको भगवान् जिनः ॥ १६ ॥

'स्मृ'-'ध्यै' प्रभृतियुग्धातु-वर्णवत् सहजस्थितिः ।
कर्मात्मश्लेषो ह्यन्येषां, दुर्लक्ष्यो महतामपि ॥ १७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हन्तात्मकर्मणोर्बीजा-ऽङ्कुरवत् कुक्कुटाण्डवत् ।
मिथः संहतयोः पूर्वा-पर्यं नास्त्येव सर्वथा ॥ १८ ॥

तायिनः कर्मपाशेभ्यः, तारका मज्जतां भवे ।
तात्त्विकानामधीशा ये, तान् जिनान् प्रणिदध्महे ॥ १९ ॥

'णं'-कारोऽयं दिशत्येवं, त्रिरेखः शून्यचूलिकः ।
तत्त्वत्रयपवित्रात्मा, लभते पदमव्ययम् ॥ २० ॥

सशिरस्त्रिसरलरेखं, खचूलमित्यक्षरं सदा ब्रूते ।
भवति त्रिशुद्धिसरलः, त्रिभुवनमुकुटस्त्रिकालेऽपि ॥ २१ ॥

सप्तक्षेत्रीव सफला, सप्तक्षेत्रीव शाश्वती ।
सप्ताक्षरीयं प्रथमा, सप्त हन्तु भयानि मे ॥ २२ ॥

## द्वितीयः प्रकाशः ।

न जातिर्न मृतिस्तत्र, न भयं न पराभवः ।
न जातु क्लेशलेशोऽपि, यत्र सिद्धाः प्रतिष्ठिताः ॥ १ ॥

मोचास्तम्भ इवासारः, संसारः क्वैष सर्वथा ।
क्व च लोकाग्रगं लोके, सारत्वात्सिद्धवैभवम् ? ॥ २ ॥

सितधर्माः सितलेश्याः, सितध्यानाः सिताश्रयाः ।
सितश्लोकाश्च ये लोके, सिद्धास्ते सन्तु सिद्धये ॥ ३ ॥

सतां स्वर्मोक्षयोर्दाने, धाने दुर्गतिपाततः ।
मन्येऽहं युगपच्छक्तिं, सिद्धानां द्धेतिवर्णतः ॥ ४ ॥

'द्धा'वर्णे सिद्धशब्देऽत्र, संयोगो वर्णयोर्दधोः ।
सकर्णोऽयं सकर्णानां, फलं वक्तीव योगजम् ॥ ५ ॥

परस्परं कोऽपि योगः, क्रियाज्ञानविशेषयोः ।
स्त्रीपुंसयोरिवानन्दं, प्रसूते परमात्मजम् ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भाग्यं पङ्गूपमं पुंसां, व्यवसायोऽन्धसन्निभः ।
यथा सिद्धिस्तयोर्योगे, तथा ज्ञानचरित्रयोः ॥ ७ ॥

खड्गखेटकवद् ज्ञान-चारित्रद्वितयं वहन् ।
वीरो दर्शनसन्नाहः, कलेः पारं प्रयाति वै ॥ ८ ॥

नयतोऽभीप्सितं स्थानं, प्राणिनं सत्तपःशमौ ।
समं निश्चलविस्तारौ, पक्षाविव विहङ्गमम् ॥ ९ ॥

युक्तौ धूर्याविवोत्सर्गा-पवादौ वृषभावुभौ ।
शीलाङ्गरथमारूढं, क्षणात् प्रापयतः शिवम् ॥ १० ॥

निश्चयव्यवहारौ द्वौ, सूर्याचन्द्रमसाविव ।
इहामुत्र दिवारात्रौ, सदोद्योताय जाग्रतः ॥ ११ ॥

अन्तस्तत्त्वं मनःशुद्धिः, बहिस्तत्त्वं च संयमः ।
कैवल्यं द्वयसंयोगे, तस्माद् द्वितयभाग् भव ॥ १२ ॥

नैकचक्रो रथो याति, नैकपक्षो विहङ्गमः ।
नैवमेकान्तमार्गस्थो, नरो निर्वाणमृच्छति ॥ १३ ॥

दशकान्तर्नवास्तित्व-न्यायादेकान्तमप्यहो ।
अनेकान्तसमुद्रेऽस्ति, प्रलीनं सिन्धुपूरवत् ॥ १४ ॥

एकान्ते तु न लीयन्ते, तुच्छेऽनेकान्तसम्पदः ।
न दरिद्रगृहे मान्ति, सार्वभौमसमृद्धयः ॥ १५ ॥

एकान्ताभासो यः क्वापि, सोऽनेकान्तप्रसत्तिजः ।
वर्तितैलादिसामग्री-जन्मानं पश्य दीपकम् ॥ १६ ॥

सत्त्वासत्त्वनित्यानित्य-धर्माधर्मादयो गुणाः ।
एवं द्वये द्वये श्लिष्टाः, सतां सिद्धिप्रदर्शिनः ॥ १७ ॥

तदेकान्तग्रहावेश-मष्टधीगुणमन्त्रतः ।
मुक्त्वा यतध्वं तत्त्वाय, सिद्धये यदि कामना ॥ १८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'णं'-कारोऽत्र दिशत्येवं, त्रिरेखः शून्यमालितः ।
रत्नत्रयमयो ह्यात्मा, याति शून्यस्वभावताम् ॥ १९ ॥

शुभाशुभैः परिक्षीणैः, कर्मभिः केवलस्य या ।
चिद्रूपतात्मनः सिद्धौ, सा हि शून्यस्वभावता ॥ २० ॥

पञ्चविग्रहसंहन्त्री, पञ्चमीगतिदर्शिनी ।
रक्ष्यात् पञ्चाक्षरीयं वः, पञ्चत्वादिप्रपञ्चतः ॥ २१ ॥

## तृतीयः प्रकाशः ।

न तमो न रजस्तेषु, न च सत्त्वं बहिर्मुखम् ।
न मनोवाग्वपुःकष्टं, यैराचार्यांह्रयः श्रिताः ॥ १ ॥

मोहपाशैर्महच्चित्रं, मोटितानपि जन्मिनः ।
मोचयत्येव भगवान्, आचार्यः केशिदेववत् ॥ २ ॥

आचारा यत्र रुचिराः, आगमाः शिवसङ्गमाः ।
आयोपाया गतापायाः, आचार्यं तं विदुर्बुधाः ॥ ३ ॥

यथास्थितार्थप्रथको, यतमानो यमादिषु ।
यजमानः स्वात्मयज्ञं, यतीन्द्रो मे सदा गतिः ॥ ४ ॥

रिपौ मित्रे सुखे दुःखे, रिष्टे शिष्टे शिवे भवे ।
रिक्थे नैःस्व्ये समः सम्यक्, स्वामी संयमिनां मतः ॥ ५ ॥

या काचिदनघा सिद्धिः, या काचिद् लब्धिरुज्ज्वला ।
वृणुते सा स्वयं सूरिं, भ्रमरीव सरोरुहम् ॥ ६ ॥

'णं'-कारोऽत्र दिशत्येवं, त्रिरेखो व्योमचूलिकः ।
त्रिवर्गसमतायुक्ताः, स्युः शिरोमणयः सताम् ॥ ७ ॥

धर्मार्थकामा यदि वा, मित्रोदासीनशत्रवः ।
यद्वा रागद्वेषमोहाः, त्रिवर्गः समुदाहृतः ॥ ८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सप्ततत्त्वाम्बुजवनी-सप्तसप्तिविभानिभा ।
सप्ताक्षरी तृतीयेयं, सप्तावनितमो ह्रियात् ॥ ९ ॥

## चतुर्थः प्रकाशः ।

न खण्ड्यते कुपाखण्डैः, न त्रिदण्ड्या विडम्ब्यते ।
न दण्ड्यते चण्डिमाद्यैः, उपाध्यायं श्रयन् सुधीः ॥ १ ॥

मोमाश्रीह्रीधृतिब्राह्म्यो, मोच्चलन्तु तदङ्गतः ।
उपास्ते य उपाध्यायं, सिद्धादेशो महानिति ॥ २ ॥

उदयो मूर्तिमान् सम्यग्-दृष्टीनामुत्सवो धियाम् ।
उत्तमानां य उत्साहः, उपाध्यायः स उच्यते ॥ ३ ॥

वचो वपुर्वयो वक्षो, वर्जितं वधवार्त्तया ।
वशगं वेदविद्यानां, उपाध्यायमहेशितुः ॥ ४ ॥

ज्झाकारो वाचकश्लोक-भम्भाया व्यानशे दिशः ।
अनित्यैकान्तदृग्नित्यै-कान्तदृग्जयजन्मनः ॥ ५ ॥

या सप्तनयवैदग्धी, या परागमचातुरी ।
या द्वादशाङ्गी-सूत्राप्तिः, सोपाध्यायादृते कुतः ? ॥ ६ ॥

'णं'-कारोऽत्र दिशत्येवं, त्रिरेखोऽम्बरशेखरः ।
विनयश्रुतशीलाद्याः, महानन्दाय जाग्रति ॥ ७ ॥

सप्तरज्जूर्ध्वलोकाऽध्वो-द्योतदीपमहोज्ज्वला ।
सप्ताक्षरी चतुर्थी मे, ह्रियाद् व्यसनसप्तकम् ॥ ८ ॥

## पञ्चमः प्रकाशः ।

न व्याधिर्न च दौर्विध्यं, न वियोगः प्रियैः समम् ।
न दुर्भगत्वं नोद्वेगः, साधूपास्तिकृतां नृणाम् ॥ १ ॥

न चतुर्द्धा दुःखतमो, नराणामान्ध्यहेतवे ।
साधुध्यानाऽमृतरसा-ऽञ्जनलिप्तमनोदृशाम् ॥ २ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मोक्तारः सर्वसङ्गानां, मोष्या नाऽऽन्तरवैरिणाम् ।
मोदन्ते मुनयः कामं, मोक्षलक्ष्मीकटाक्षिताः ॥ ३ ॥

लोभद्रुमनदीवेगाः, लोकोत्तरचरित्रिणः ।
लोकोत्तमास्तृतीयास्ते, लोपं तन्वन्तु पाप्मनाम् ॥ ४ ॥

एकान्ते रमते स्वैरं, मृगेण मनसा समम् ।
मूलोत्तरगुणग्रामा-ऽऽरामेषु भगवान् मुनिः ॥ ५ ॥

एकत्वं यदिदं साधौ, संविग्ने श्रुतपारगे ।
तत्साक्षाद् दक्षिणावर्त्ते, शङ्खे सिद्धसरिज्जलम् ॥ ६ ॥

एको न क्रोधविधुरो, नैको मानं तनोति वा ।
एको न दम्भसंरम्भी, तृष्णा मुष्णाति नैककम् ॥ ७ ॥

एकत्वतत्त्वनिर्व्यूढ-सत्त्वा राजर्षिकुञ्जराः ।
ययुः प्रत्येकबुद्धाः श्री-नमिप्रभृतयः शिवम् ॥ ८ ॥

सर्वथा ज्ञाततत्त्वानां, सदा संविग्नचेतसाम् ।
सतामेकाकिता सम्यक्, समतामृतसारणिः ॥ ९ ॥

व्ववदैदंयुगीनौ तु, द्वौ द्वौ सङ्घाटकस्थितौ ।
स्वार्थसंसाधकौ स्यातां, व्रतिनौ वशिनौ यदि ॥ १० ॥

व्वसंज्ञयेत्यवतर्क्य-मैतिह्यं यद् द्वयोर्द्वयोः ।
वचोवक्षोवपुर्वृत्त्या, वशिनोर्व्रतिनोः शिवम् ॥ ११ ॥

निःशङ्कमैक्यं जनयोः, वशित्वादुभयोरपि ।
एकस्यापि सहस्रत्वं, दुरन्तमवशात्मनः ॥ १२ ॥

नेत्रवत्समसङ्कोच-विस्तारस्वप्नजागरौ ।
द्वौ दर्शनाय कल्पेते, नैकः सम्पूर्णकृत्यकृत् ॥ १३ ॥

एको विडम्बनापात्रं, एकः स्वार्थाय न क्षमः ।
एकस्य नहि विश्वासो, लोके लोकोत्तरेऽपि वा ॥ १४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावनाध्याननिर्णीत-तत्त्वलीनान्तरात्मनः ।
ऐक्यं न लक्षमध्येऽपि, निर्ममस्य विनश्यति ॥ १५ ॥

साम्यामृतोर्मितृप्तानां, सारासारविवेचिनाम् ।
साधूनां भावशुद्धानां, स्वार्थेऽपि क्वाऽथवा क्षतिः ? ॥ १६ ॥

मनःस्थैर्यान्निश्चलानां, वृक्षादिवदकर्मणाम् ।
वृन्दमृषीणामेकत्र, भावनावल्लिमण्डपः ॥ १७ ॥

मनसा कर्मणा वाचा, चित्रालिखितसैन्यवत् ।
मुनीनां निर्विकाराणां, बहुत्वेऽप्यरतिः कुतः ? ॥ १८ ॥

निर्जीवेष्विव चैतन्यं, साहसं कातरेष्विव ।
बहुष्वपि मुनीन्द्रेषु, कलहो न मनागपि ॥ १९ ॥

पञ्चषैरपि यो ग्लानिं, मुग्धधीर्गणयिष्यति ।
एकत्राऽनन्तसिद्धेभ्यः, स कथं स्पृहयिष्यति ? ॥ २० ॥

रागाद्यपायविषमे, सन्मार्गे चरतां सताम् ।
रत्नत्रयजुषामैक्यं, कुशलाय न जायते ॥ २१ ॥

नैकस्य सुकृतोल्लासो, नैकस्यार्थोऽपि तादृशः ।
नैकस्य कामसम्प्राप्तिः नैको मोक्षाय कल्पते ॥ २२ ॥

श्लेष्मणे शर्करादानं, सज्वरे स्निग्धभोजनम् ।
एकाकित्वमगीतार्थे, यतावञ्चति नौचितीम् ॥ २३ ॥

एकश्चौरायते प्रायः, शङ्क्यते धूर्तवद् द्वयम् ।
त्रयो रक्षन्ति विश्वासं, वृन्दं नरवरायते ॥ २४ ॥

जिनप्रत्येकबुद्धादि-दृष्यान्तान्नैकतां श्रयेत् ।
न चर्मचक्षुषां युक्तं, स्पर्द्धितुं ज्ञानदृष्टिभिः ॥ २५ ॥

चातुर्गतिकसंसारे, भ्राम्यतां सर्वजन्मिनाम् ।
पुण्यपापसहायत्वात्, नैकत्वं घटतेऽथवा ॥ २६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संज्ञाकुलेश्याविकथाः, चर्चिका इव चापलम्।
यस्याऽन्तर्धाम कुर्वन्ति, स एकाकी कथं भवेत्? ॥ २७ ॥

शाकिनीवदविरति-संज्ञा नाट्यप्रिया सदा।
ग्रासाय यतते यस्य, स एकाकी कथं भवेत्? ॥ २८ ॥

पञ्चाग्निवदसन्तुष्टं, यस्येन्द्रियकुटुम्बकम्।
देहं दहत्यसन्देहं, स एकाकी कथं भवेत्? ॥ २९ ॥

दायादा इव दुर्दान्ताः, कषायाः क्षणमप्यहो।
यद्विग्रहं न मुञ्चन्ति, कथं तस्यैकतासुखम्? ॥ ३० ॥

स्वमनोवाक्तनूत्थानाः, कुव्यापाराः कुपुत्रवत्।
भ्रंशाय यस्य यस्यन्ति, कथं तस्यैकतासुखम्? ॥ ३१ ॥

यस्य प्रमादमिथ्यात्व-रागाद्याश्छलवीक्षिणः।
कुप्रातिवेश्मिकायन्ते, कथं तस्यैकतासुखम्? ॥ ३२ ॥

य एभिरुज्झितः सम्यक्, सजनेऽपि स एककः।
जनाऽऽपूर्णेऽपि नगरे, यथा वैदेशिकः पुमान् ॥ ३३ ॥

एभिस्तु सहितो योगी, मुधैकाकित्वमश्नुते।
वण्ठः शठ्यश्चरश्चौरः, किमु भ्राम्यति नैककः? ॥ ३४ ॥

क्षीरं क्षीरं नीरं नीरं, दीपो दीपं सुधा सुधाम्।
यथा सङ्गत्य(यं) लभते, तथैकत्वं मुनिर्मुनिम् ॥ ३५ ॥

पुण्यपापक्षयान्मुक्ते, केवले परमात्मनि।
अनाहारतया नित्यं, सत्यमैक्यं प्रतिष्ठितम् ॥ ३६ ॥

यद्वा श्रुतेऽत्र नाऽनुज्ञा, निषेधो वाऽस्ति सर्वथा।
सम्यगायव्ययौ ज्ञात्वा, यतन्ते यतिसत्तमाः ॥ ३७ ॥

हूयते न दीयते न, न तप्यते न जप्यते।
निष्क्रियैः साधुभिरहो, साध्यते परमं पदम् ॥ ३८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हूहूगीतैरपि सुधा-रसैर्मन्दारसौरभैः ।
दिव्यतल्पसुखस्पर्शैः, सुरीरूपैर्न ये हृताः ॥ ३९ ॥

तत् किं ते तरवो यद्वा, शिशवो यदि वा मृगाः ।
न ते न ते न ते किन्तु, मुनयस्ते निरञ्जनाः ॥ ४० ॥

'णं' कारोऽयं भणत्येवं, त्रिरेखो बिन्दुशेखरः ।
गुप्तित्रये लब्धरेखाः, सद्वृत्ताः स्युर्महर्षयः ॥ ४१ ॥

नवभेदजीवरक्षा-सुधाकुण्डसमाकृतिः ।
दत्तां नवाक्षरीयं मे, धर्मे भावं नवं नवम् ॥ ४२ ॥

## षष्ठः प्रकाशः ।

एष पञ्चनमस्कारः, सर्वपापप्रणाशनः ।
मङ्गलानां च सर्वेषां, मुख्यं भवति मङ्गलम् ॥ १ ॥

समितिप्रयतः सम्यग्, गुप्तित्रयपवित्रितः ।
अमुं पञ्चनमस्कारं, यः स्मरत्युपवैणवम् ॥ २ ॥

शत्रुर्मित्रायते चित्रं, विषमप्यमृतायते ।
अशरण्याऽप्यरण्यानी, तस्य वासगृहायते ॥ ३ ॥

ग्रहाः सानुग्रहास्तस्य, तस्कराश्च यशस्कराः ।
समस्तं दुर्निमित्ताद्यं, अपि स्वस्तिफलेग्रहि ॥ ४ ॥

न मन्त्रतन्त्रयन्त्राद्याः, तं प्रति प्रभविष्णवः ।
सर्वापि शाकिनी द्रोह-जननी जननीव न ॥ ५ ॥

व्यालास्तस्य मृणालन्ति, गुञ्जापुञ्जन्ति वह्नयः ।
मृगेन्द्रा मृगधूर्तन्ति, मृगन्ति च मतङ्गजाः ॥ ६ ॥

तस्य रक्षोऽपि रक्षायै, भूतवर्गोऽपि भूतये ।
प्रेतोऽपि प्रीतये प्रायः, चेटत्वायैव चेटकः ॥ ७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धनाय तस्य प्रधनं, रोगो भोगाय जायते ।
विपत्तिरपि सम्पत्त्यै, सर्वं दुःखं सुखायते ॥ ८ ॥

बन्धनैर्मुच्यते सर्वैः, सर्पैश्चन्दनवज्जनः ।
श्रुत्वा धीरं ध्वनिं पञ्च-नमस्कारगरुत्मतः ॥ ९ ॥

जलस्थलश्मशानाद्रि-दुर्गेष्वन्येष्वपि ध्रुवम् ।
नमस्कारैकचित्तानां, अपायाः प्रोत्सवा इव ॥ १० ॥

पुण्यानुबन्धिपुण्यो यः, परमेष्ठिनमस्कृतिम् ।
यथाविधि ध्यायति सः, स्यान्न तिर्यग् न नारकः ॥ ११ ॥

चक्रिविष्णुप्रतिविष्णु-बलाद्यैश्वर्यसम्पदः ।
नमस्कारप्रभावाब्धेः, तटमुक्तादिसन्निभाः ॥ १२ ॥

वश्यविद्वेषणक्षोभ-स्तम्भमोहादिकर्मसु ।
यथाविधि प्रयुक्तोऽयं, मन्त्रः सिद्धिं प्रयच्छति ॥ १३ ॥

उच्छेदं परविद्यानां, निमेषार्द्धात् करोत्यसौ ।
क्षुद्रात्मनां परावृत्ति-वेधं च विधिना स्मृतः ॥ १४ ॥

भूर्भुवःस्वस्त्रयीरङ्गैः, यः कोप्यतिशयः किल ।
द्रव्यक्षेत्रकालभावा-ऽपेक्षया चित्रकारकः ॥ १५ ॥

क्वचित्कथञ्चित्कस्यापि, श्रूयते दृश्यतेऽङ्गिनः ।
स सर्वोऽपि नमस्काराऽऽराधमाहात्म्यसम्भवः ॥ १६ ॥

तिर्यग्लोके चन्द्रमुख्याः, पाताले चमरादयः ।
सौधर्मादिषु शक्राद्याः, तदग्रेऽपि च ये सुराः ॥ १७ ॥

तेषां सर्वाः श्रियः पञ्च-परमेष्ठिमरुत्तरोः ।
अङ्कुरा वा पल्लवा वा, कलिका वा सुमानि वा ॥ १८ ॥

ते गतास्ते गमिष्यन्ति, ते गच्छन्ति परम्पदम् ।
आरूढा निरपायं ये, नमस्कारमहारथम् ॥ १९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदि तावदसौ मन्त्रः, शिवं दत्ते सुदुर्लभम् ।
ततस्तदनुषङ्गोत्थे, गणना का फलान्तरे ? ॥ २० ॥

जपन्ति ये नमस्कार-लक्षं पूर्णं त्रिशुद्धितः ।
जिनसंघपूजिभिस्तैः, तीर्थकृत्कर्म बध्यते ॥ २१ ॥

किं तपःश्रुतचारित्रैः, चिरमाचरितैरपि ।
सखे ! यदि नमस्कारे, मनो लेलीयते न ते ? ॥ २२ ॥

योऽसंख्यदुःखक्षयकारणस्मृतिः, य ऐहिकामुष्मिकसौख्यकामधुक् ।
यो दुषमायामपि कल्पपादपो, मन्त्राधिराजः स कथं न जप्यते ?२३

न यद् दीपेन सूर्येण चन्द्रेणाप्यपरेण वा ।
तमस्तदपि निर्नाम, स्यान्नमस्कारतेजसा ॥ २४ ॥

कृष्णशाम्बादिवद् भाव-नमस्कारपरो भव ।
मा वीर-पालक-न्यायात्, मुधाऽऽत्मानं विडम्बय ॥ २५ ॥

यथा नक्षत्रमालायां, स्वामी पीयूषदीधितिः ।
तथा भावनमस्कारः, सर्वस्यां पुण्यसंहतौ ॥ २६ ॥

जीवेनाकृतकृत्यानि, विना भावनमस्कृतिम् ।
गृहीतानि विमुक्तानि, द्रव्यलिङ्गान्यनन्तशः ॥ २७ ॥

अष्यवष्टौ शतान्यष्ट, सहस्राण्यष्ट कोटयः ।
विधिध्याता नमस्काराः, सिद्धयेऽन्तर्भवत्रयम् ॥ २८ ॥

धर्मबान्धव ! निश्छद्म-पुनरुक्तं त्वमर्थ्यसे ।
संसारार्णवबोहित्थे, माऽत्र मन्त्रे श्लथो भव ॥ २९ ॥

अवश्यं यदसौ भाव-नमस्कारः परं महः ।
स्वर्गापवर्गसन्मार्गो, दुर्गतिप्रलयानिलः ॥ ३० ॥

शिवतातिः सदा सम्यक्, पठितो गुणितः श्रुतः ।
समनुप्रेक्षितो भव्यैः, विशिष्याराधनाक्षणे ॥ ३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रदीप्ते भवने यद्वत्, शेषं मुक्त्वा गृही सुधीः ।
गृह्णात्येकं महारत्नं, आपन्निस्तारणक्षमम् ॥ ३२ ॥

आकालिक-रणोत्पाते, यथा कोऽपि महाभटः ।
अमोघमस्त्रमादत्ते, सारं दम्भोलिदण्डवत् ॥ ३३ ॥

एवं नाशक्षणे सर्व-श्रुतस्कन्धस्य चिन्तने ।
प्रायेण न क्षमो जीवः, तस्मात्तद्गतमानसः ॥ ३४ ॥

द्वादशाङ्गोपनिषदं, परमेष्ठिनमस्कृतिम् ।
धीरधीः सल्लसल्लेश्यः, कोऽपि स्मरति सात्त्विकः ॥ ३५ ॥

समुद्रादिव पीयूषं, चन्दनं मलयादिव ।
नवनीतं यथा दध्नो, वज्रं वा रोहणादिव ॥ ३६ ॥

आगमादुद्धृतं सर्व-सारं कल्याणसेवधिम् ।
परमेष्ठिनमस्कारं, धन्याः केचिदुपासते ॥ ३७ ॥

संविग्नमानसाः स्पष्ट-गम्भीरमधुरस्वराः ।
योगमुद्राधरकराः, शुचयः कमलासनाः ॥ ३८ ॥

उच्चरेयुः स्वयं सम्यक्, पूर्णां पञ्चनमस्कृतिम् ।
उत्सर्गतो विधिरयं, ग्लान्याऽत्रैते न चेत्क्षमाः ॥ ३९ ॥

असिआउसेति मन्त्रं, तन्नामाद्याक्षराङ्कितम् ।
स्मरन्तो जन्तवोऽनन्ताः, मुच्यन्तेऽन्तकबन्धनात् ॥ ४० ॥

अर्हदरूपाऽऽचार्योपा-ध्यायमुन्यादिमाक्षरैः ।
सन्धिप्रयोगसंश्लिष्टैः, ॐकारं वा विदुर्जिनाः ॥ ४१ ॥

व्यक्ता मुक्तात्मनां मुक्तिः, मोहस्तम्बेरमाङ्कुशः
प्रणीतः प्रणवः प्राज्ञैः भवार्त्तिच्छेदकर्त्तरी ॥ ४२ ॥

ओमिति ध्यायतां तत्त्वं, स्वर्गार्गलककुञ्चिकाम् ।
जीविते मरणे वापि, भुक्तिर्मुक्तिर्महात्मनाम् ॥ ४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वथाप्यक्षमो दैवात्, यद्वाऽन्ते धर्मबान्धवात् ।
शृण्वन् मन्त्रममुं चित्ते, धर्मात्मा भावयेदिति ॥ ४४ ॥

अमृतैः किमहं सिक्तः, सर्वाङ्गं यदि वा कृतः ।
सर्वानन्दमयोऽकाण्डे, केनाऽप्यनघबन्धुना ॥ ४५ ॥

परं पुण्यं परं श्रेयः, परं मङ्गलकारणम् ।
यदिदानीं श्रावितोऽहं, पञ्चनाथनमस्कृतिम् ॥ ४६ ॥

अहो ! दुर्लभलाभो मे, ममाहो ! प्रियसङ्गमः ।
अहो ! तत्त्वप्रकाशो मे, सारमुष्टिरहो ! मम ॥ ४७ ॥

अद्य कष्टानि नष्टानि, दुरितं दूरतो ययौ ।
प्राप्तं पारं भवाम्भोधेः, श्रुत्वा पञ्चनमस्कृतिम् ॥ ४८ ॥

प्रशमो देवगुर्वाज्ञा-पालनं नियमस्तपः ।
अद्य मे सफलं जज्ञे, श्रुतपञ्चनमस्कृतेः ॥ ४९ ॥

स्वर्णस्येवाग्निसम्पातो, दिष्ट्या मे विपदप्यभूत् ।
यल्लेभेऽद्य मयाऽनर्घ्यं, परमेष्ठिमयं महः ॥ ५० ॥

एवं शमरसोल्लास-पूर्वं श्रुत्वा नमस्कृतिम् ।
निहत्य क्लिष्टकर्माणि, सुधीः श्रयति सद्गतिम् ॥ ५१ ॥

उत्पद्योत्तमदेवेषु, विपुलेषु कुलेष्वपि ।
अन्तर्भवाष्टकं सिद्धः, स्यान्नमस्कारभक्तिभाक् ॥ ५२ ॥

## सप्तमः प्रकाशः ।

सदा नामाकृतिद्रव्य-भावैस्त्रैलोक्यपावनाः ।
क्षेत्रे काले च सर्वत्र, शरणं मे जिनेश्वराः ॥ १ ॥

तेऽतीताः केवलज्ञानि-प्रमुखा ऋषभादयः ।
वर्त्तमाना भविष्यन्तः, पद्मनाभादयो जिनाः ॥ २ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सीमन्धराद्या अर्हन्तो, विहरन्तोऽथ शाश्वताः ।
चन्द्राननवारिषेण-वर्द्धमानर्षभाश्च ते ॥ ३ ॥

संख्यातास्ते वर्त्तमानाः, अनन्तारतीतभाविनः ।
सर्वेष्वपि विदेहेषु, भरतैरावतेषु च ॥ ४ ॥

ते केवलज्ञानविकाशभासुराः, निराकृताष्टादशदोषविप्लवाः ।
असंख्यवास्तोष्पतिवन्दितांह्रयः, सत्प्रातिहार्यातिशयैःसमाश्रिताः ॥ ५ ॥

जगत्त्रयीबोधिदपञ्चसंयुत-त्रिंशद्गुणालङ्कृतदेशनागिरः ।
अनुत्तरस्वर्गिगणैः सदा स्मृताः, अनन्यदेयाक्षरमार्गदायिनः ॥ ६ ॥

दुरितं दूरतो याति, साधिर्व्याधिः प्रणश्यति ।
दारिद्र्यमुद्रा विद्राति, सम्यग्दृष्टे जिनेश्वरे ॥ ७ ॥

निन्द्येन मांसखण्डेन, किं तया जिह्वया नृणाम् ।
माहात्म्यं या जिनेन्द्राणां, न स्तवीति क्षणे क्षणे ॥ ८ ॥

अर्हच्चरित्रमाधुर्य-सुधास्वादाऽनभिज्ञयोः ।
कर्णयोश्छिद्रयोर्वाऽपि, स्वल्पमप्यस्ति नान्तरम् ॥ ९ ॥

सर्वातिशयसम्पन्नां, ये जिनार्चां न पश्यतः ।
न ते विलोचने किन्तु, वदनालयजालके ॥ १० ॥

अनार्येऽपि वसन् देशे, श्रीमानाऽऽर्द्रकुमारकः ।
अर्हतः प्रतिमां दृष्ट्वा, जज्ञे संसारपारगः ॥ ११ ॥

जिनबिम्बेक्षणात् ज्ञात-तत्त्वः शय्यम्भवद्विजः ।
निषेव्य सुगुरोः पादान्, उत्तमार्थमसाधयत् ॥ १२ ॥

अहो ! सात्त्विकमूर्द्धन्यो, वज्रकर्णो गहीपतिः ।
सर्वनाशेऽपि योऽन्यस्मै, न ननाम जिनं विना ॥ १३ ॥

देवतत्त्वे गुरुतत्त्वे, धर्मतत्त्वे स्थिरात्मनः ।
वालिनो वानरेन्द्रस्य, महनीयमहो महः ॥ १४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुलसाया महासत्याः, भूयासमवतारणम् ।
सम्भावयति कल्याण-वार्त्तायां त्रिजगद्गुरुः ॥ १५ ॥

श्रीवीरं वन्दितुं भावात्, चलितौ दर्दुरावपि ।
मृत्वा सौधर्मकल्पान्त-र्जातौ शक्रसमौ सुरौ ॥ १६ ॥

हासाप्रहासापतिराभियोग्य-दुष्कर्मनिर्विण्णमनाः सुरोऽपि ।
देवाधिदेवप्रतिमां क्षमायां, प्राकाशयत्स्वात्मविमोचनाय ॥ १७ ॥

जिनांह्रिसेवाहृतपापतापः, त्रैलोक्यकुक्षिम्भरिसत्प्रतापः ।
श्रीचेटको नाम महाक्षमापः, सुरेन्द्रचित्तेष्वपि वासमाप ॥ १८ ॥

अष्टाहिकापर्व सुपर्वनाथाः, कुर्वन्ति सर्वे जिनमन्दिरेषु ।
नित्येषु नन्दीश्वरमुख्यतीर्था-ऽलङ्कारभूतेषु भवाभिभूत्यै ॥ १९ ॥

श्रूयते चरमाम्भोधौ, जिनबिम्बाकृतेस्तिमेः ।
नमस्कृतिपरो मीनो, जातस्मृतिर्दिवं ययौ ॥ २० ॥

नृसुरासुरसाम्राज्यं, भुज्यते यदशङ्कितम् ।
जिनपादप्रसादानां, लीलायितलवो हि सः ॥ २१ ॥

नृलोके चक्रवर्त्याद्याः, शक्राद्याः सुरसद्मनि ।
पाताले धरणेन्द्राद्याः, जयन्ति जिनभक्तितः ॥ २२ ॥

मुकुटीकृतजैनाज्ञाः, रुद्रा एकादशाप्यहो ! ।
केचित्तीर्णास्तरिष्यन्ति, परे संसारसागरम् ॥ २३ ॥

वह्निज्वाला इव जले, विषोर्मय इवामृते ।
जिनसाम्ये विलीयन्ते, हरादीनां कथाप्रथाः ॥ २४ ॥

तानि जैनेन्द्रवृत्तानि, सम्यग् विमृशतां सताम् ।
अत्राप्यानन्दमग्नानां, युक्तं मोक्षेऽपि न स्पृहा ॥ २५ ॥

यथा तोयेन शाम्यन्ति, तृषोऽन्नेन क्षुधो यथा ।
जिनदर्शनमात्रेण तथैकेन भवार्त्तयः ॥ २६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतिकोटिः समाः सम्यक्, समाधीन् समुपासताम् ।
नार्हदाज्ञां विना यान्ति, तथापि शमिनः शिवम् ॥ २७ ॥

न दानेनाऽनिदानेन, न शीलैः परिशीलितैः ।
न शस्याभिस्तपस्याभिः, अजैनानां परं पदम् ॥ २८ ॥

भास्वता वासर इव, पूर्णिमेवाऽमृतांशुना ।
सुभिक्षमिव मेघेन, जिनेनैवाऽव्ययं महः ॥ २९ ॥

अक्षायत्तं यथा द्यूतं, मेघाधीना यथा कृषिः ।
तथा शिवपुरे वासो, जिनध्यानवशंवदः ॥ ३० ॥

सुलभास्त्रिजगल्लक्ष्म्यः, सुलभाः सिद्धयोऽष्ट ताः ।
जिनांह्रिनीरजरजः-कणिकास्त्वतिदुर्लभाः ॥ ३१ ॥

अहो ! कष्टमहो । कष्टं, जिनं प्राप्यापि यज्जनाः ।
केचिन्मिथ्यादृशो बाढं, दिनेशमिव कौशिकाः ॥ ३२ ॥

जिन एव महादेवः, स्वयम्भूः पुरुषोत्तमः ।
परात्मा सुगतोऽलक्ष्यो, भूर्भुवःस्वस्त्रये(यी)श्वरः ॥ ३३ ॥

त्रैगुण्यगोचरा संज्ञा, बुद्धेशानादिषु स्थिता ।
या लोकोत्तरसत्त्वोत्था, सा सर्वाऽपि परं जिने ॥ ३४ ॥

रोहणाद्रेरिवादाय, जिनेन्द्रात्परमात्मनः ।
नानाऽभिधानरत्नानि, विदग्धैर्व्यवहारिभिः ॥ ३५ ॥

सुवर्णभूषणान्याऽऽशु, कृत्वा स्वस्वमतेष्वथ ।
तत्तद्देवेष्वाहितानि, कालात् तन्नामतामगुः ॥ ३६ ॥

अमृतानि यथाब्दस्य, तडागादिषु पाततः ।
तज्जन्मानि जनाः, प्राहुः, नागान्येवं तथार्हतः ॥ ३७ ॥

लोकाग्रमधिरूढस्य, निलीनानि हरादिषु ।
तेषां सत्कानि गीयन्ते, लोकैः प्रायो बहिर्मुखैः ॥ ३८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किञ्च तान्येव नामानि, विद्धि योगीन्द्रवल्लभम् ।
यानि लोकोत्तरं सत्त्वं, ख्यापयन्ति प्रमाणतः ॥ ३९ ॥

संज्ञा रजस्तमःसत्त्वा-भासोत्था अतिकोटयः ।
अनन्ते भववासेऽस्मिन्, मादृशामपि जज्ञिरे ॥ ४० ॥

अपि नाम सहस्रेण, मूढो हृष्टः स्वदैवते ।
बदरेणापि हि भवेत्, शृगालस्य महो महान् ॥ ४१ ॥

सिद्धानन्तगुणत्वेना-ऽनन्तनाम्नो जिनेशितुः ।
निर्गुणत्वादनाम्नो वा, नामसंख्यां करोतु कः ? ॥ ४२ ॥

रजस्तमोबहिःसत्त्वाऽतीतस्य परमेष्ठिनः ।
प्रभावेण तमःपङ्के, विश्वमेतन्न मज्जति ॥ ४३ ॥

मन्येऽत्र लोकनाथेन, लोकाग्रं गच्छतार्हता ।
मुक्तं पापाज्जगत्त्रातुं, पुण्य(ण्यं)वल्लभमप्यहो ! ॥ ४४ ॥

पापं नष्टं भवारण्ये, समितिप्रयतात् प्रभोः ।
तद्ध्वंसाय ततः पुण्यं, सर्वं सैन्यमिवान्वगात् ॥ ४५ ॥

पुण्यपापविनिर्मुक्तः, तेनासौ भगवान् जिनः ।
लोकाग्रं सौधमारूढो, रमते मुक्तिकान्तया ॥ ४६ ॥

जिनो दाता जिनो भोक्ता, जिनः सर्वमिदं जगत् ।
जिनो जयति सर्वत्र, यो जिनः सोऽहमेव च ॥ ४७ ॥

इति ध्यानरसावेशात्, तन्मयीभावमीयुषः ।
परत्रेह च निर्विघ्नं, वृणुते सकलाः श्रियः ॥ ४८ ॥

## अष्टमः प्रकाशः ।

अर्हतामपि मान्यानां, परिक्षीणाष्टकर्मणाम् ।
सन्तः पञ्चदशभिदां, सिद्धानां न स्मरन्ति के ? ॥ १ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निरञ्जनाश्चिदानन्द-रूपा रूपादिवर्जिताः ।
स्वभावप्राप्तलोकाग्राः, सिद्धानन्तचतुष्टयाः ॥ २ ॥

साद्यनन्तस्थितिजुषो, गुणैकत्रिंशताऽन्विताः ।
परमेशाः परात्मानः, सिद्धा मे शरणं सदा ॥ ३ ॥

शरणं मे गणधराः, षट्त्रिंशद्गुणभूषिताः ।
सर्वसूत्रोपदेष्टारो, वाचकाः शरणं मम ॥ ४ ॥

लीना दशविधे धर्मे, सदा सामायिके स्थिराः ।
रत्नत्रयधरा धीराः, शरणं मे सुसाधवः ॥ ५ ॥

भवस्थितिध्वंसकृतां, शम्भूनामिव नान्तरम् ।
सूरिवाचकसाधूनां, तत्त्वतो दृष्टमागमे ॥ ६ ॥

धर्मो मे केवलज्ञानि-प्रणीतः शरणं परम् ।
चराचरस्य जगतो, य आधारः प्रकीर्त्तितः ॥ ७ ॥

ज्ञानदर्शनचारित्र-त्रयीत्रिपथगोर्मिभिः ।
भुवनत्रयपावित्र्य-करो धर्मो हिमालयः ॥ ८ ॥

नानादृष्टान्तहेतूक्ति-विचारभरबन्धुरे ।
स्याद्वादतत्त्वे लीनोऽहं, भग्नैकान्तमतस्थितौ ॥ ९ ॥

नवतत्त्वसुधाकुण्ड-गर्भो गाम्भीर्यमन्दिरम् ।
अयं सर्वज्ञसिद्धान्तः, पातालं प्रतिभाति मे ॥ १० ॥

सर्वज्योतिष्मतां मान्यो, मध्यस्थपदमाश्रितः ।
रत्नाकरावृतोऽनन्ता-ऽऽलोकः श्रीमान् जिनागमः ॥ ११ ॥

स्थानं सुमनसामेकं स्थास्नुर्लोकद्वयोरपि ।
विनिद्रशाश्वतज्योतिः, भाति गौः परमेष्ठिनः ॥ १२ ॥

श्रीधर्मभूमीश्वरराजधानी, दुष्कर्म-पाथोज-वनी-हिमानी ।
सन्देहसन्दोहलताकृपाणी, श्रेयांसि पुष्णातु जिनेन्द्रवाणी ॥ १३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं नमस्कृतिध्यान-सिन्धुमग्नान्तरात्मनः ।
आममृत्कुम्भवत् सर्व-कर्मग्रन्थिर्विलीयते ॥ १४ ॥

श्रीह्रीधृतिकीर्त्तिबुद्धि-लक्ष्मीलीलाप्रकाशकः ।
जीयात् पञ्चनमस्कारः, स्वःसाम्राज्यशिवप्रदः ॥ १५ ॥

सिद्धसेनसरस्वत्या, सरस्वत्यापगातटे ।
श्रीसिद्धचक्रमाहात्म्यं, गीतं श्रीसिद्धपत्तने ॥ १६ ॥

## ॥ नवपदमाहात्म्यगर्भितप्रकरणम् ॥

अरिहाइ नवपयाइं, झाइत्ता हिययकमलमज्झम्मि ।
सिरिसिद्धचक्कमाहप्पमुत्तमं किंपि जंपेमि ॥ १ ॥

भो भो महाणुभावा, दुल्लहं लद्धुण माणुसं जम्मं ।
खित्तकुलाइपहाणं, गुरुसामग्गिं च पुण्णवसा ॥ २ ॥

पंचविहंपि पमायं, गुरुयावायं विवज्जिउं झत्ति ।
सद्धम्मकम्मविसये, समुज्जमो होइ कायव्वो ॥ ३ ॥

सो धम्मो चउभेओ, उवइट्ठो सयलजिणवरिंदेहिं ।
दाणं सीलं च तवो, भावो वि य तस्सिमे भेया ॥ ४ ॥

तत्थ वि भावेण विणा, दाणं न हु सिद्धिसाहणं होई ।
सीलं पि भाववियलं, विहलं चिय होइ लोगम्मि ॥ ५ ॥

भावं विणा तवो वि हु, भवोहवित्थारकारणं चेव ।
तम्हा नियभावुच्चिय, सुविसुद्धो होइ कायव्वो ॥ ६ ॥

भावो वि मणो विसओ, मणं च अइदुज्जयं निरालंबं ।
तो तस्स नियमणत्थं, कहियं सालंबणं झाणं ॥ ७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आलंबणाणि जइवि हु, बहुप्पयाराणि संति सत्थेसु ।
तह वि हु नवपयझाणं, सुपहाणं बिंति जगगुरुणो ॥ ८ ॥

अरिहं सिद्धायरिया, उवज्झाया साहुणो य सम्मत्तं ।
नाणं चरणं च तवो, इय पयनवगं मुणेयव्वं ॥ ९ ॥

तत्थरिहंतेऽट्ठारस दोसविमुक्के विसुद्धनाणमए ।
पयडियतत्ते नयसुरराए झाएह निच्चं पि ॥ १० ॥

पनरसभेयपसिद्धे, सिद्धे घणकम्मबंधणविमुक्के ।
सिद्धाणंतचउक्के, झायह तम्मयमणा सययं ॥ ११ ॥

पंचायारपवित्ते, विसुद्धसिद्धंतदेसणुज्जुत्ते, ।
परउवयारिक्कपरे, निच्चं झाएह सूरिवरे ॥ १२ ॥

गणतित्तीसु निउत्ते, सुत्तत्थज्झावणम्मि उज्जुत्ते ।
सज्झाए लीणमणे, सम्मं झाएह उज्झाए ॥ १३ ॥

सव्वासु कम्मभूमिसु, विहरंते गुणगणेहिं संजुत्ते ।
गुत्ते मुत्ते झायह, मुणिराए निट्ठियकसाए ॥ १४ ॥

सव्वण्णुपणीयागम, पयडियतत्तत्थसद्दहणरुवं ।
दंसणरयणपईवं, निच्चं धारेह मणभवणे ॥ १५ ॥

जीवाजीवाइपयत्थ,-सत्थतत्तावबोहरुवं च ।
नाणं सव्वगुणाणं, मूलं सिक्खेह विणएणं ॥ १६ ॥

असुहकिरियाण चाओ, सुहासु किरियासु जो य अपमाओ ।
तं चारित्तं उत्तमगुण-जुत्तं पालह निरुत्तं ॥ १७ ॥

घणकम्मतमोभरहरण,-भाणुभूयं दुवालसंगधरं ।
नवरमकसायतावं, चरेह सम्मं तवोकम्मं ॥ १८ ॥

एयाइं नवपयाइं, जिणवरधम्मम्मि सारभूयाइं ।
कल्लाणकारणाइं, विहिणा आराहियव्वाइं ॥ १९ ॥



For Private And Personal Use Only

एएहिं नवपएहिं, सिद्धं सिरिसिद्धचक्कमाउत्तो ।
आराहंतो संतो, सिरिसिरिपालुव्व लहइ सुहं ॥ २० ॥

सेसतिभवेहिं मणुएहिं, विहियारिहाइठाणेहिं ।
अज्जिज्जइ जिणगुत्तं, ते अरिहंते पणिवयामि ॥ २१ ॥

जे एगभवंतरिया, रायकुले उत्तमे अवयरंति ।
महसुमिणसूइयगुणा, ते अरिहंते पणिवयामि ॥ २२ ॥

जेसिं जम्मम्मि महिमं, दिसाकुमारीओ सुरवरिंदा य ।
कुव्वंति पहिट्ठमणा, ते अरिहंते पणिवयामि ॥ २३ ॥

आजम्मं पि हु जेसिं, देहे चत्तारि अइसया हुंति ।
लोगच्छेरयभूया, ते अरिहंते पणिवयामि ॥ २४ ॥

जे तिहुनाणसमग्गा, खीणं नाऊण भोगफलकम्मं ।
पडिवज्जंति चरित्तं, ते अरिहंते पणिवयामि ॥ २५ ॥

उवउत्ता अपमत्ता, सियझाणा खवगसेणिहयमोहा ।
पावंति केवलं जे, ते अरिहंते पणिवयामि ॥ २६ ॥

कम्मक्खयया तह सुर-कया य जेसिं च अइसया हुंति ।
एगारसगुणवीसं, ते अरिहंते पणिवयामि ॥ २७ ॥

जे अट्ठपाडिहारेहिं, सोहिया सेविया सुरिंदेहिं,
विहरंति सया कालं, ते अरिहंते पणिवयामि ॥ २८ ॥

पणतीसगुणगिराए, जे य विबोहं कुणंति भव्वाणं ।
महिपीढे विहरंता, ते अरिहंते पणिवयामि ॥ २९ ॥

अरिहंता वा सामण्णकेवली अकयकयसमुग्घाया ।
सेलेसिकरणेणं, होऊणगजोगी केवलिणो ॥ ३० ॥

जे दुचरमम्मि समये, दुसयरिपयडिओ तेरस य चरमे ।
खविऊण सिवं पत्ता, ते सिद्धा दिंतु मे सिद्धिं ॥ ३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चरमंगतिभागोणा,-वगाहणा जे य एगसमयम्मि ।
संपत्ता लोगग्गं, ते सिद्धा दिंतु मे सिद्धिं ॥ ३२ ॥

पुव्वपओग असंगा, बंधणछेया सहावओ वावि ।
जेसिं उड्ढा हु गई, ते सिद्धा दिंतु मे सिद्धिं ॥ ३३ ॥

ईसीपब्भाराए, उवरिं खलु जोयणम्मि लोगंते ।
जेसिं ठिई पसिद्धा ते सिद्धा दिंतु मे सिद्धिं ॥ ३४ ॥

जे य अणंता अपुण-ब्भवा य असरीरया अणाबाहा ।
दंसणनाणुवउत्ता, ते सिद्धा दिंतु मे सिद्धिं ॥ ३५ ॥

जेऽणंतगुणा विगुणा, इगतीसगुणा य अहव अट्ठगुणा
सिद्धाणंतचउक्का, ते सिद्धा दिंतु मे सिद्धिं ॥ ३६ ॥

जह नगरगुणे मिच्छो, जाणंतो वि हु कहेउमसमत्थो ।
तह जेसिं गुणे नाणी, ते सिद्धा दिंतु मे सिद्धिं ॥ ३७ ॥

जे य अणंतमणुत्तर-मणोवमं सासयं सयाणंदं ।
सिद्धिसुहं संपत्ता, ते सिद्धा दिंतु मे सिद्धिं ॥ ३८ ॥

जे पंचविहायारं, आयरमाणा सया पयासंति ।
लोयाणणुग्गहत्थं, ते आयरिये नमंसामि ॥ ३९ ॥

देसकुलजाइरुवाइ-एहिं बहुगुणगणेहिं संजुत्ता,
जे हुंति जुगे पवरा, ते आयरिये नमंसामि ॥ ४० ॥

जे निच्चमप्पमत्ता, विगहविरत्ता कसायपरिचत्ता ।
धम्मोवएससत्ता, ते आयरिये नमंसामि ॥ ४१ ॥

जे सारणवारणचोयणाहिं, पडिच्चोयणाहिं निच्चं पि ।
सारंति-नियं गच्छं, ते आयरिये नमंसामि ॥ ४२ ॥

जे मुणियसुत्तसारा, परोवयारिक्कतप्परा दिंति ।
तत्तोवएसदाणं, ते आयरिये नमंसामि ॥ ४३ ॥



For Private And Personal Use Only

अत्थमिए जिणसूरे, केवलिचंदेवि जे पईवुव्व ।
पयडंति इह पयत्थे, ते आयरिये नमंसामि ॥ ४४ ॥

जे पावभरक्कंते, निवडंते भवमहंधकूवम्मि ।
नित्थारयंति जीवे, ते आयरिये नमंसामि ॥ ४५ ॥

जे मायतायबंधव,-पमुहेहिंतो वि इत्थ जीवाणं ।
साहंति हियं कज्जं, ते आयरिये नमंसामि ॥ ४६ ॥

जे बहुलद्धिसमिद्धा, साइसया सासणं पभावंति ।
रायसमा निच्चिंता, ते आयरिये नमंसामि ॥ ४७ ॥

जे बारसंगसज्झाय-पारगा धारगा तयत्थाणं ।
तदुभयवित्थाररया, ते हं झाएमि उज्झाए ॥ ४८ ॥

पाहाणसमाणे वि हु, कुणंति जे सुत्तधारया सीसे ।
सयलजणपूयणिज्जे, ते हं झाएमि उज्झाए ॥ ४९ ॥

मोहाहिदट्ठनट्ठप्पनाण-जीवाण चेयणं दिंति ।
जे के वि नरिंदा इव, ते हं झाएमि उज्झाए ॥ ५० ॥

अण्णाणवाहिविहुराण पाणिणं सुयरसायणं सारं ।
जे दिंति महाविज्जा, ते हं झाएमि उज्झाए ॥ ५१ ॥

गुणवणभंजणमयगय,-दमणंकुससरिसनाणदाणं जे ।
दिंति सया भवियाणं, ते हं झाएमि उज्झाए ॥ ५२ ॥

दिणमासजीवियंताइं, सेसदाणाइं मुणिय जे नाणं ।
मुत्तिं दिंति सया, ते हं झाएमि उज्झाए ॥ ५३ ॥

अण्णाणंधे लोयाण, लोयणे जे पसत्थसत्थमुहा ।
उग्घाडयंति सम्मं, ते हं झाएमि उज्झाए ॥ ५४ ॥

बावन्नवण्णचंदण-रसेण जे लोयपावतावाइं ।
उवसामयंति सहसा, ते हं झाएमि उज्झाए ॥ ५५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जे रायकुमरतुल्ला, गणतत्तिपरा य सूरिपयजुग्गा ।
वायंति सीसवग्गं, ते हं झाएमि उज्झाए ॥ ५६ ॥

जे दंसणनाणचरित्त,-रूवरयणत्तएण इक्केण ।
साहंति मुक्खमग्गं ते सव्वे साहुणो वंदे ॥ ५७ ॥

गयदुविहदुट्ठझाणा, जे झाइअधम्मसुक्कझाणा य ।
सिक्खंति दुविहसिक्खं, ते सव्वे साहुणो वंदे ॥ ५८ ॥

गुत्तित्तएण गुत्ता, तिसल्लरहिया तिगारवविमुक्का ।
जे पालयंति तिपइं, ते सव्वे साहुणो वंदे ॥ ५९ ॥

चउविहविगहविरत्ता, जे चउविहचउकसायपरिचत्ता ।
चउहा दिसंति धम्मं, ते सव्वे साहुणो वंदे ॥ ६० ॥

उज्झियपंचपमाया, निज्जियपंचिंदिया य पालंति ।
पंचेव य समिईओ, ते सव्वे साहुणो वंदे ॥ ६१ ॥

छज्जीवकायरक्खण,-निउणा हासाइ छक्कमुक्का जे ।
धारंति य वयछक्कं, ते सव्वे साहुणो वंदे ॥ ६२ ॥

जे जिय सत्तभया, गयअट्ठमया नव वि बंभगुत्तिओ ।
पालंति अप्पमत्ता, ते सव्वे साहुणो वंदे ॥ ६३ ॥

दसविहधम्मं तह, बारसेव पडिमाओ जे अ कुव्वंति ।
बारसविहं तवो वि अ, ते सव्वे साहुणो वंदे ॥ ६४ ॥

जे सत्तरसंजमंगा, उव्वूढाट्ठारसहससीलंगा ।
विहरंति कम्मभूमिसु, ते सव्वे साहुणो वंदे ॥ ६५ ॥

जं सुद्धदेवगुरु-धम्मतत्तसंपत्तिसद्दहणरूवं ।
वण्णिज्जइ सम्मत्तं, तं सम्मं दंसणं नमिमो ॥ ६६ ॥

जावेगकोडाकोडि-सागरसेसा न होइ कम्मठिई ।
ताव न जं पाविज्जइ, तं सम्मं दंसणं नमिमो ॥ ६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भव्वाण मद्धपुग्गल-परियट्टवसेसभवनिवासाणं ।
जं होइ गंठिभेए, तं सम्मं दंसणं नमिमो ॥ ६८ ॥

जं च तिहा उवसमिअं, खओवसमिअं च खाइयं चेव ।
भणिअं जिणिंदसमए, तं सम्मं दंसणं नमिमो ॥ ६९ ॥

पण वारा उवसमियं, खओवसमिअं असंखसो होइ ।
जं खाइअं च इक्कसि, तं सम्मं दंसणं नमिमो ॥ ७० ॥

जं धम्मद्दुममूलं, भाविज्जइ धम्मपुरप्पवेसं च ।
धम्मभवणपीढं वा, तं सम्मं दंसणं नमिमो ॥ ७१ ॥

जं धम्मजयाहारं, उवसमरसभायणं च जं बिंति ।
मुणिणो गुणरयणनिहिं, तं सम्मं दंसणं नमिमो ॥ ७२ ॥

जेण विणा नाणं वि हु, अपमाणं निप्फलं च चारित्तं ।
मुक्खो वि नेव लब्भइ, तं सम्मं दंसण नमिमो ॥ ७३ ॥

जं सद्दहाणलक्खण-भूसण-पमुहेहिं बहु अ भेएहिं ।
वण्णिज्जइ समयम्मी, तं सम्मं दंसणं नमिमो ॥ ७४ ॥

सवण्णुपणीयागम, भणियाण जहट्ठियाण तत्ताणं ।
जो सुद्धो अवबोहो, तं सण्णाणं मह पमाणं ॥ ७५ ॥

जेणं भक्खाभक्खं, पिज्जापिज्जं अगम्ममवि गम्मं ।
किच्चाकिच्चं नज्जइ, तं सण्णाणं मह पमाणं ॥ ७६ ॥

सयलकिरियाण मूलं, सद्धा लोयम्मि तीइ सद्धाए ।
जं किर हवेइ मूलं, तं सण्णाणं मह पमाणं ॥ ७७ ॥

जं मइ-सुय-ओहि-मयं, मणपज्जव-रूवं केवलमयं च ।
पंचविहं सुपसिद्धं, तं सण्णाणं मह पमाणं ॥ ७८ ॥

केवलमणोहिणं पि हु, वयणं लोयाण कुणइ उवयारं ।
जं सुयमइरूवेणं, तं सण्णाणं मह पमाणं ॥ ७९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुयनाणं चेव दुवालसंगरूवं परूवियं जत्थ ।
लोयाणुवयारकरं, तं सण्णाणं मह पमाणं ॥ ८० ॥

तत्तुच्चिय जं भव्वा, पढंति पाढंति दिंति निसुणंति ।
पूयंति लिहावंति य, तं सण्णाणं मह पमाणं ॥ ८१ ॥

जस्स बलेण अज्ज वि, नज्जइ तियलोयगोयरवियारो ।
करगहियामलयं पिव, तं सण्णाणं मह पमाणं ॥ ८२ ॥

जस्स पसाएण जणा, हवंति लोयम्मि पुच्छणिज्जा य ।
पुज्जा य वण्णणिज्जा, तं सण्णाणं मह पमाणं ॥ ८३ ॥

जं देसविरइरूवं, सव्वविरइरूवयं च अणुक्कमसो ।
होइ गिहीण जईण, तं चारित्तं जए जयइ ॥ ८४ ॥

नाणंपि दंसणंपि य, संपुण्णफलं फलंति जीवाणं ।
जेण चिय परियरिया, तं चारित्तं जए जयइ ॥ ८५ ॥

जं च जईण जहुत्तर-फलं सुसामाइयाइ पंचविहं ।
सुपसिद्धं जिणसमए, तं चारित्तं जए जयइ ॥ ८६ ॥

जं पडिवण्णं परि-पालियं च सम्मं परूवियं दिण्णं ।
अण्णेसिं च जिणेहिवि, तं चारित्तं जए जयइ ॥ ८७ ॥

छक्खंडाणमखंडं, रज्जसिरिं चइय चक्कवट्टीहिं ।
जं सम्मं पडिवण्णं, तं चारित्तं जए जयइ ॥ ८८ ॥

जं पडिवण्णा दमगाइणो वि जीवा हवंति तियलोए ।
सयलजणपूयणिज्जे, तं चारित्तं जए जयइ ॥ ८९ ॥

जं पालंताण मुणीसराण, पाए नमंति साणंदा ।
देविंददाणविंदा, तं चारित्तं जए जयइ ॥ ९० ॥

जं चाणंतगुणं पि हु, वण्णिज्जइ सतरभेअदसभेअं ।
समयम्मि मुणिवरेहिं, तं चारित्तं जए जयइ ॥ ९१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समिईओ गुत्तिओ, खंतिपमुहाओ मित्तियाईओ ।
साहंति जस्स सिद्धि, तं चारित्तं जए जयइ ॥ ९२ ॥

बाहिरमब्भिंतरयं, बारसभेयं जहुत्तरगुणं जं ।
वण्णिज्जइ जिणसमये, तं तवपयमेस वंदामि ॥ ९३ ॥

तब्भवसिद्धिं जाणं-तएहिं सिरिरिसहनाहपमुहेहिं ।
तित्थयरेहि कयं जं, तं तवपयमेस वंदामि ॥ ९४ ॥

जेण खमासहिएणं, कएण कम्माणमवि निकायाणं ।
जायइ खओ खणेणं, तं तवपयमेस वंदामि ॥ ९५ ॥

जेणं चिय जलणेण व, जीवसुवण्णाओ कम्मकिट्टाइं ।
फिट्टंति तक्खणं चिय, तं तवपयमेस वंदामि ॥ ९६ ॥

आसंसाइ विरहिए, जम्मि कए कम्मनिज्जरड्डाए ।
हुंति महासिद्धिओ, तं तवपयमेस वंदामि ॥ ९७ ॥

जस्स पसाएण धुवं, हवंति नाणाविहाओ लद्धीओ ।
आमोसहिपमुहाओ, तं तवपयमेस वंदामि ॥ ९८ ॥

कप्पतरुस्स व जस्सेरिसाओ, सुरनरवराण रिद्धीओ ।
कुसुमाइं फलं च सिवं, तं तवपयमेस वंदामि ॥ ९९ ॥

अच्चंतमसज्झाइं, लिलाइ वि सव्वलोअकज्जाइं ।
सिज्झंति झत्ति जेणं, तं तवपयमेस वंदामि ॥ १०० ॥

दहिदुव्वयाइमंगल-पयत्थसत्थम्मि मंगलं पढमं ।
जं वण्णिज्जइ लोए, तं तवपयमेस वंदामि ॥ १०१ ॥

तं च इमेसि पयाणं, कित्तियमित्तं इमं तए नायं ।
जं सव्वाण सुहाणं, मूलं आराहणमिमेसिं ॥ १०२ ॥

एयाराहणमूलं, च पाणीणं केवलो सुहो भावो ।
सो होइ धुवं जीवाण, निम्मलप्पाणं नण्णेसिं ॥ १०३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जे वि य संकप्पवियप्प-वज्जिया हुंति निम्मलप्पाणो ।
ते चेव नवपयाइं, नवसु पयेसु च ते चेव ॥ १०४ ॥

जं झाया झायंतो, अरिहंतं रूवसुपयपिंडत्थं ।
अरिहंतपयमयं चिय, अप्पं पिक्खेइ पच्चक्खं ॥ १०५ ॥

रूवाईय सहावो, केवलसण्णाणदंसणाणंदो ।
जो चेव य परमप्पा, सो सिद्धप्पा न संदेहो ॥ १०६ ॥

पंचप्पत्थाणमयायरिय-महामंत-झाणलीणमणो ।
पंचविहायारमओ, आयच्चिय होइ आयरियो ॥ १०७ ॥

महपाणझायदुवाल-संग-सुत्तत्थ-तदुभयरहस्सो ।
सज्झायतप्परप्पा, एसप्पा चेव उज्झाओ ॥ १०८ ॥

रयणत्तएण सिवपह-संसाहणसावहाणजोगतिगो ।
साहु हवइ एसो, अप्पुच्चिय निच्चमप्पमत्तो ॥ १०९ ॥

मोहस्स खओवसमा, समसंवेगाइलक्खणं परमं ।
सुहपरिणाममयं नियमप्पाणं दंसणं मुणह ॥ ११० ॥

नाणावरणस्स खओ-वसमेण जहट्ठियाण तत्ताणं ।
सुद्धावबोहरूवो, अप्पुच्चिय वुच्चए नाणं ॥ १११ ॥

सोलसकसायनवनो-कसायरहियं विसुद्धलेसागं ।
ससहावठियमप्पाण-मेव जाणेह चारित्तं ॥ ११२ ॥

इच्छानिरोहओ सुद्ध-संवरो परिणओ अ समयाए ।
कम्माइ निज्झरंतो, तवोमओ चेव एसप्पा ॥ ११३ ॥

एवं च ठिए अप्पाण-मेव नवपयमयं वियाणित्ता ।
अप्पम्मि चेव निच्चं, लीणमणा होह भो भविया ! ॥ ११४ ॥

जियंतरंगारिगणे सुनाणे, सुप्पाडिहेराइसयप्पहाणे ।
संदेहसंदोहरयं हरंते, झाएह निच्चं पि जिणारिहंते ॥ ११५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुट्ठट्ठकम्मावरणप्पमुक्के, अणंतनाणाइसिरिचउक्के ।
समग्गलोगग्गपयप्पसिद्धे, झाएह निच्चं पि समग्ग सिद्धे ॥ ११६ ॥

न तं सुहं देइ पिया न माया, जं दिंति जीवाणिह सूरिपाया ।
तम्हा ते चेव सया महेह, जं मुक्खसुक्खाइं लहुं लहेह ॥ ११७ ॥

सुत्तत्थसंवेगमयं सुएणं, संनीरखीरामयविस्सुएणं ।
पिणंति जे ते उवझायराए, झाएह निच्चं पि कयप्पसाए ॥ ११८ ॥

खंते य दंते य सुगुत्तिगुत्ते, मुत्ते पसंते गुणजोगजुत्ते ।
गयप्पमाए हयमोहमाए, झाएह निच्चं मुणिरायपाए ॥ ११९ ॥

जं दव्वछक्काइसु सद्दहाणं, तं दंसणं सव्वगुणप्पहाणं ।
कुग्गाहवाही उवयंति जेणं, जहा विसुद्धेण रसायणेणं ॥ १२० ॥

नाणं पहाणं नयचक्कसिद्धं, तत्तावबोहिक्कमयं पसिद्धं ।
धरेह चित्तावसहे फुरंतं, माणिक्कदीवुव्व तमोहरं तं ॥ १२१ ॥

सुसंवरं मोहनिरोहसारं, पंचप्पयारं विगयाइयारं ।
मूलोत्तराणेगगुणं पवित्तं, पालेह निच्चं पि हु सच्चरित्तं ॥ १२२ ॥

बज्झं तहा ब्भिंतरभेयभेयं, कषायदुब्भेय-कुकम्मभेयं ।
दुक्खक्खयत्थं कयपावनासं, तवं तवेहागमियं निरासं ॥ १२३ ॥

एयाइं जे केवि नवपयाइं, आराहयंतिट्ठफलप्पयाइं ।
लहंति ते सुक्खपरंपराणं, सिरिसिरिपालनरेसरुव्व ॥ १२४ ॥

उप्पण्ण-सण्णाण-महोमयाणं, सप्पाडिहेरासण-संठिआणं ॥ १ ॥
सद्देसणाणंदिअसज्जणाणं, नमो नमो होउ सया जिणाणं ॥ २ ॥
सिद्धाणमाणंदरमालयाणं, नमो नमोणंतचउक्कयाणं; ॥ ३ ॥
सूरीण दूरीकयकुग्गहाणं, नमो नमो सूरसमप्पहाणं; ॥ ४ ॥
सुत्तत्थवित्थारणतप्पराणं, नमो नमो वायगकुंजराणं; ॥ ५ ॥
साहूण संसाहिअसंजमाणं, नमो नमो सुद्धदयादमाणं; ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिणुत्ततत्ते रुइलक्खणस्स, नमो नमो निम्मलदंसणस्स; ॥ ७ ॥
अण्णाणसंमोहतमोहरस्स, नमो नमो नाणदिवायरस्स; ॥ ८ ॥
आराहिअखंडियसक्कियस्स, नमो नमो संजमवीरिअस्स; ॥ ९ ॥
कम्मद्दुमोम्मूलणकुंजरस्स, नमो नमो तिव्वतवोभरस्स ॥ १० ॥

इय नवपयसिद्धं, लद्धि-विज्जा-समिद्धं,
पयडिअ-सरवग्गं ह्रीँ तिरेहा समग्गं,
दिसिवइ-सुरसारं खोणिपीढावयारं,
तिजय-विजय-चक्कं-सिद्धचक्कं नमामि ॥ ११ ॥

## ॥ योगसार ॥

प्रणम्य परमात्मानं रागद्वेषविवर्जितम् ।
योगसारं प्रवक्ष्यामि गम्भीरार्थं समासतः ॥ १ ॥

यदा ध्यायति यद् योगी याति तन्मयतां तदा ।
ध्यातव्यो वीतरागस्तद् नित्यमात्मविशुद्धये ॥ २ ॥

शुद्धस्फटिकसंकाशो निष्कलश्चात्मनाऽऽत्मनि ।
परमात्मेति स ज्ञातः प्रदत्ते परमं पदम् ॥ ३ ॥

किन्तु न ज्ञायते तावद् यावद् मालिन्यमात्मनः ।
जाते साम्येन नैर्मल्ये स स्फुटः प्रतिभासते ॥ ४ ॥

तत्त्वनन्तानुबन्ध्यादिकषायविगमक्रमात् ।
आत्मनः शुद्धिकृत् साम्यं शुद्धं शुद्धतरं भवेत् ॥ ५ ॥

साम्यशुद्धिक्रमेणैव स विशुद्धयत आत्मनः ।
सम्यक्त्वादिगुणेषु स्यात् स्फुटः स्फुटतरः प्रभुः ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वमोहक्षयात् साम्ये सर्वशुद्धे सयोगिनिः ।
सर्वशुद्धात्मनस्त्वेष प्रभुः सर्वस्फुटीभवेत् ॥ ७ ॥

कषाया अपसर्पन्ति यावत् क्षान्त्यादिताडिताः ।
तावदात्मैव शुद्धोऽयं भजते परमात्मताम् ॥ ८ ॥

अपसर्पन्ति ते यावत् प्रबलीभूय देहिषु ।
स तावन्मलिनीभूतो जहाति परमात्मताम् ॥ ९ ॥

कषायास्तन्निहन्तव्यास्तथा तत्सहचारिणः ।
नोकषायाः शिवद्वारार्गलीभूता मुमुक्षुभिः ॥ १० ॥

हन्तव्यः क्षमया क्रोधो मानो मार्दवयोगतः ।
माया चार्जवभावेन लोभः संतोषपोषतः ॥ ११ ॥

हर्षः शोको जुगुप्सा च भयं रत्यरती तथा ।
वेदत्रयं च हन्तव्यं तत्त्वज्ञैर्दृढधैर्यतः ॥ १२ ॥

रागद्वेषमयेष्वेषु हतेष्वान्तरवैरिषु ।
साम्ये सुनिश्चले यायादात्मैव परमात्मताम् ॥ १३ ॥

स तावद् देहिनां भिन्नः सम्यग्यावन्न लक्ष्यते ।
लक्षितस्तु भजत्यैक्यं रागाद्यञ्जनमार्जनात् ॥ १४ ॥

यादृशोऽनन्तवीर्यादिगुणोऽतिविमलः प्रभुः ।
तादृशास्तेऽपि जायन्ते कर्ममालिन्यशोधनात् ॥ १५ ॥

आत्मानो देहिनो भिन्नाः कर्मपङ्ककलङ्किताः ।
अदेहः कर्मनिर्मुक्तः परमात्मा न भिद्यते ॥ १६ ॥

संख्ययाऽनेकरूपोऽपि गुणतस्त्वेक एव सः ।
अनन्तदर्शनज्ञानवीर्यानन्दगुणात्मकः ॥ १७ ॥

जातरूपं यथा जात्यं बहुरूपमपि स्थितम् ।
सर्वत्रापि तदेवैकं परमात्मा तथा प्रभुः ॥ १८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आकाशवदरूपोऽसौ चिद्रूपो नीरुजः शिवः ।
सिद्धिक्षेत्रगतोऽनन्तो नित्यः शं परमश्नुते ॥ १९ ॥

येनैवाराधितो भावात् तस्यासौ कुरुते शिवम् ।
सर्वजन्तुसमस्यास्य न परात्मविभागिता ॥ २० ॥

कृतकृत्योऽयमाराध्यः स्यादाज्ञापालनात् पुनः ।
आज्ञा तु निर्मलं चित्तं कर्त्तव्यं स्फटिकोपमम् ॥ २१ ॥

ज्ञानदर्शनशीलानि पोषणीयानि सर्वदा ।
रागद्वेषादयो दोषा हन्तव्याश्च क्षणे क्षणे ॥ २२ ॥

एतावत्येव तस्याज्ञा कर्मद्रुमकुठारिका ।
समस्तद्वादशाङ्गार्थसारभूताऽतिदुर्लभा ॥ २३ ॥

विश्वस्य वत्सलेनापि त्रैलोक्यप्रभुणाऽपि च ।
साक्षाद् विहरमाणेन श्रीवीरेण तदा किल ॥ २४ ॥

त एव रक्षिता दुःखभैरवाद् भवसागरात् ।
इयं यैः स्वीकृता भक्तिनिर्भरैरभयादिभिः ॥ २५ ॥

यैस्तु पापभराक्रान्तैः कालशौकरिकादिभिः ।
न स्वीकृता भवाम्भोधौ ते भ्रमिष्यन्ति दुःखिताः ॥ २६ ॥

सर्वजन्तुहिताऽऽज्ञैवाज्ञैव मोक्षैकपद्धतिः ।
चरिताऽऽज्ञैव चारित्रमाज्ञैव भवभञ्जनी ॥ २७ ॥

इयं तु ध्यानयोगेन भावसारस्तुतिस्तवैः ।
पूजादिभिः सुचारित्रचर्यया पालिता भवेत् ॥ २८ ॥

आराधितोऽस्त्वसौ भावस्तवेन व्रतचर्यया ।
तस्य पूजादिना द्रव्यस्तवेन तु सरागता ॥ २९ ॥

चिन्तामण्यादिकल्पस्य स्वयं तस्य प्रभावतः ।
कृतो द्रव्यस्तवोऽपि स्यात् कल्याणाय तदर्थिनाम् ॥ ३० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वर्गापवर्गदो द्रव्यस्तवोऽत्रापि सुखावहः ।
हेतुश्चित्तप्रसत्तेस्तत् कर्तव्यो गृहिणा सदा ॥ ३१ ॥

भवेद् विरतिरप्यस्य यथाशक्ति पुनर्यदि ।
ततः प्रक्षरितः सिंहः कर्मनिर्मथनं प्रति ॥ ३२ ॥

श्रावको बहुकर्माऽपि पूजाद्यैः शुभभावतः ।
दलयित्वाऽखिलं कर्म शिवमाप्नोति सत्वरम् ॥ ३३ ॥

येनाज्ञा यावदाराद्धा स तावल्लभते सुखम् ।
यावद् विराधिता येन तावद् दुःखं लभेत सः ॥ ३४ ॥

सदा तत्पालने लीनैः परमात्मात्मनात्मनि ।
सम्यक् स ज्ञायते ज्ञातो मोक्षं च कुरुते प्रभुः ॥ ३५ ॥

बुद्धो वा यदि वा विष्णुर्यद्वा ब्रह्माथवेश्वरः ।
उच्यतां स जिनेन्द्रो वा नार्थभेदस्तथापि हि ॥ ३६ ॥

ममैव देवो देवः स्यात् तव नैवेति केवलम् ।
मत्सरस्फूर्जितं सर्वमज्ञानानां विजृम्भितम् ॥ ३७ ॥

यथावस्थितविज्ञाततत्स्वरूपास्तु किं क्वचित् ।
विवदन्ते महात्मानस्तत्त्वविश्रान्तदृष्टयः ॥ ३८ ॥

स्वरूपं वीतरागत्वं पुनस्तस्य न रागिता ।
रागो यद्यत्र तत्रान्ये दोषा द्वेषादयो ध्रुवम् ॥ ३९ ॥

तैर्दोषैर्दूषितो देवः कथं भवितुमर्हति ।
इत्थं माध्यस्थ्यमास्थाय तत्त्वबुद्ध्याऽवधार्यताम् ॥ ४० ॥

यद्वा रागादिभिर्दोषैः सर्वसंक्लेशकारकैः ।
दूषितेन शुभेनाऽपि देवेनैव हि तेन किम् ॥ ४१ ॥

वीतरागं यतो ध्यायन् वीतरागो भवेद् भवी ।
इलिका भ्रमरीभीता ध्यायन्ती भ्रमरीं यथा ॥ ४२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रागादिदूषितं ध्यायन् रागादिविवशो भवेत् ।
कामुकः कामिनीं ध्यायन् यथा कामैकविह्वलः ॥ ४३ ॥

रागादयस्तु पाप्मानो भवभ्रमणकारणम् ।
न विवादोऽत्र कोऽप्यस्ति सर्वथा सर्वसंमतेः ॥ ४४ ॥

वीतरागमतो ध्यायन् वीतरागो विमुच्यते ।
रागादिमोहितं ध्यायन् सरागो बध्यते स्फुटम् ॥ ४५ ॥

य एव वीतरागः स देवो निश्चीयतां ततः ।
भविनां भवदम्भोलिः स्वतुल्यपदवीप्रदः ॥ ४६ ॥

सर्वेऽपि साम्प्रतं लोकाः प्रायस्तत्त्वपराङ्मुखाः ।
क्लिश्यन्ते स्वाग्रहग्रस्ता दृष्टिरागेण मोहिताः ॥ ४७ ॥

दृष्टिरागो महामोहो दृष्टिरागो महाभयः ।
दृष्टिरागो महामारो दृष्टिरागो महाज्वरः ॥ ४८ ॥

पतितव्यं जनैः सर्वैः प्रायः कालानुभावतः ।
पापो मत्सरहेतुस्तद् निर्मितोऽसौ सतामपि ॥ ४९ ॥

मोहोपहतचित्तास्ते मैत्र्यादिभिरसंस्कृताः ।
स्वयं नष्टा जनं मुग्धं नाशयन्ति च धिग् हहा ॥ ५० ॥

परे हितमतिर्मैत्री, मुदिता गुणमोदनम् ।
उपेक्षा दोषमाध्यस्थ्यं, करुणा दुःखमोक्षधीः ॥ ५१ ॥

मैत्री निखिलसत्त्वेषु प्रमोदो गुणशालिषु ।
माध्यस्थ्यमविनेयेषु करुणा दुःखिदेहिषु ॥ ५२ ॥

धर्मकल्पद्रुमस्यैता मूलं मैत्र्यादिभावनाः ।
यैर्न ज्ञाता न चाभ्यस्ताः स तेषामतिदुर्लभः ॥ ५३ ॥

अहो विचित्रं मोहान्ध्यं, तदन्धैरिह यज्जनैः ।
दोषा असन्तोऽपीक्ष्यन्ते परे सन्तोऽपि नात्मनि ॥ ५४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मदीयं दर्शनं मुख्यं पाखण्डान्यपराणि तु ।
मदीय आगमः सारः परकीयास्त्वसारकाः ॥ ५५ ॥

तात्त्विका वयमेवान्ये भ्रान्ताः सर्वेऽप्यतात्त्विकाः ।
इति मत्सरिणो दूरोत्सारितास्तत्त्वसारतः ॥ ५६ ॥

यथाऽऽहतानि भाण्डानि विनश्यन्ति परस्परम् ।
तथा मत्सरिणोऽन्योन्यं हि दोषग्रहणाद्धताः ॥ ५७ ॥

परं पतन्तं पश्यन्ति न तु स्वं मोहमोहिताः ।
कुर्वन्तः परदोषाणां ग्रहणं भवकारणम् ॥ ५८ ॥

यथा परस्य पश्यन्ति दोषान् यद्यात्मनस्तथा ।
सैवाजरामरत्वाय रससिद्धिस्तदा नृणाम् ॥ ५९ ॥

रागद्वेषविनाभूतं साम्यं तत्त्वं यदुच्यते ।
स्वशंसिनां क्व तत् तेषां परदूषणदायिनाम् ॥ ६० ॥

मानेऽपमाने निन्दायां स्तुतौ वा लोष्ठुकाञ्चने ।
जीविते मरणे लाभालाभे रङ्के महर्द्धिके ॥ ६१ ॥

शत्रौ मित्रे सुखे दुःखे हृषीकार्थे शुभाशुभे ।
सर्वत्रापि यदेकत्वं तत्त्वं तद् भेद्यतां परम् ॥ ६२ ॥

अष्टाङ्गस्यापि योगस्य सारभूतमिदं खलु ।
यतो यमादिव्यासोऽस्मिन् सर्वोऽप्यस्यैव हेतवे ॥ ६३ ॥

क्रियते दधिसाराय दधिमन्थो यथा किल ।
तथैव साम्यसाराय योगाभ्यासो यमादिकः ॥ ६४ ॥

अद्य कल्येऽपि कैवल्यं साम्येनानेन नान्यथा ।
प्रमादः क्षणमप्यत्र ततः कर्तुं न साम्प्रतम् ॥ ६५ ॥

किं बुद्धेन किमीशेन किं धात्रा किमु विष्णुना ।
किं जिनेन्द्रेण रागाद्यैर्यदि स्वं कलुषं मनः ॥ ६६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किं नाग्न्येन सितै रक्तैः किं पटैः किं जटाभरैः ।
किं मुण्डमुण्डनेनापि साम्यं सर्वत्र नो यदि ॥ ६७ ॥

किं व्रतैः किं व्रताचारैः किं तपोभिर्जपैश्च किम् ।
किं ध्यानैः किं तथा ध्येयैर्न चित्तं यदि भास्वरम् ॥ ६८ ॥

किं क्लिष्टेन्द्रियरोधेन किं सदा पठनादिभिः ।
किं सर्वस्वप्रदानेन तत्त्वं नोन्मीलितं यदि ॥ ६९ ॥

नाञ्चलो मुखवस्त्रं न, न राका न चतुर्दशी ।
न श्राद्धादिप्रतिष्ठा वा तत्त्वं किन्त्वमलं मनः ॥ ७० ॥

दृष्ट्वा श्रीगौतमं बुद्धैस्त्रिपञ्चशततापसैः ।
भरतप्रमुखैर्वापि क्व कृतो बाह्यकुग्रहः ? ॥ ७१ ॥

दृढप्रहारिवीरेण चिलातीपुत्रयोगिना ।
इलापुत्रादिभिश्चैव सेवितो योग उत्तमः ॥ ७२ ॥

येन केन प्रकारेण देवताराधनादिना ।
चित्तं चन्द्रोऽज्ज्वलं कार्यं किमन्यैर्ग्रहकुग्रहैः ॥ ७३ ॥

तथा चिन्त्यं, तथा वाच्यं, चेष्टितव्यं तथा तथा ।
मलीमसं मनोऽत्यर्थं यथा निर्मलतां व्रजेत् ॥ ७४ ॥

चञ्चलस्यास्य चित्तस्य सदैवोत्पथचारिणः ।
उपयोगपरैः स्थेयं योगिभिर्योगकाङ्क्षिभिः ॥ ७५ ॥

सुकरं मलधारित्वं, सुकरं दुस्तपं तपः ।
सुकरोऽक्षनिरोधश्च, दुष्करं चित्तशोधनम् ॥ ७६ ॥

पापबुद्ध्या भवेत्पापं को मुग्धोऽपि न वेत्त्यदः ।
धर्मबुद्ध्या तु यत्पापं तच्चिन्त्यं निपुणैर्बुधैः ॥ ७७ ॥

अणुमात्रा अपि गुणा दृश्यन्ते स्वधियाऽऽत्मनि ।
दोषास्तु पर्वतस्थूला अपि नैव कथञ्चन ॥ ७८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त एव वैपरीत्येन विज्ञातव्याः परं वचः ।
दिङ्मोह इव कोऽप्येष महामोहो महाबलः ॥ ७९ ॥

धर्मस्य बहुधाऽध्वानो लोके विभ्रमहेतवः ।
तेषु बाह्यफटाटोपात्तत्त्वविभ्रान्तदृष्टयः ॥ ८० ॥

स्वस्वदर्शनरागेण विवदन्तो मिथो जनाः ।
सर्वथैवात्मनो धर्मं मन्यन्ते न परस्य तु ॥ ८१ ॥

यत्र साम्यं स तत्रैव किमात्मपरचिन्तया ।
जानीत तद्विना हंहो ! नात्मनो न परस्य च ॥ ८२ ॥

क्षान्त्यादिर्दशधा धर्मः सर्वधर्मशिरोमणिः ।
सोऽपि साम्यवतामेव मैत्र्यादिकृतकर्मणाम् ॥ ८३ ॥

साम्यं समस्तधर्माणां सारं ज्ञात्वा ततो बुधाः ।
बाह्यं दृष्टिग्रहं मुक्त्वा चित्तं कुरुत निर्मलम् ॥ ८४ ॥

सहजानन्दसाम्यस्य विमुखा मूढबुद्धयः ।
इच्छन्ति दुःखदं दुःखोत्पाद्यं वैषयिकं सुखम् ॥ ८५ ॥

कषाया विषया दुःखमिति वेत्ति जनः स्फुटम् ।
तथापि तन्मुखः कस्माद् धावतीति न बुद्ध्यते ॥ ८६ ॥

सर्वसङ्गपरित्यागः सुखमित्यपि वेत्ति सः ।
सम्मुखोऽपि भवेत् किं न तस्येत्यपि न बुद्ध्यते ॥ ८७ ॥

सूक्ष्माः सूक्ष्मतरा भावा भेद्यन्ते सूक्ष्मबुद्धिभिः ।
एतद् द्वयं तु दुर्भेदं तेषामपि हि का गतिः ॥ ८८ ॥

अपराधाक्षमा क्रोधो मानो जात्याद्यहंकृतिः ।
लोभः पदार्थतृष्णा च माया कपटचेष्टितम् ॥ ८९ ॥

शब्दरूपरसस्पर्शगन्धाश्च मृगतृष्णिकाः ।
दुःखयन्ति जनं सर्वं सुखाभासविमोहितम् ॥ ९० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नोपेन्द्रस्य न चेन्द्रस्य तत् सुखं नैव चक्रिणः ।
साम्यामृतविनिर्मग्नो योगी प्राप्नोति यत्सुखम् ॥ ९१ ॥

रागोऽभीष्टेषु सर्वेषु, द्वेषोऽनिष्टेषु वस्तुषु ।
क्रोधः कृतापराधेषु मानः परपराभवे ॥ ९२ ॥

लोभः परार्थसंप्राप्तौ माया च परवञ्चने ।
गते मृते तथा शोको हर्षश्चागतजातयोः ॥ ९३ ॥

अरतिर्विषयग्रामे याऽशुभे च शुभे रतिः ।
चौरादिभ्यो भयं चैव कुत्सा कुत्सितवस्तुषु ॥ ९४ ॥

वेदोदयश्च संभोगे व्यलीयेत मुनेर्यदा ।
अन्तःशुद्धिकरं साम्यामृतमुज्जृम्भते तदा ॥ ९५ ॥

एतेषु येन केनापि कृष्णसर्पेण देहिनः ।
दृष्टस्य नश्यति क्षिप्रं विवेकवरजीवितम् ॥ ९६ ॥

दुर्विजेया दुरुच्छेद्या एतेऽभ्यन्तरवैरिणः ।
उत्तिष्ठमाना एवातो रक्षणीयाः प्रयत्नतः ॥ ९७ ॥

यद्यात्मा निर्जितोऽमीभिस्ततो दुःखागमो महान् ।
यद्यात्मना जिता एते महान् सौख्यागमस्तदा ॥ ९८ ॥

सहजानन्दता सेयं सैवात्मारामता मता ।
उन्मनीकरणं तद् यद् मुनेः शमरसे लयः ॥ ९९ ॥

साम्यं मानसभावेषु साम्यं वचनवीचिषु ।
साम्यं कायिकचेष्टासु साम्यं सर्वत्र सर्वदा ॥ १०० ॥

स्वपता जाग्रता रात्रौ दिवा चाखिलकर्मसु ।
कायेन मनसा वाचा साम्यं सेव्यं सुयोगिना ॥ १०१ ॥

यदि त्वं साम्यसंतुष्टो विश्वं तुष्टं तदा तव ।
तल्लोकस्यानुवृत्त्या किं स्वमेवैकं समं कुरु ॥ १०२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुतश्रामण्ययोगानां प्रपञ्चः साम्यहेतवे ।
तथापि तत्त्वतस्तस्माज्जनोऽयं प्लवते बहिः ॥ १०३ ॥

स्वाधीनं स्वं परित्यज्य विषमं दोषमन्दिरम् ।
अस्वाधीनं परं मूढ ! समीकर्तुं किमाग्रहः ॥ १०४ ॥

वृक्षस्य च्छेद्यमानस्य भूष्यमाणस्य वाजिनः ।
यथा न रोषस्तोषश्च भवेद् योगी समस्तथा ॥ १०५ ॥

सूर्यो जनस्य तापाय, सोमः शीताय खिद्यते ।
तद् योगी सूर्यसोमाभः सहजानन्दतां भजेत् ॥ १०६ ॥

यथा गुडादिदानेन यत्किञ्चित् त्याज्यते शिशुः ।
चलं चित्तं शुभध्यानेनाशुभं त्याज्यते तथा ॥ १०७ ॥

सर्वभूताविनाभूतं स्वं पश्यन् सर्वदा मुनिः ।
मैत्राद्यमृतसंमग्नः क्व क्लेशांशमपि स्पृशेत् ॥ १०८ ॥

नाज्ञानाद् बालको वेत्ति, शत्रुमित्रादिकं यथा ।
तथात्र चेष्टते ज्ञानी तदिहैव परं सुखम् ॥ १०९ ॥

तोषणीयो जगन्नाथस्तोषणीयश्च सद्गुरुः ।
तोषणीयस्तथा स्वात्मा, किमन्यैर्बत तोषितैः ॥ ११० ॥

कषायविषयाक्रान्तो बहिर्बुद्धिरयं जनः ।
किं तेन रुष्टतुष्टेन तोषरोषौ च तत्र किम् ॥ १११ ॥

असदाचारिणः प्रायो लोकाः कालानुभावतः ।
द्वेषस्तेषु न कर्तव्यः संविभाव्य भवस्थितिम् ॥ ११२ ॥

निःसंगो निर्ममः शान्तो निरीहः संयमे रतः ।
यदा योगी भवेदन्तस्तत्त्वमुद्भासते तदा ॥ ११३ ॥

सद्वृक्षं प्राप्य निर्वाति रवितप्तो यथाऽध्वगः ।
मोक्षाध्वस्थस्तपस्तप्तस्तथा योगी परं लयम् ॥ ११४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति साम्यतनुत्राणत्रातचारित्रविग्रहः ।
मोहस्य ध्वजिनीं धीरो विध्वंसयति लीलया ॥ ११५ ॥

त्यक्त्वा रजस्तमोभावौ सत्त्वे चित्तं स्थिरीकुरु ।
न हि धर्माधिकारोऽस्ति हीनसत्त्वस्य देहिनः ॥ ११६ ॥

हीनसत्त्वो यतो जन्तुर्बाधितो विषयादिभिः ।
बाढं पतति संसारे स्वप्रतिज्ञाविलोपनात् ॥ ११७ ॥

सावद्यं सकलं योगं प्रत्याख्यायान्यसाक्षिकम् ।
विस्मृतात्मा पुनः क्लीबः सेवते धैर्यवर्जितः ॥ ११८ ॥

तावद्गुरुवचः शास्त्रं तावत् तावच्च भावनाः ।
कषायविषयैर्यावद् न मनस्तरलीभवेत् ॥ ११९ ॥

कषायविषयग्रामे धावन्तमतिदुर्जयम् ।
यः स्वमेव जयत्येकं स वीरतिलकः कुतः ॥ १२० ॥

धीराणामपि वैधुर्यकरै रौद्रपरीषहैः ।
स्पृष्टः सन् कोऽपि वीरेन्द्रः संमुखो यदि धावति ॥ १२१ ॥

उपसर्गे सुधीरत्वं सुभीरुत्वमसंयमे ।
लोकातिगं द्वयमिदं मुनेः स्याद् यदि कस्यचित् ॥ १२२ ॥

दुस्सहा विषयास्तावत् कषाया अतिदुस्सहाः ।
परीषहोपसर्गाश्चाधिकदुस्सहदुस्सहाः ॥ १२३ ॥

जगत्त्रयैकमल्लश्च कामः केन विजीयते ।
मुनिवीरं विना कञ्चिच्चित्तनिग्रहकारिणम् ॥ १२४ ॥

मुनयोऽपि यतस्तेन विवशीकृतचेतसः ।
घोरे भवान्धकूपेऽस्मिन्पतित्वा यान्त्यधस्तलम् ॥ १२५ ॥

तावद् धैर्यं महत्त्वं च तावद् तावद् विवेकिता ।
कटाक्षविशिखान् यावद् न क्षिपन्ति मृगेक्षणाः ॥ १२६ ॥



For Private And Personal Use Only

गृहं च गृहवार्त्तां च, राज्यं राज्यश्रियोऽपि च ।
समर्प्य सकलं स्त्रीणां चेष्टन्ते दासवज्जनाः ॥ १२७ ॥

सा मित्रं सैव मन्त्री च सा बन्धुः सैव जीवितम् ।
सा देवः सा गुरुश्चैव सा तत्त्वं स्वामिनी च सा ॥ १२८ ॥

रात्रौ दिवा च सा, सा, सा, सर्वं सर्वत्र सैव हि ।
एवं स्त्र्यासक्तचित्तानां क्व धर्मकरणे रतिः ॥ १२९ ॥

स्त्रीसमुद्रेऽत्र गम्भीरे निमग्नमखिलं जगत् ।
उन्मज्जति महात्माऽस्माद् यदि कोऽपि कथञ्चन ॥ १३० ॥

दूरे दूरतरे वाऽस्तु खड्गधारोपमं व्रतम् ।
हीनसत्त्वस्य हा चिन्ता स्वोदरस्यापि पूरणे ॥ १३१ ॥

यत् तदर्थं गृहस्थानां बहुचाटुशतानि सः ।
बहुधा च करोत्युच्चैः श्वेव दैन्यं प्रदर्शयन् ॥ १३२ ॥

त्वमार्या त्वं च माता मे त्वं स्वसा त्वं पितुःश्वसा
इत्यादिज्ञातिसम्बन्धान् कुरुते दैन्यमाश्रितः ॥ १३३ ॥

अहं त्वदीयपुत्रोऽस्मि कवलैस्तव वर्धितः ।
तव भागहरश्चैव जीवकस्ते तवेहकः ॥ १३४ ॥

एवमादीनि दैन्यानि क्लीबः प्रतिजनं मुहुः ।
कुरुते नैकशस्तानि कः प्रकाशयितुं क्षमः ॥ १३५ ॥

आगमे योगिनां या तु सैंही वृत्तिः प्रदर्शिता ।
तस्यास्त्रस्यति नाम्नापि का कथाऽचरणे पुनः ॥ १३६ ॥

किन्तु सातैकलिप्सुः स वस्त्राहारादिमूर्च्छया ।
कुर्वाणो मन्त्रतन्त्रादि गृहव्यापिं च गेहिनाम् ॥ १३७ ॥

कथयंश्च निमित्ताद्यं लाभालाभं शुभाशुभम् ।
कोटिं काकिणिमात्रेण हारयेत् स्वं व्रतं त्यजन् ॥ १३८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चारित्रैश्वर्यसंपन्नं पुण्यप्राग्भारभाजनम् ।
मूढबुद्धिर्न वेत्ति स्वं त्रैलोक्योपरिवर्त्तिनम् ॥ १३९ ॥

ततश्च भिक्षुकप्रायं मन्यमानो विपर्ययात् ।
भावनिःस्वधनेशानां ललनानि करोत्यसौ ॥ १४० ॥

प्रशान्तस्य निरीहस्य सदानन्दस्य योगिनः ।
इन्द्रादयोऽपि ते रङ्कप्रायाः स्युः किमुतापराः ॥ १४१ ॥

किं विभुत्वेन किं भोगैः किं सौन्दर्येण किं श्रिया ।
किं जीवितेन जीवानां दुःखं चेत् प्रगुणं पुरः ॥ १४२ ॥

नार्थ्यते यावदैश्वर्यं तावदायाति सम्मुखम् ।
यावदभ्यर्थ्यते तावत् पुनर्याति पराङ्मुखम् ॥ १४३ ॥

अधैर्यादविचार्येदमिच्छाव्याकुलमानसः ।
हा हा हेति तदर्थं स धावन् धावन् न खिद्यते ॥ १४४ ॥

स्थिरो धीरस्तु गम्भीरः संपत्सु च विपत्सु च
बाध्यते न च हर्षेण विषादेन न च क्वचित् ॥ १४५ ॥

ये सिद्धा, ये च सेत्स्यन्ति सर्वे सत्त्वे प्रतिष्ठिताः ।
सत्त्वं विना हि सिद्धिर्न प्रोक्ता कुत्रापि शासने ॥ १४६ ॥

एवमेव सुखेनैव सिद्ध्यन्ति यदि कौलिकाः ।
तद् गृहस्थादयोऽप्येते किं न सिद्ध्यन्ति कथ्यताम् ॥ १४७ ॥

सुखाभिलाषिणोऽत्यर्थं, ग्रस्ता ऋद्ध्यादिगारवैः ।
प्रवाहवाहिनो ह्यत्र दृश्यन्ते सर्वजन्तवः ॥ १४८ ॥

एवमेव सुखेनैव सिद्धिर्यदि च मन्यते ।
तत्प्राप्तौ सर्वजन्तूनां तदा रिक्तो भवेद् भवः ॥ १४९ ॥

लोकेऽपि सात्त्विकेनैव जीयते परवाहिनी ।
उद्धूलिकोऽपि नान्येषां दृश्यतेऽह्नाय नश्यताम् ॥ १५० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोकोत्तरान्तरङ्गस्य मोहसैन्यस्य तं विना ।
संमुखं नापरैः स्थातुं शक्यते नात्र कौतुकम् ॥ १५१ ॥

सर्वमङ्गस्य दीनस्य दुष्करं प्रतिभासते ।
सत्त्वैकवृत्तिवीरस्य ज्ञानिनः सुकरं पुनः ॥ १५२ ॥

द्वित्रास्त्रिचतुरा वापि यदि सर्वजगत्यपि ।
प्राप्यन्ते धैर्यगाम्भीर्यौदार्यादिगुणशालिनः ॥ १५३ ॥

बाहुल्येन तदाभासमात्रा अपि कलौ कुतः ।
बुसप्रायैस्तु लोकोऽयं पूरितो भवपूरकैः ॥ १५४ ॥

मानुष्यं दुर्लभं लब्ध्वा ये न लोकोत्तरं फलम् ।
गृह्णन्ति सुखमायत्यां पशवस्ते नरा अपि ॥ १५५ ॥

तत्पुनर्मोक्षदो धर्मः शीलाङ्गवहनात्मकः ।
प्रतिस्रोतःप्लवात् साध्यः सत्त्वसारैकमानसैः ॥ १५६ ॥

ततः सत्त्वमवष्टभ्य त्यक्त्वा कुग्राहिणां ग्रहम् ।
क्रियतां भोः सुधर्मस्य करणायोद्यमः सदा ॥ १५७ ॥

कायेन मनसा वाचा यत्कर्म कुरुते यदा ।
सावधानस्तदा तत्त्वधर्मान्वेषी मुनिर्भवेत् ॥ १५८ ॥

इष्टानिष्टेषु भावेषु सदा व्यग्रं मनो मुनिः ।
सम्यङ् निश्चयतत्त्वज्ञः स्थिरीकुर्वीत सात्त्विकः ॥ १५९ ॥

अशुभं वा शुभं वापि स्वस्वकर्मफलोदयम् ।
भुञ्जानानां हि जीवानां हर्ता कर्ता न कश्चन ॥ १६० ॥

मृतप्रायं यदा चित्तं मृतप्रायं यदा वपुः ।
मृतप्रायं यदाक्षाणां वृन्दं पक्वं तथा सुखम् ॥ १६१ ॥

आजन्माज्ञानचेष्टाः स्वा निन्द्यास्ताः प्राकृतैरपि ।
विचिन्त्य मूढ ! वैदग्ध्यगर्वं कुर्वन्न लज्जसे ॥ १६२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निरुन्ध्याच्चित्तदुर्ध्यानं, निरुन्ध्यादयतं वचः ।
निरुन्ध्यात् कायचापल्यं तत्त्वतल्लीनमानसः ॥ १६३ ॥

दिनातिवाहिकां कष्टां दृष्ट्वा बन्द्यादिदुःखिनाम् ।
रुद्धमेकान्तमौनाभ्यां तपश्चित्तं स्थिरीकुरु ॥ १६४ ॥

मुनिना मसृणं शान्तं, प्राञ्जलं मधुरं मृदु ।
वदता तापलेशोऽपि त्याज्यः स्वस्य परस्य च ॥ १६५ ॥

कोमलाऽपि सुसाम्यापि वाणी भवति कर्कशा ।
अप्राञ्जलास्फुटात्यर्थं विदग्धा चर्विताक्षरा ॥ १६६ ॥

औचित्यं ये विजानन्ति सर्वकार्येषु सिद्धिदम् ।
सर्वप्रियंकरा ये च ते नरा विरला जने ॥ १६७ ॥

औचित्यं परमो बन्धुरौचित्यं परमं सुखम् ।
धर्मादिमूलमौचित्यमौचित्यं जनमान्यता ॥ १६८ ॥

कर्मबन्धदृढश्लेषं सर्वस्याप्रीतिकं सदा
धर्मार्थिना न कर्त्तव्यं वीरेण जटिनि यथा ॥ १६९ ॥

बीजभूतं सुधर्मस्य सदाचारप्रवर्तनम् ।
सदाचारं विना स्वैरिण्युपवासनिभो हि सः ॥ १७० ॥

मूर्त्तो धर्मः सदाचारः सदाचारोऽक्षयो निधिः ।
दृढं धैर्यं सदाचारः सदाचारः परं यशः ॥ १७१ ॥

लोभमुन्मूलयन्मूलादप्रमत्तो मुनिः सदा ।
क्षायोपशमिके भावे स्थितोऽनुत्सुकतां व्रजेत् ॥ १७२ ॥

संसारसरणिर्लोभो लोभः शिवपथाचलः ।
सर्वदुःखखनिर्लोभो लोभो व्यसनमन्दिरम् ॥ १७३ ॥

शोकादीनां महाकन्दो लोभः क्रोधानलानिलः ।
मायावल्लिसुधाकुल्या मानमत्तेभवारुणी ॥ १७४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिलोक्यामपि ये दोषास्ते सर्वे लोभसंभवाः ।
गुणास्तथैव ये केऽपि ते सर्वे लोभवर्जनात् ॥ १७५ ॥

नैरपेक्ष्यादनौत्सुक्यमनौत्सुक्याच्च सुस्थता ।
सुस्थता च परानन्दस्तदपेक्षां क्षयेद् मुनिः ॥ १७६ ॥

अधर्मो जिह्मता यावद् धर्मः स्याद्यावदार्जवम् ।
अधर्मधर्मयोरेतद् द्वयमादिमकारणम् ॥ १७७ ॥

सुखमार्जवशीलत्वं सुखं नीचैश्च वर्त्तनम् ।
सुखमिन्द्रियसंतोषः सुखं सर्वत्र मैत्र्यकम् ॥ १७८ ॥

सन्तुष्टं, सरलं, सोमं, नम्रं तं कूरगड्डुकम्,
ध्यायन् मुनिं सदा चित्ते, को न स्याच्चन्द्रनिर्मलः ॥ १७९ ॥

सुकुमारसुरूपेण शालिभद्रेण भोगिना ।
तथा तप्तं तपो ध्यायन् न भवेत्कस्तपोरतः ॥ १८० ॥

किं न चेतयसे मूढ ! मृत्युकालेऽप्युपस्थिते ।
विषयेषु मनो यत्ते, धावत्येव निरङ्कुशम् ॥ १८१ ॥

जीविते गतशेषेऽपि विषयेच्छां वियोज्य ते ।
चेत् तपःप्रगुणं चेतस्ततः किञ्चिद् न हारितम् ॥ १८२ ॥

कूटजन्मावतारं स्वं पापोपायैश्च संकुलम् ।
व्यर्थं नीत्वा बताद्यापि धर्मे चित्तं स्थिरीकुरु ॥ १८३ ॥

अनन्तान् पुद्गलावर्तान्नात्मन्नेकेन्द्रियादिषु ।
भ्रान्तोऽसि च्छेदभेदादिवेदनाभिरभिद्रुतः ॥ १८४ ॥

साम्प्रतं तु दृढीभूय सर्वदुःखदवानलम् ।
व्रतदुःखं कियत्कालं सह मा मा विषीद भोः ॥ १८५ ॥

उपदेशादिना किञ्चित् कथञ्चित् कार्यते परः ।
स्वात्मा तु स्वहिते योक्तुं मुनीन्द्रैरपि दुष्करः ॥ १८६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदा दुःखं सुखत्वेन दुःखत्वेन सुखं यदा ।
मुनिर्वेत्ति तदा तस्य मोक्षलक्ष्मीः स्वयंवरा ॥ १८७ ॥

सर्वं वासनया दुःखं सुखं वा परमार्थतः ।
म्लायत्यस्त्रेक्षणेऽप्येको हतोऽप्यन्यस्तु तुष्यति ॥ १८८ ॥

सुखमग्नो यथा कोऽपि लीनः प्रेक्षणकादिषु ।
गतं कालं न जानाति तथा योगी परेऽक्षरे ॥ १८९ ॥

मृगमित्रो यदा योगी वनवाससुखे रतः ।
तदा विषयशर्मेच्छा मृगतृष्णा विलीयते ॥ १९० ॥

वने शान्तः सुखासीनो निर्द्वन्द्वो निष्परिग्रहः ।
प्राप्नोति यत्सुखं योगी सार्वभौमोऽपि तत्कुतः ॥ १९१ ॥

जन्मभूत्वात् पुलिन्दानां वनवासे यथा रतिः ।
तथा विदिततत्त्वानां यदि स्यात् किमतः परम् ॥ १९२ ॥

एको गर्भे स्थितो जात एक एको विनङ्क्ष्यसि ।
तथापि मूढ ! पत्न्यादीन् किं ममत्वेन पश्यसि ॥ १९३ ॥

पापं कृत्वा स्वतो भिन्नं कुटुम्बं पोषितं त्वया ।
दुःखं सहिष्यसे तेन भ्रान्तोऽसि हा महान्तरे ॥ १९४ ॥

चलं सर्वं क्षणाद् वस्तु दृश्यतेऽथ न दृश्यते ।
अजरामरवत् पापं, तथापि कुरुषे कथम् ॥ १९५ ॥

सप्तधातुमये श्लेष्ममूत्राद्यशुचिपूरिते ।
शरीरकेऽपि पापाय कोऽयं शौचाग्रहस्तव ॥ १९६ ॥

शारीरमानसैर्दुःखैर्बहुधा बहुदेहिनः ।
संयोज्य साम्प्रतं जीव ! भविष्यसि कथं स्वयम् ॥ १९७ ॥

धर्मं न कुरुषे मूर्ख ! प्रमादस्य वशंवदः ।
कल्ये हि त्रास्यते कस्त्वां, नरके दुःखविह्वलम् ॥ १९८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कन्धराबद्धपापाश्मा भवाब्धौ यद्यधोगतः ।
क्व धर्मरज्जुसंप्राप्तिः पुनरुच्छलनाय ते ॥ १९९ ॥

दुःखकूपेऽत्र संसारे सुखलेशभ्रमोऽपि यः ।
सोऽपि दुःखसहस्रेणानुविद्धोऽतः कुतः सुखम् ॥ २०० ॥

दुःखितानखिलान् जन्तून् पश्यतीह यथा यथा ।
तथा तथा भवस्यास्य विशुद्धात्मा विरज्यति ॥ २०१ ॥

संसारावर्तनिर्मग्नो घूर्णमानो विचेतनः ।
अध एव जनो याति निकटेऽपि तटे हहा ॥ २०२ ॥

तिर्यग्गोऽयं यथा च्छिन्दन् नद्याः स्यात् पारगः सुधीः ।
भवस्यापि तथोत्सर्गापवादकुशलो मुनिः ॥ २०३ ॥

एभिः सर्वात्मना भावैर्भावितात्मा शुभाशयः ।
कामार्थविमुखः शूरः सुधर्मैकरतिर्भवेत् ॥ २०४ ॥

इति तत्त्वोपदेशौघक्षालितामलमानसः ।
निर्द्वन्द्व उचिताचारः सर्वस्यानन्ददायकः ॥ २०५ ॥

स्वस्वरूपस्थितः पीत्वा योगी योगरसायनम् ।
निःशेषक्लेशनिर्मुक्तं प्राप्नोति परमं पदम् ॥ २०६ ॥

पू. आ. श्री जयशेखरसूरि-विरचिता

## ॥ श्री संबोधसत्तरि ॥

नमिऊण तिलोयगुरुं, लोआलोअप्पयासयं वीरं ।
संबोहसत्तरिमहं, रएमि उद्धारगाहाहिं ॥ १ ॥

सेयंबरो य आसं-बरो य बुद्धो य अहव अन्नो वा ।
समभावभाविअप्पा, लहेइ मुक्खं न संदेहो ॥ २ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अट्ठदसदोसरहिओ, देवो धम्मो वि निउणदयसहिओ ।
सुगुरूवि बंभयारी, आरंभपरिग्गहा विरओ ॥ ३ ॥

अण्णाण कोह मय माण लोह माया रई य अरई य ।
निद्दा सोअ अलियवयण चोरिआ मच्छरभया य ॥ ४ ॥

पाणिवह पेम कीला, पसंगहासा य जस्स ए दोसा ।
अट्ठारस वि पणट्ठा, नमामि देवाहिदेवं तं ॥ ५ ॥

सव्वाओ वि नईओ, कमेण जह सायरम्मि निवडंति ।
तह भगवइअहिंसं, सव्वे धम्मा समिल्लंति ॥ ६ ॥

ससरीरे वि निरीहा, बज्झब्भिंतरपरिग्गहविमुक्का ।
धम्मोवगरणमित्तं, धरंति चारित्तरक्खट्ठा ॥ ७ ॥

पंचिंदियदमणपरा, जिणुत्तसिद्धंतगहियपरमत्था ।
पंचसमिया तिगुत्ता, सरणं मह एरिसा गुरुणो ॥ ८ ॥

पासत्थो ओसण्णो, होइ कुसीलो तहेव संसत्तो ।
अहछंदो वि य एए, अवंदणिज्जा जिणमयम्मि ॥ ९ ॥

पासत्थाई वंदमाणस्स नेव कित्ती न निज्जरा होई ।
जायइ कायकिलेसो, बंधो कम्मस्स आणाई ॥ १० ॥

जे बंभचेरभट्ठा, पाए पाडंति बंभयारिणं ।
ते हुंति टुंटमुंटा, बोही वि सुदुल्लहा तेसिं ॥ ११ ॥

दंसणभट्ठो भट्ठो, दंसणभट्ठस्स नत्थि निव्वाणं ।
सिज्झंति चरणरहिआ, दंसणरहिआ न सिज्झंति ॥ १२ ॥

तित्थयरसमो सूरी,सम्मं जो जिणमयं पयासेई ।
आणाइ अइक्कंतो, सो कापुरिसो न सप्पुरिसो ॥ १३ ॥

जह लोहसिला अप्पं पि, बोलए तह विलग्गपुरिसं पि ।
इय सारंभो य गुरू, परमप्पाणं च बोलेई ॥ १४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किइकम्मं च पसंसा, सुहसीलजणम्मि कम्मबंधाय ।
जे जे पमायठाणा, ते ते उववूहिया हुंति ॥ १५ ॥

एवं णाऊण संसग्गिं, दंसणालावसंथवं ।
संवासं च हियाकंखी, सव्वोवाएहिं वज्जए ॥ १६ ॥

अहिगिलइ गलइ उअरं, अहवा पच्चुग्गलंति नयणाइं ।
हा ! विसमा कज्जगई, अहिणा छच्छुंदरि गहिआ ॥ १७ ॥

को चक्कवट्टिरिद्धिं, चइउं दासत्तणं समभिलसइ ।
को व रयणाइं मुत्तुं, परिगिण्हइ उवलखंडाइं ॥ १८ ॥

नेरइयाण वि दुक्खं, झिज्झइ कालेण किं पुण नराणं ।
ता न चिरं तुह होई, दुक्खमिणं मा समुव्वियसु ॥ १९ ॥

वरमग्गिम्मि पवेसो, वरं विसुद्धेण कम्म (म्मु) णा मरणं ।
मा गहियव्वयभंगो, मा जीअं खलिअसीलस्स ॥ २० ॥

अरिहं देवो गुरूणो, सुसाहुणो जिणमयं मह पमाणं ।
इच्चाइ सुहो भावो, सम्मत्तं बिंति जगगुरूणो ॥ २१ ॥

लब्भइ सुरसामित्तं, लब्भइ पहुअत्तणं न संदेहो ।
एगं नवरि न लब्भइ, दुल्लहरयणं व सम्मत्तं ॥ २२ ॥

सम्मत्तम्मि उ लद्धे, विमाणवज्जं न बंधए आउं ।
जइवि न सम्मत्तजढो, अहव न बद्धाउओ पुव्विं ॥ २३ ॥

दिवसे दिवसे लक्खं, देइ सुवण्णस्स खंडियं एगो ।
एगो पुण सामाइयं, करेइ न पहुप्पए तस्स ॥ २४ ॥

निंदपसंसासु समो, समो य माणावमाणकारीसु ।
समसयणपरियणमणो, सामाइयसंगओ जीवो ॥ २५ ॥

सामाइयं तु काउं, गिहिकज्जं जो य चिंतए सड्ढो ।
अट्टवसट्टोवगओ, निरत्थयं तस्स सामा(म) इयं ॥ २६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पडिरूवाई चउदस, खंतीमाई य दसविहो धम्मो ।
बारस य भावणाओ, सूरिगुणा हुंति छत्तीसं ॥ २७ ॥

छव्वयछक्कायरक्खा, पंचिंदियलोहनिग्गहो खंती ।
भावविसोहि पडिले-हणाइकरणे विसुद्धी य ॥ २८ ॥

संजमजोए जुत्तो, अकुसलमणवयणकायसंरोहो ।
सीयाइपीडसहणं, मरणंतउवसग्गसहणं च ॥ २९ ॥

सत्तावीसगुणेहिं, एएहिं जो विभूसिओ साहू ।
तं पणमिज्जइ भत्ति-ब्भरेण हियएण रे जीव ! ॥ ३० ॥

धम्मरयणस्स जुग्गो, अक्खुद्दो रूववं पगइसोमो ।
लोगप्पिओ अकूरो, भीरू असढो सुदक्खिण्णो ॥ ३१ ॥

लज्जालुओ दयालू, मज्झत्थो सोमदिट्ठी गुणरागी ।
सक्कह सुपक्खजुत्तो, सुदीहदंसी विसेसण्णू ॥ ३२ ॥

वुड्ढाणुगो विणिओ, कयण्णुओ परहिअत्थकारी अ ।
तह चेव लद्धलक्खो, इगवीसगुणो हवइ सड्ढो ॥ ३३ ॥

कत्थ अम्हारिसा पाणी, दूस्समा दोसदूसिआ ।
हा अणाहा कहं हुंता, न हुंतो जइ जिणागमो ॥ ३४ ॥

आगमं आयरंतेणं, अत्तणो हियकंखिणा ।
तित्थनाहो गुरू धम्मो, सव्वे ते बहुमण्णिया ॥ ३५ ॥

सुहसीलाओ सच्छं-दचारिणो वेरिणो सिवपहस्स ।
आणाभट्ठाओ बहु-जणाओ मा भणह संघु त्ति ॥ ३६ ॥

एगो साहू एगा य, साहुणी सावओ वि सड्ढी वा ।
आणाजुत्तो संघो, सेसो पुण अट्ठिसंघाओ ॥ ३७ ॥

निम्मलनाणपहाणो, दंसणजुत्तो चरित्तगुणवंतो ।
तित्थयराण य पुज्जो, वुच्चइ एयारिसो संघो ॥ ३८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जह तुसखंडणमयमं-डणाइं रुण्णाइं सुण्णरण्णम्मि ।
विहलाइं तह जाणसु, आणारहियं अणुट्ठाणं ॥ ३९ ॥

आणाइ तवो आणाइ, संजमो तह य दाणमाणाए ।
आणारहिओ धम्मो, पलालपुल्लूव पडिहाई ॥ ४० ॥

आणाखंडणकारी, जइ वि तिकालं महाविभूईए ।
पूएइ वीयरायं, सव्वं पि निरत्थयं तस्स ॥ ४१ ॥

रण्णो आणाभंगे, इक्कुच्चिय होइ निग्गहो लोए ।
सव्वण्णुआणभंगे, अणंतसो निग्गहो होइ ॥ ४२ ॥

जह भोयणमविहिकयं, विणासए विहिकयं जियावेई ।
तह अविहिकओ धम्मो, देइ भवं विहिकओ मुक्खं ॥ ४३ ॥

मेरुस्स सरिसवस्स य, जित्तियमित्तं तु अंतरं होइ ।
दव्वत्थयभावत्थय-अंतरमिह तित्तियं नेयं ॥ ४४ ॥

उक्कोसं दव्वत्थय-आराहओ जाव अच्चुअं जाई ।
भावत्थएण पावइ, अंतमुहूत्तेण निव्वाणं ॥ ४५ ॥

जत्थ य मुणिणो कयवि-क्कयाइ कुव्वंति निच्चपब्भट्ठा ।
तं गच्छं गुणसायर !, विसं व दूरं परिहरिज्जा ॥ ४६ ॥

जत्थ य अज्जालद्धं, पडिग्गहमाइ य विविहमुवगरणं ।
पडिभुंजइ साहूहिं, तं गोयम ! केरिसं गच्छं ? ॥ ४७ ॥

जहिं नत्थि सारणा वा-रणा य पडिचोयणा य गच्छम्मि ।
सो य अगच्छो गच्छो, संजमकामीहिं मुत्तव्वो ॥ ४८ ॥

गच्छं तु उवेहंतो, कुव्वइ दीहं भवं विहीए उ ।
पालंतो पुण सिज्झइ, तइअभवे भगवईसिद्धं ॥ ४९ ॥

जत्थ हिरण्णसुवण्णं, हत्थेण पराणगं पि नो छिप्पे ।
कारणसमल्लियं पि हु, गोयम ! गच्छं तयं भणियं ॥ ५० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुढविदगअगणिमारूअ-वणस्सइ तह तसाण विविहाणं।
मरणंते वि न पीडा, कीरइ मणसा तयं गच्छं ॥ ५१ ॥

मूलगुणेहिं विमुक्कं, बहुगुणकलियं पि लद्धिसंपण्णं।
उत्तमकुले वि जायं, निद्धाडिज्जइ तयं गच्छं ॥ ५२ ॥

जत्थ य उसहादीणं, तित्थयराणं सुरिंदमहियाणं।
कम्मट्ठविमुक्काणं, आणं न खलिज्जइ स गच्छो ॥ ५३ ॥

जत्थ य अज्जाहिं समं, थेरा वि न उल्लवंति गयदसणा।
न य झायंति त्थीणं, अंगोवंगाइ तं गच्छं ॥ ५४ ॥

वज्जेइ अप्पमत्तो, अज्जासंसग्गि अग्गिविससरिसी।
अज्जाणुचरो साहू, लहइ अकित्तिं खु अचिरेणं ॥ ५५ ॥

जो देइ कणयकोडिं, अहवा कारेइ कणयजिणभवणं।
तस्स न तत्तिय पुण्णं, जत्तिय बंभव्वए धरिए ॥ ५६ ॥

सीलं कुलआहरणं, सीलं रूवं च उत्तमं होइ।
सीलं चिय पंडित्तं, सीलं चिय निरुवमं धम्मं ॥ ५७ ॥

वरं वाही वरं मच्चू, वरं दारिद्दसंगमो।
वरं अरण्णवासो अ, मा कुमित्ताण संगमो ॥ ५८ ॥

अगीयत्थकुसीलेहिं, संगं तिविहेण वोसिरे।
मुक्खमग्गंमिमे विग्घं, पहम्मि तेणगे जहा ॥ ५९ ॥

उम्मग्गदेसणाए, चरणं नासंति जिणवरिंदाणं।
वावण्णदंसणा खलु, न हु लब्भा तारिसं दट्ठुं ॥ ६० ॥

परिवारपूअहेऊ, ओसण्णाणं च आणुवित्तीए।
चरणकरणं निगूहई, तं दुल्लहबोहिअं जाण ॥ ६१ ॥

अंबस्स य निंबस्स य, दुण्हं पि समागयाइं मूलाइं।
संसग्गेण विणट्ठो, अंबो निंबत्तणं पत्तो ॥ ६२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पक्कणकुले वसंतो, सउणीपारो वि गरहिओ होई ।
इय दंसणा सुविहिआ, मज्झि वसंता कुसीलाणं ॥ ६३ ॥

उत्तमजणसंसग्गी, सीलदरिद्दं पि कुणई सीलड्ढं ।
जह मेरुगिरिविलग्गं, तणं पि कणगत्तणमुवेई ॥ ६४ ॥

नवि तं करेइ अग्गी, नेव विसं नेव किण्हसप्पो अ ।
जं कुणइ महादोसं, तिव्वं जीवस्स मिच्छत्तं ॥ ६५ ॥

कट्ठं करेसि अप्पं, दमेसि अत्थं चएसि धम्मत्थं ।
इक्कं न चएसि मिच्छत्त–विसलवं जेण बुड्डिहिसि ॥ ६६ ॥

जयणा य धम्मजणणी, जयणा धम्मस्स पालणी चेव ।
तववुड्ढिकरी जयणा, एगंतसुहावहा जयणा ॥ ६७ ॥

जं अज्जिअं चरित्तं, देसूणाए वि पुव्वकोडीए ।
तं पि हु कसायमित्तो, हारेइ नरो मुहूत्तेणं ॥ ६८ ॥

कोहो पीइं पणासेई, माणो विणयनासणो ।
माया मित्ताणि नासेइ, लोहो सव्वविणासणो ॥ ६९ ॥

खंती सुहाण मूलं, मूलं धम्मस्स उत्तमा खंती ।
हरइ महाविज्जा इव, खंती दुरियाइं सव्वाइं ॥ ७० ॥

सयं गेहं परिचज्ज, परगेहं च वावडे ।
निमित्तेण य ववहरई, पावसमणु त्ति वुच्चई ॥ ७१ ॥

दुद्धदहीविगईओ, आहारेई अभिक्खणं ।
न करेई तवोकम्मं, पावसमणु त्ति वुच्चई ॥ ७२ ॥

मज्जं विसयकसाया, निद्दा विकहा य पंचमी भणिया ।
एए पंच पमाया, जीवं पाडेंति संसारे ॥ ७३ ॥

जइ चउदसपुव्वधरो, वसइ निगोएसुऽणंतयं कालं ।
निद्दापमायवसओ, ता होहिसि कह तुमं जीव ! ॥ ७४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हयं नाणं कियाहीणं, हया अण्णाणओ किया।
पासंतो पंगुलो दड्ढो, धावमाणो अ अंधओ ॥ ७५ ॥

संजोगसिद्धीइ फलं वयंति,
न हु (?णो) एगचक्केण रहो पयाई।
अंधो य पंगू य वणे समिच्चा,
ते संप (णट्ठा)उत्ता नगरं पविट्ठा ॥ ७६ ॥

सुबहुं पि सुअमहीअं, किं काही चरणविप्पहीणस्स ?।
अंधस्स जह पलित्ता, दीवसयसहस्सकोडीओ ॥ ७७ ॥

अप्पं पि सुअमहीअं, पयासगं होई चरणजुत्तस्स।
इक्कोवि जह पईवो, सचक्खुस्स पयासेई ॥ ७८ ॥

दंसण वय सामाइय, पोसह पडिमा अबंभ सच्चित्ते।
आरंभ पेस उद्दिट्ठ-वज्जए समणभूए अ ॥ ७९ ॥

संपत्तदंसणाई, पईदियहं जइजणाओ निसुणेई।
सामायारिं परमं, जो खलु तं सावगं बिंति ॥ ८० ॥

जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स।
एवं खु नाणी चरणेण हीणो, भारस्स भागी न हु सुग्गईए ॥ ८१ ॥

तहिं पंचिंदिआ जीवा, इत्थीजोणीनिवासिणो।
मणुआणं नवलक्खा, सव्वे पासई केवली ॥ ८२ ॥

इत्थीणं जोणीसु, हवंति बेइंदिया य जे जीवा।
इक्को य दुण्णि तिण्णिवि, लक्खपुहुत्तं तु उक्कोसं ॥ ८३ ॥

पुरिसेण सहगयाए, तेसिं जीवाण होइ उद्दवणं।
वेणुअदिट्ठंतेणं, तत्ताइ(य)सिलागनाएणं ॥ ८४ ॥

इत्थीण जोणिमज्झे, गब्भगयाइं हवंति जे जीवा।
उप्पज्जंति चयंति य, समुच्छिमा असंखया भणिया ॥ ८५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेहुणसण्णारूढो, नवलक्ख हणेइ सुहुमजीवाणं ।
तित्थयरेणं भणियं, सद्दहियव्वं पयत्तेणं ॥ ८६ ॥

असंखया थीनरमेहुणाओ, मुच्छंति पंचिंदियं माणुसाओ ।
निसेसअंगाणविभत्तिचंगे, भणई जिणो पण्णवणाउवंगे ॥ ८७ ॥

मज्जे महुम्मि मंसम्मि, नवणीयम्मि चउत्थए ।
उप्पज्जंति अणंता, तव्वण्णा तत्थ जंतुणो ॥ ८८ ॥

आमासु अ पक्कासु अ, विपच्चमाणासु मंसपेसीसु ।
सययं चिय उववाओ, भणिओ अ निगोअजीवाणं ॥ ८९ ॥

आजम्मं जं पावं, बंधइ मिच्छत्तसंजुओ कोई ।
वयभंगं काउमणो, बंधइ तं चेव अट्ठगुणं ॥ ९० ॥

सयसहस्साण नारीणं, पिट्टं फाडेइ निग्घिणो ।
सत्तट्ठमासिए गब्भे, तप्फडंते निकंतइ ॥ ९१ ॥

तं तस्स जत्तियं पावं, तं नवगुणियमेलियं हुज्जा ।
एगित्थियजोगेणं, साहू बंधिज्ज मेहुणाओ ॥ ९२ ॥

अक्खंडियचारित्तो, वयधारी जो व होइ गिहत्थो ।
तस्स सगासे दंसण-वयगहणं सोहिकरणं च ॥ ९३ ॥

अद्दामलयप्पमाणे, पुढवीकाए हवंति जे जीवा ।
ते पारेवयमित्ता, जंबूदीवे न मायंति ॥ ९४ ॥

एगम्मि उदगबिंदुम्मि, जे जीवा जिणवरेंहि पण्णता ।
ते जइ सरिसवमित्ता, जंबूदीवे न मायंति ॥ ९५ ॥

बरंटतंदुलमित्ता, तेउकाए हवंति जे जीवा ।
ते जइ खसखसमित्ता, जंबूदीवे न मायंति ॥ ९६ ॥

जे लिंबपत्तमित्ता, वाऊकाए हवंति जे जीवा ।
ते मत्थयलिक्खमित्ता, जंबूदीवे न मायंति ॥ ९७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असुइट्ठाणे पडिआ, चंपकमाला न कीरइ सीसे ।
पासत्थाई ठाणेसु, वट्टमाणो तह अपूज्जो ॥ ९८ ॥

छट्ठट्ठमदसमदुवालसेहिं, मासद्धमासखमणेहिं ।
इत्तो उ अणेगगुणा, सोही जिमियस्स नाणिस्स ॥ ९९ ॥

जं अण्णाणी कम्मं, खवेइ बहुआहि वासकोडीहिं ।
तण्णाणी तिहिं गुत्तो, खवेइ उस्सासमित्तेणं ॥ १०० ॥

जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं ।
रक्खंतो जिणदव्वं, तित्थयरत्तं लहइ जीवो ॥ १०१ ॥

जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं ।
भक्खंतो जिणदव्वं, अणंतसंसारिओ होइ ॥ १०२ ॥

भक्खेइ जो उवेक्खेइ, जिणदव्वं तु सावओ ।
पण्णाहीणो भवे जीवो, लिप्पइ पावकम्मुणा ॥ १०३ ॥

चेइअदव्वविणासे, सिघाए पवयणस्सरिउड्डाहे ।
संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स ॥ १०४ ॥

सुच्चइ दुग्गयनारी, जगगुरुणो सिंदुवारकुसुमेहिं ।
पूआपणिहाणेणं, उप्पण्णा तियसलोगम्मि ॥ १०५ ॥

तित्थयरत्तं सम्मत्त-खाइयं सत्तमीइ तईयाए ।
साहूण वंदणेणं, बद्धं च दसारसीहेणं ॥ १०६ ॥

अकसिणपवत्तगाणं, विरयाविरयाण, एस खलु जुत्तो ।
संसारपयणुकरणे, दव्वत्थए कूवदिट्ठंतो ॥ १०७ ॥

अणथोवं वणथोवं, अग्गीथोवं च कसायथोवं च ।
न हु ते विससिअव्वं, थोवं पि हु तं बहु होई ॥ १०८ ॥

जं दुक्कडं ति मिच्छा, तं भुज्जो कारणं अपूरंतो ।
तिविहेण पडिक्कंतो, तस्स खलु दुक्कडं मिच्छा, ॥ १०९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जं दुक्कडं ति मिच्छा, तं चेव निसेवइ पुणो पावं ।
पच्चक्खमुसावाई, मायानिअडीपसंगो अ ॥ ११० ॥

मिति मिउ मद्दवत्ते, छ'त्ति दोसाण छायणे होई ।
मित्ति य मेराइ ठिओ, दु'त्ति दुगंछामि अप्पाणं ॥ १११ ॥

क'त्ति कडं मे पावं, ड'त्ति य डेवेमि तं उवसमेणं ।
एसो मिच्छादुक्कड-पयक्खरत्थो समासेणं ॥ ११२ ॥

नामं ठवणातित्थं, दव्वं तित्थं च भावतित्थं च ।
इक्किक्कं पि य इत्तो, णेगविहं होइ नायव्वं ॥ ११३ ॥

दाहोवसमं तण्हाइ, छेयणं मलप्पवाहणं चेव ।
तिहिं अत्थेहिं निउत्तं, तम्हा तं दव्वओ तित्थं ॥ ११४ ॥

कोहम्मि उ निग्गहिए, दाहस्सुवसमणं हवइ तित्थं ।
लोहम्मि उ निग्गहिए, तण्हाए छेयणं होई ॥ ११५ ॥

अट्ठविहं कम्मरयं, बहुभवेहिं उ संचियं जम्हा ।
तवसंजमेण धोवइ, तम्हा तं भावओ तित्थं ॥ ११६ ॥

दंसणनाणचरित्ते, सुनिउत्तं जिणवरेहिं सव्वेहिं ।
एएण होइ तित्थं, एसो अण्णो वि पज्जाओ ॥ ११७ ॥

सव्वो पुव्वकयाणं, कम्माणं पावए फलविवागं ।
अवराहेसु गुणेसु अ, निमित्तमित्तं परो होइ ॥ ११८ ॥

धारिज्जइ इंतो जल-निही वि कल्लोलभिण्णकुलसेलो ।
न हु अण्णजम्मनिम्मिय, सुहासुहो कम्मपरिणामो ॥ ११९ ॥

अकयं को परिभुंजइ, सकयं नासिज्ज कस्स किर कम्मं ? ।
सकयमणुभुंजमाणो, कीस जणो दुम्मणो होई ! ॥ १२० ॥

पोसेइ सुह भावे, असुहाइं खवेइ नत्थि संदेहो ।
छिंदइ नरयतिरियगइ, पोसहविहिअप्पमत्तो य ॥ १२१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वरगंधपुप्फअक्खय-पईवफलधूवनीरपत्तेहिं ।
नेविज्जविहाणेण य, जिणपूजा अट्ठहा भणिया ॥ १२२ ॥

उवसमइ दुरियवग्गं, हरइ दुहं कुणइ सयलसुक्खाइं ।
चिंताईयं पि फलं, साहइ पूआ जिणिंदाणं ॥ १२३ ॥

धण्णाणं विहिजोगो, विहिपक्खाराहगा सया धण्णा ।
विहिबहुमाणा धण्णा, विहिपक्ख अदूसगा धण्णा ॥ १२४ ॥

संवेगमणो संबोह-सत्तरिं जो पढेइ भव्वजीवो ।
सिरिजयसेहरठाणं, सो लहइ नत्थि संदेहो ॥ १२५ ॥

श्रीमन्नागपुरीयाहव-तपोगणकजारुणाः ।
ज्ञानपीयूषपूर्णाङ्गाः, सूरीन्द्रा जयशेकराः ॥ प्र. १ ॥

तेषां पत्कजमधुपा,सूरयो रत्नशेखराः ।
सारसूत्रात् समुद्धृत्य, चक्रुः संबोधसप्ततिम् ॥ प्र. २ ॥

पू. आ. श्री अभयदेवसूरी कृत

## ॥ आगम अष्टोत्तरी ॥

सुविशाललोयणदलं विशुद्धदंतं सुकेसरालीढं ।
अहरुट्ठपत्तछवियं भवियभमरालिसुजिग्घंतं ॥ १ ॥

जस परिमल पल्लवियं सुबोहियं नाणभाणु किरणेहिं ।
मह दिसउ वंछियत्थं मुहपउमं वद्धमाणस्स ॥ २ ॥

सिरिवद्धमाणसामी समत्त गणि पिडग धारिणाझेय ।
इकारस्स गणधारा नाम गहणे णमंसामि ॥ ३ ॥

सिरिवद्धमाण पट्टे गोयम सामी य पढमपट्टधरो ।
तप्पट्टे सोहम्मो परंपरा तित्थभाविल्लो ॥ ४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अज्जत्ता जे समणा ते सव्वे अज्जसुहमसीसाओ।
भाव परंपर तित्थं वट्टइ सव्वं पि तम्हाओ ॥ ५ ॥

सुत्तत्थ करणओ खलु परंपराभावओ विआणिज्जा।
सिरि जंबूसामि सिस्सा आगमगंथाओ गहियव्वा ॥ ६ ॥

आगमं आयरंतेण अत्तणो हिअकंखिणा।
तित्थनाहो गुरु धम्मो सव्वे ते बहु मण्णिआ ॥ ७ ॥

रण्णो तण-घर-करणं सचित्तकम्मं च गाम सामिस्स।
दुहं पि दंडकरणं विवरीय तेण उवणयओ ॥ ८ ॥

आगमभट्ठो मुणिवर भूमिभट्ठो गयंदवर राया।
धणभट्ठो ववहारी न लहंति कवड्डिया मुल्लं ॥ ९ ॥

लोयाणं एस ठिई अज्जय पज्जय गया य मज्जाया।
दव्वपरंपर ठवणा कुलक्कमं नेव मिल्हिस्सं ॥ १० ॥

मूढाणं एस ठिइ चुक्कंति जिणुत्तवयणमग्गाओ।
हारंति बोहिलाभं आयहियं नेव जाणंति ॥ ११ ॥

दव्वपरंपर वंसो संजमचुक्काणं सव्वजीवाणं।
भावपरंपर धम्मो जिणंद-आणाओ सुपसिद्धो ॥ १२ ॥

दव्वपरंपर पज्जोअणेण दुग्गो सिणेहरायेणं।
कोसंबीइ मिगासुअ-वयणछलणाइ कारविओ ॥ १३ ॥

देवड्ढि खमासमणजा परंपरा भावओ वि आणेमि।
सिढिलायारे ठविया दव्वेण परंपरा बहुआ ॥ १४ ॥

वेस करंड तुल्लेहिं सोवागकरंडसमाणेहिं।
दव्वपरंपर गहिआ निय निय गच्छाणुराएणं ॥ १५ ॥

जं जीयमसोहिकरं पासत्थपमत्तसंजयाइणं।
बहुएहि वि आयरियं न तेण जीएण ववहारो ॥ १६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राय करंडर गिहीवइ करंड तुल्लेहिं जाय सुग्गहिया ।
भावपरंपर सुद्धा सोहम्माओ वि जिणआणा ॥ १७ ॥

संघयणबुद्धियबलं तुच्छं नाऊण सुविहिय जणाणं ।
गीयत्थेहिं चिण्णा तवाइकालेसु आयरणा ॥ १८ ॥

जं जीयं सोहीकरं संविग्गपरायणेण दंतेणं ।
इक्केण वि य आयरियं तेणइ जीएण ववहारो ॥ १९ ॥

असढेण समाइण्णं जं कत्थइ केणइ असावज्जं ।
न निवारियमण्णेहिं बहुगुणमणुमेअ आयरियं ॥ २० ॥

आवस्सयाइ करणं इच्छामिच्छाइ दस विहायरणं ।
चिइवंदणपडिलेहणं संवच्छरपव्वपव्वतिहि ॥ २१ ॥

उदयतिविहणं ठवणाविणयाइ सुसाहु माणणा दाणं ।
इत्थ वि किं आयरणा बल बुद्धि काविहावेइ ॥ २२ ॥

अणुओगदार सुत्ते लोगुत्तरवस्सयं जिणवरेहिं ।
आणाए अणुचिण्णं मुक्खफलं होइ भव्वाणं ॥ २३ ॥

आणाए अणुचिण्णावस्सयकालम्मि समणसंघेहिं ।
लोउत्तरीया ठविआ परंपरा वियरागेहिं ॥ २४ ॥

जं किंचि अणुट्ठाणं जिणेंद आणाए बहुफलं होइ ।
जह वडतरुव्व बीयं वित्थारं लहइ वुड्ढंते ॥ २५ ॥

केण विरण्णा रंको भज्जा वयणेण कारिओ धणवं ।
सोवि य तस्सुत्तिभत्तो पहाण पुरिसो कओ जत्ति ॥ २६ ॥

तस्स वि सव्वं भालिय राया साहेइ सव्वदेसाय ।
अंतेउर रंगिल्लो आणाभंगं न याणेइ ॥ २७ ॥

कुसलेण घरं पत्तो राया जाणेइ तस्स चरियाइ ।
सुविडंबीऊण सहसा खंडाखंडि कओ सिग्घं ॥ २८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राया तह जिण देवो जह दमगो तहय होइ आयरिओ ।
सुद्धंत समं आणा अणंतसोच्छेणं लहइ ॥ २९ ॥

थोवंपि अणुट्ठाणं, आणपहाणं करेइ पावभरं ।
लहुओ रवि कर पसरो, दहदिसि तिमिर पणासेइ ॥ ३० ॥

अरिहं विणा न देवो जेसिं चित्ते विणिच्छिओ होइ ।
तव्वयण करण चरणा सुसाहुणो तेसिं मह गुरुणो ॥ ३१ ॥

गुरुवएसो धम्मो विसुद्धसिद्धंतभासिओ होइ ।
पवयण तहत्ति करणं समत्तं बिंति जगगुरुणो ॥ ३२ ॥

जो पूइज्जइ देवो तव्वयणं जे नरा विराहंति ।
हारंति बोहिलाभं कुदिट्ठिराएण अण्णाणी ॥ ३३ ॥

पूआ पच्चक्खाणं पोसह उववास दाण सीलाइ ।
सव्वं पि अणुट्ठाणं निरत्थयं कणय कुसुमव्व ॥ ३४ ॥

जेसिं न आण बुद्धि विज्जा विण्णाण चौरीमाण सुद्धी ।
तो गो-मिअ-रुख-पत्थर-खर-तिण-सुणाइ सारिच्छं ॥ ३५ ॥

भक्खे सुक्कतणाइ दुद्धं अपेमि अमयसारिच्छं ।
छगणाओ भूमिसुद्धिलिंपणपयणाइ कज्जेसु ॥ ३६ ॥

पासवणं पावहरं बालाणं पुट्ठिरोगहरणं च ।
मह उज्जाओ दव्वा पित्तविकाराओ रोयणयं ॥ ३७ ॥

आहोडम मुहाइ लहंति तिति मुएवि मंसाओ ।
चम्माओ पायरक्खा जलभायणयाइ जायंति ॥ ३८ ॥

देवा वसंति पुच्छ विप्पाणं भूमि भाग सुरहिओ ।
उवमिज्जंतो एसिं कइ कुसलो किं न लज्जेसि ॥ ३९ ॥

जाण मोगीय गुणा मरणं अप्पेसु कण रसिआय ।
अइसिंगीओ वा दंता भिक्खं पावंति जोइंदा ॥ ४० ॥



For Private And Personal Use Only

महं चम्माओ सिज्जा पुण पुत्थिय कणय कुंदणा करणं ।
महनामेण मयंको मियच्छि नयणाण उवमाणं ॥ ४१ ॥

पढम पहरम्मि दक्खिणं सउणा मणंति पंडिया विसया ।
उवमिज्जंतो एसिं कइ कुसलो किं न लज्जेसि ॥ ४२ ॥

मत्तंड चंड दिधीइ ताव तावेण खिण्णखिण्णाणं ।
फेडेमो पंथसमं पहियाणं पंथखिण्णाणं ॥ ४३ ॥

अप्पे चारु फलाइं गिहाइं कज्जेसु पोयनावाए ।
वीणा मुयंग वंसुलि पढह ढुलाइ तोरणया ॥ ४४ ॥

रयहरणहत्थदंडा पडिगहमाइणि कज्जसाहुणं ।
झाडो वि कप्परुक्खो वणस्सइ सव्वाउ झाडनामाओ ॥ ४५ ॥

वत्थासण घुसिण चंदण चेइ कज्जेसु रोगहरणेसु ।
ओसहिं पमुहाइणं किं बहु वण्णेमि अप्पणया ॥ ४६ ॥

मत्तो जिणहरपडिमा घरहट्टविमाणधामदुग्गाइ ।
पारस पत्थर पासा लोहो विय कंचणो होइ ॥ ४७ ॥

चिंतिज्जं तं पुरइ चिंतामणी किं न हुज्ज पत्थरयं ।
जाइरयणेहिं ठवियं कुत्तियावणय संबंधं ॥ ४८ ॥

तुट्ठो हरइ मि रोरं रुट्ठो मारेमि देवसंकलिओ ।
उवमिज्जंतो एसिं कइकुसलो किं न लज्जेसि ॥ ४९ ॥

दिण्णं वहेमि भारं सीउ उण्णं सहमि सव्वया कालं ।
संतोसे चिट्ठामि लज्जं कारेमि आरुहणं ॥ ५० ॥

लंघिज्जंति न सीमं समुत्तिसवणाओ सुवंसनरवइणो ।
जाणे पहरपमाणं गमणागमणेव सुहमसुहं ॥ ५१ ॥

मेहुणसण्णारुढे पासंति ममंगमागमविहिण्णु ।
तेसिं मणवंच्छियत्थं साहेमि सव्वकालेणं ॥ ५२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जे रंक ढिंक पमुहा गिहाणि छायंति कुणइ जीवत्तं ।
भक्खंताण पसूणं पुट्ठि दुद्धं च अप्पेमि ॥ ५३ ॥

संगामे रोसिल्ला न हणंति तिणं मुहम्मिलिताणं ।
जायंति अ निगंथा सिज्जा दंताइ सुद्धिकए ॥ ५४ ॥

दब्भतिणेणं विप्पा पवित्तकरणाइ वेयपाठेणं ।
उवमिज्जंतो एसिं कइ कुसलो किं न लज्जेसि ॥ ५५ ॥

साहसिअं बहुलद्धं भक्खे लद्धे करेमि संतोसं ।
सुहदीह निंदजागर सउज्जमं सुरि मा जुत्तं ॥ ५६ ॥

सामी भत्त कयण्णुं वाडि रक्खे रएमि मेहुणयं ।
एहि समं तुलंतो सुपंडिय किं न लज्जेसि ॥ ५७ ॥

निय निय गुण माहप्पं कहिओ लज्जाविओय कविराओ ।
आगमभट्ठायारा लहरि संखुव्व विण्णेया ॥ ५८ ॥

वंझापुत्त समाणा भूमि सिलंधुव्व गयणमुट्ठिव्व ।
अंधग्गे वरतरुणी हावभावाइ सारिच्छं ॥ ५९ ॥

बहिराण कणजावो वीणाए वायणं जहा लोए ।
तह आणा परिभट्ठं नडुव्व सविडंबगभरणं ॥ ६० ॥

आणाभट्ठं चरणं वेसादासीण णेहतुल्लं ।
किंवागफलमसारं तत्ताय सीसाइअं नीरं ॥ ६१ ॥

गयभुत्तकविट्ठफलं पयंगरंगुव्व तहया मिग्गतण्हा ।
विणयविहुणं रुवं संझारागुव्व विज्जुलयं ॥ ६२ ॥

नयणविहीणं सुमुहं रसोइआ लवणभावबाहिरिया ।
निइविणा किं रज्जं पिम्मं विणा ण परबंधो ॥ ६३ ॥

लच्छि विणा ण सुक्खं सोआर-विवज्जिअं च वक्खाणं ।
पुत्तं विणा ण वंसो तह आणविवज्जियो धम्मो ॥ ६४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इक्कडय सुण्णरहिओ दसगुणिओ तहइ कोडिमाहप्पं ।
तव्विरहे किं सण्णा लहेइ संखाइ सह मिल्लं ॥ ६५ ॥

इक्कं जिणेंदआणा सुण्णोवमिआइ आणरहियाइं ।
वयदाणसीलनाणं न लहइ इक्कं पि तंबडयं ॥ ६६ ॥

जो कोइ आणारहिओ पूआपमुहं करेइ तिक्कालं ।
तस्स वि सव्वमसुद्धं आणा बज्जं अणुट्ठाणं ॥ ६७ ॥

जह कोइ मिस्सदिट्ठी उभओ कालं करेइ सज्झायं ।
नालियर दिव मणुआ अण्णे राउण्ण दोसत्तं ॥ ६८ ॥

ते डमरुव्व मणि तुल्ला घंटालालुव्वककच किंतणया ।
कुक्करचम्मरसिलो सायं न लहेइ गुसिणस्स ॥ ६९ ॥

दंसणमूलो धम्मो उवइट्ठो जिणवरेहिं सीसाणं ।
तं सोऊण सकण्णे दंसणहीणो न वंदिव्वो ॥ ७० ॥

समत्तरयणभट्ठा जाणंत्ता बहुविहा वि सत्थाइ ।
सुद्धाराहणरहिआ भमंति तत्थेव तत्थेव ॥ ७१ ॥

जे दंसणेण भट्ठा नाणे भट्ठा चरित्त भट्ठा जे ।
ए ए भट्ठ वि भट्ठा सेसं पि जणं विणासंति ॥ ७२ ॥

जे केवि धम्मसीला संजमतवनियमजोगजुत्ता य ।
ताणं दोस भणंता भट्ठा भट्ठत्तणं बिंति ॥ ७३ ॥

जह मूलम्मि विणट्ठे दुमस्स परिवार नत्थि परिवुड्ढी ।
तह जिणदंसणभट्ठा मूलविणट्ठा ण सिझंति ॥ ७४ ॥

जह मूलाउ खंधो साहा परिवार बहुगुणो होइ ।
तह जिणदंसणमूलो निद्दिट्ठो मोक्खमग्गस्स ॥ ७५ ॥

लद्धूण य मणुयत्तं सहियं तह उत्तमेण गुत्तेणं ।
लद्धूण य समत्तं अक्खयसुक्खं च मुक्खं च ॥ ७६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिणवयणं ओसहमिणं विसयसुहविरेअणं आणभिभूयं ।
जरमरणवाहिहरणं खयकरणं सव्वदुक्खाणं ॥ ७७ ॥

जिणवयणमोसहेणं कंखा वाहि न फिट्टए जेसिं ।
अमियं विसुव्व तिसिं अणंतसो लहइ मरणाइ ॥ ७८ ॥

समयायारभट्ठाणं जाणंता लज्जगारवभएणं ।
तेसिं पि नत्थि बोहिं पावं अणुमोअमाणाणं ॥ ७९ ॥

गच्छाचारं दुविहं तिसु वि जोएसु संजमो ठावि ।
णाणम्मि करणसुद्धे अभिक्खणं दंसणं होइ ॥ ८० ॥

जीवाइसद्दहणं समत्तं जिणवरेहिं पण्णत्तं ।
ववहारनिच्छएणं जाणंतो लहइ समत्तं ॥ ८१ ॥

जिणपण्णत्तं धम्मं सद्दहमाणस्स होइ रयणमिणं ।
सारं गुणरयणाणय सोवाणं पढममोक्खस्स ॥ ८२ ॥

दंसणणाणचरित्ते तवनियमे विणय खंति गुणइल्ला ।
एएवि वंदणीया जे गुणवाइ गणधराणं ॥ ८३ ॥

आणाजुत्तं संघं दट्ठुं जो मण्णए ण मच्छरिओ ।
सो संजमपडिवण्णो मिच्छादिट्ठि मुणेयव्वो ॥ ८४ ॥

अमराण वंदियाणं रूवं दट्ठुण जेसि मणतावो ।
सो संतावो तेसिं भवे भवे होज्जणंतगुणो ॥ ८५ ॥

आगममायरणाणं सच्चुवएसे कहा सुरसिआणं ।
जे गारवं करंते सम्मत्तविवज्जिआ हुंति ॥ ८६ ॥

नाणेणं दंसणेण य तवेण संवरेण संजमगुणेण ।
चउण्हं पि समाओगे मुक्खोहिं जिणेहिं पण्णत्तो ॥ ८७ ॥

नइ देहं वंदिज्जइ न जाइ-कुल-रुव-वण्णरुवं च ।
गुणहीणं को वंदे समणं वा सावयं वावि ॥ ८८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णाणं नरस्स सारं सारं णाणस्स सुद्धसमत्तं ।
सम्मत्तसारचरणं सारं चरणस्स निव्वाणं ॥ ८९ ॥

दाणं वसणं लिद्धं सीलं रंकुव्व पालणं अहलं ।
जरदाहुव्व तवाइ झाणं दुक्खे नीयाणं च ॥ ९० ॥

कुग्गहगहगहिआणं सुतित्थजत्ता य चित्तभमणुव्व ।
भमणुव्व भावणाओ दंसणभट्ठेण जाणेण ॥ ९१ ॥

चंदणपवणपणुल्लिय परिमल रसिआ वरेवि चंदणया ।
चंपक कुसुम सुगंधिया तिल्लाओ होइ चंपिल्लो ॥ ९२ ॥

साइज्जलं सुइसप्पे पडियं मुत्ताहलं च हालहलं ।
सप्पमुहेवरघुसिणं कंदलिदलमज्जसंपत्तं ॥ ९३ ॥

चंदणलट्ठभुअंगा विसं न मिल्लंति तस्स किं दोसा ।
इत्थुगे किं चंदं खार ते नेव मिलहेइ ॥ ९४ ॥

मियमदगंधे लसणं न चाइयइ विअप्पणो गंधं ।
रविकरपसरंतेहिं अंधत्तं होइ उल्लुआणं ॥ ९५ ॥

एगूअर समुपण्णा सहजाया अ सह वट्टिअ सरीरा ।
न वि हुंति य समसीला कक्कंढू कंटसमतुल्ला ॥ ९६ ॥

एवं परोवयारो साहु असाहूण संगमारुढो ।
सेवासंगाइफलं कुपत्तपताणुसारेण ॥ ९७ ॥

किं कारमणि निउत्तो वेरूलियो किं हवेइ कारयमणा ।
कसवट्टएहिं घसियं किं कणयं होइ मसिवण्णं ॥ ९८ ॥

लभइ विमाणवासो लभइ लीलाय वत्तिया लच्छी ।
इह आहरियं न लभइ दुल्लहरयणुव्व समत्तं ॥ ९९ ॥

संजमरहियं लिंगं दंसणभट्ठं न संजमं भणियं ।
आणाहिणं धम्मं निरत्थयं होइ सव्वं पि ॥ १०० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिणवयणं अलहंता जीवा पावंति तिक्खदुक्खाइं ।
लहिऊणं संपमत्ता ताणं चिय घोरसंसारे ॥ १०१ ॥

गयपारे संसारे आणानिहीणा अणंतसो कालं ।
न लहंति बोहिलाभं लहिऊणं केवि हारंति ॥ १०२ ॥

किव्वतणेण कोइ दोसे पयडेइ साहुसंघाणं ।
जंपइं अवण्णवायं संगं न करे सुसाहुणं ॥ १०३ ॥

दुट्ठा सुसाहु निंदा इह परलोए वी दुट्ठदारिद्दा ।
पइजम्मं विग्घकरि सुपक्खा चायेण दट्ठव्वा ॥ १०४ ॥

दुट्ठत्तणेण पिसुणत्तणेण दुव्वियड्ढकोहबहुलेण ।
हारंति बोहिलाभं कीडपयंगा य जायंति ॥ १०५ ॥

पिट्ठिमंसे रसिआ जलसप्पिणीपमुहारुहिरसोसाय ।
वालय मिज्झा किमिआ जायंति अ दुब्भि गंधिल्ला ॥ १०६ ॥

टूंट्य मुंगा अंधा दारिद्दा घोर दुक्खबाहुल्ला ।
सूला भिण्ण सरीरा साहु असाहूण निंदाए ॥ १०७ ॥

पर वंचणेण रत्ता परापवाएण अप्पसंसणया ।
ताणं कत्तो बोहि परमप्पाणया च बोलेइ ॥ १०८ ॥

ठाणअंगे भणियं पंचण्हमवण्णवायबहुलेण ।
दुल्लह बोहियभावं लहंति जीवा य णिच्चं पि ॥ १०९ ॥

एसिं सुवण्णवाए जीवा पावंति सुलहबोहित्तं ।
जह मगहाहिव कण्होइ एहिं लद्धं खू सम्मत्तं ॥ ११० ॥

धम्मा जयंतु वंतो ललिअंगकुसुमरुव्व लहइ बोहिफलं ।
बहुवितरवालिओ विहु भीमकुमारुव्व जायंति ॥ १११ ॥

धम्मिल्ल दामनणइया सत्तेण अगडदत्तनरवइणो ।
समया एव वदंतो मुणिवइ मेयारिउ जाण ॥ ११२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धण्णो वक्कलचीरी कुलिंगमज्जे वि लहइ समत्तं ।
धण्णो सुबुद्धिमंति धम्मायरियाओ पडिबुद्धो ॥ ११३ ॥

विहिअ विहिं च नयाणं बिंबं दिट्ठुं जिणंददेवाणं ।
सिद्धाणं संथवणं कायव्वं निउणबुद्धिए ॥ ११४ ॥

आगम अट्ठुत्तरिआ रइया सिरि अभयदेवसूरीहिं ।
पढिआ हरेइ पावं गुणिआ अप्पेइ बोहिफलं ॥ ११५ ॥

पू.आ.श्री जिनेश्वरसूरिविरचितम्

## ॥ प्रमालक्षणम् ॥

प्रमाणं स्वपराभासि ज्ञानं बाधाविवर्ज्जितम् ।
प्रत्यक्षं च परोक्षं च द्विधा मेयविनिश्चयात् ॥ १ ॥

अपरोपाधि विज्ञानं यदावरणसंक्षयात् ।
जीवस्वाभाव्यतः स्पष्टं निश्चयाध्यक्षमुच्यते ॥ २ ॥

प्रत्यक्षं योगिविज्ञानमवधिर्मनसो गमः ।
केवलं च त्रिधा प्रोक्तं योगिनां त्रिविधत्वतः ॥ ३ ॥

क्षयोपशम एकत्र दृष्टोऽन्यत्रापि किं न सः ।
क्षये ज्ञानावृत्तीनां च केवलं तत्र तन्न सः ॥ ४ ॥

क्षीणोपशान्तरूपाणां क्षयोप्यात्यन्तिको मतः ।
वह्न्यादेरिव कुत्रापि नायं सार्वत्रिको मतः ॥ ५ ॥

क्षीणावरणतः पुंसः ज्ञस्वभावस्य युगपत् ।
तस्याशेषार्थसंवित्तिं कः सकर्णो निवारयेत् ॥ ६ ॥

दशहस्तान्तरं व्योमेत्याद्यनवसरं ततः ।
इन्द्रियार्थोपभोगस्तु नानक्षेणाप्यदृष्टितः ॥ ७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पित्रोर्मोहनभावस्तु स्वोत्पत्तेः सुविनिश्चितः ।
तद्वन्नाह्लादसंवित्तिर्मातृभोगप्रसङ्गतः ॥ ८ ॥

नूनं स चक्षुषेत्यादिवचनमज्ञत्वसूचकम् ।
सर्व्ववित्त्वं न बुद्धादेस्तद्वचो बाधसङ्गतेः ॥ ९ ॥

स्वकृताभोगो विश्वस्य कर्तृत्वं क्षणनाशिता ।
तदुक्तं बाध्यते यस्मात्प्रत्यक्षादिभिराभवम् ॥ १० ॥

अचेतनत्वान्नित्यत्वात्प्रकृतेरकृतागमात् ।
जापहोमादिवैयर्थ्यान्नाभोगः स्वकृतस्य हि ॥ ११ ॥

नित्यत्वादतनुत्वाच्च निष्फलत्वादहेतुतः ।
जगत्स्थितेरवस्थानान्नेशो विश्वकृदस्ति वः ॥ १२ ॥

सत्त्वमर्थक्रिया नाशेऽनपेक्षा चिदगोचरा ।
परलोको विना जीवं सर्वज्ञो न वचः प्रमा ॥ १३ ॥

इत्थमावेदयन् बुद्धो युक्तिबाधितमञ्जसा ।
न सर्वज्ञो न चान्येपि परैरिष्टा जिनोस्तु सः ॥ १४ ॥

आश्रयासिद्धतादेर्वा प्रत्यक्षादेरसाधनात् ।
नास्ति सर्वविदित्युक्तं परतन्त्रानवबोधनात् ॥ १५ ॥

ग्राहिका शक्तिराकारो नानुमाता ततो जिनः ।
अतीतानागतावस्था नासत्योऽविषयः कथम् ॥ १६ ॥

चित्रास्तरणरूपादौ क्रमेण न च भासनम् ।
विरुद्धधर्मसङ्गेपि भवतामिव न क्षतिः ॥ १७ ॥

सातत्येनोपयोगेऽस्य न विकल्पस्य सम्भवः ।
छाद्मस्थिकाणां धर्माणां न चात्रायोजनं मतम् ॥ १८ ॥

विकल्पोप्यर्थसम्भूतेर्न भ्रान्तोऽकल्पज्ञानवत् ।
तस्यापि भ्रान्ततायोगे न प्रमाणव्यवस्थितिः ॥ १९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्थक्रियासमर्थेऽर्थे वृत्तिकृद्यत्तदर्थिनः ।
विशदज्ञानमध्यक्षमक्षजं व्यवहारतः ॥ २० ॥

स्वसाध्येनाविनाभावनिश्चये क्वापि निश्चितः ।
हेतुः परोक्षसंवित्तेरनुमानार्थमिष्यते ॥ २१ ॥

अयःशलाकाकल्पा हि भेदा एव हि केवलाः ।
अतद्रूपपरावृत्तिस्तुच्छा याप्यभिधीयते ॥ २२ ॥

नाविनाभावसम्बन्धः सोऽन्वयव्यतिरेकतः ।
न चानुयायिनो भेदा नानुमानमतोस्ति वः ॥ २३ ॥

एकत्वाध्यवसायस्य हेतवः केचिदेव हि ।
इन्द्रियादीव भेदेपि स्वभावात्तन्न सङ्गतम् ॥ २४ ॥

सर्वेषां स स्वभावोस्ति तेषामेकत्वमागतम् ।
स्वभावभेदो भेदस्य निमित्तं तत्र नास्ति सः ॥ २५ ॥

वस्तुरूपा च भिन्ना च नित्या व्यापितया स्थिता ।
नाविनाभावसम्बन्धो युक्तोऽत्राव्यतिरेकतः ॥ २६ ॥

व्यक्तिजन्मन्यजाता चेदागता नाश्रयान्तरात् ।
प्रागासीन्न च तद्देशे सा तया सङ्गता कथम् ॥ २७ ॥

व्यक्तिनाशेन चेन्नष्टा गता देशान्तरं न च ।
तच्छून्ये न स्थिता देशे सा जातिःक्वेति कथ्यताम् ॥ २८ ॥

उभानुभयपक्षस्तु विरोधादेव वारितः ।
कस्य केनाविनाभावो नानुमानमतस्तव ॥ २९ ॥

द्विःस्वभावास्ततो भेदाः समानेतररूपिणः ।
अन्वयो व्यतिरेको वा तन्निमित्तो न दुष्यति ॥ ३० ॥

पूर्वनाशेऽपरोत्पादे सादृश्याद् भ्रान्तचेतसः ।
एकत्वमभिमन्यन्ते क्षणिकत्वेपि वस्तुषु ॥ ३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कपालघटयोरैक्यं भ्रान्त्या मन्येत किं न वः ।
सारूप्यमस्य मानं तु वचनं व्याहतं न किम् ॥ ३२ ॥

तादृशस्याविनाभावं तादृशेनापि कुत्रचित् ।
अन्वयव्यतिरेकाभ्यां प्रत्यक्षानुपलम्भतः ॥ ३३ ॥

निश्चित्य सर्वदैवायमस्याभावे न जातुचित् ।
कुत्रापि सम्भवत्येवं किं न जायेत निश्चयः ॥ ३४ ॥

एष एव क्रमो ज्ञेयः सर्वेष्वपि च हेतुषु ।
विपर्ययेषु बाधापि कुत्रचित्सम्प्रदर्श्यते ॥ ३५ ॥

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमोऽदर्शनान्न न दर्शनात् ॥ ३६ ॥

अन्वयव्यतिरेकाभ्यां चेद्धेतुफलतागमः ।
तत एवाविनाभावनिश्चयोपि तथास्तु वः ॥ ३७ ॥

वृक्षाम्रयोस्तु तादात्म्यमन्वयव्यतिरेकतः ।
विपर्ययेऽथ बाधातोऽविनाभावस्तथा न किम् ॥ ३८ ॥

पक्षैकदेशता हेतोर्वैफल्यं साधनस्य वा ।
व्यावृत्तेर्वस्तुधर्मत्वे सा सत्यथ न साधनम् ॥ ३९ ॥

किञ्चैकज्ञानसंसर्गश्चक्षुषोऽन्यत्र नास्ति सः ।
कारणानुपलम्भादेर्व्यपदेशो न वार्यते ॥ ४० ॥

कार्यहेतोर्विरुद्धोपि न भिन्नस्तव कुत्रचित् ।
निषेधोपि विधिश्चैव वृथा भेदेन शासनम् ॥ ४१ ॥

संयोगस्याविशेषेण वह्निर्धूमं हि साधयेत् ।
समवायनिमित्तोपि नानवस्थाप्रसङ्गतः ॥ ४२ ॥

अविनाभाव एवैकः प्रमाणेन विनिश्चितः ।
निमित्तमनुमानस्य न हेतुफलतादयः ॥ ४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कार्यकारणयोर्भावः स्वभावानुपलम्भनम् ।
संयोगी समवायी च नामकर्म न वार्यते ॥ ४४ ॥

स्वसाध्येनाविनाभूतो न स्यात्साध्यं विना भवन् ।
वृक्षाभावे ततो नाम्रो न धूमोपि विनाग्निना ॥ ४५ ॥

यः स्वभावविशेषो हि विद्यमानः स्वचेतसः
निमित्तं तदसंवित्तेर्नास्त्यसाविति निश्चयः ॥ ४६ ॥

साध्यसाधनसम्बन्धं न क्षणः प्रतिपद्यते ।
प्रत्यक्षानुपलम्भाभ्यां तद्‌गतेस्तत्र नास्ति सः ॥ ४७ ॥

सामान्यविषयत्वेन निर्विकल्पान्न तद्‌गतिः ।
न चापरं परैरिष्टं क्षणभङ्गोऽप्रमाणकः ॥ ४८ ॥

सिद्धत्वे हेतुवैफल्यं नित्यत्वादेकरूपतः ।
असिद्धत्वेपि वैफल्यं न नित्यं साध्यतामियात् ॥ ४९ ॥

सम्बन्धनिश्चयाभावे नानुमानं प्रमेयवत् ।
जातिस्वलक्षणादीनां नास्त्यसाविति नानुमा ॥ ५० ॥

प्रत्यक्षनिःश्रिता स्मृतिः प्रमाणमर्थनिश्चयात् ।
साध्यसाधनसम्बन्धग्राहिकेवानुमावतः ॥ ५१ ॥

नियामकं विना वृत्तिर्न दृष्या नियता क्वचित् ।
व्योमवन्नियता वृत्तिः प्राणादीनां च लक्ष्यते ॥ ५२ ॥

उत्पादविगमौ न स्तः स्थित्यभावे खपुष्पवत् ।
दृश्येते तौ च भावेषु स्वभावेनेह केनचित् ॥ ५३ ॥

अभ्रेन्द्रधनुरादीनां विश्रसापरिणामतः ।
पुद्‌गलानां हि संयोगविभागौ न स्थितौ परम् ॥ ५४ ॥

यल्लक्षणो मतो हेतुः स्वार्थसंवित्तये परम् ।
वाचाभिधीयमानस्तु परार्थं सानुमोच्यते ॥ ५५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्वचिद्धेतुः क्वचिज्ज्ञातं क्वचित्पक्षोपि सम्मतः ।
पञ्चावयवयुक्तोपि दशधा वा क्वचिन्मतः ॥ ५६ ॥

वादे चैष विधिर्ज्ञेयो जल्पे च नियतो विधिः ।
वितण्डायां प्रयोगस्तु न पक्षप्रतिपक्षकृत् ॥ ५७ ॥

वादो जल्पो वितण्डा च कथास्तिस्र उदाहृताः ।
न्यायविद्भिरथैतासां लक्षणानि निबोधत ॥ ५८ ॥

समानलिङ्गिनां क्वापि मुमुक्षूणामविद्विषाम् ।
सन्देहापोहकृद्वादो जल्पस्त्वन्यत्र सम्मतः ॥ ५९ ॥

आगमोत्थानुमानं वा वस्तुनो बलभावि वा ।
आगमोऽध्यक्षमप्यत्र साधनं दूषणं तथा ॥ ६० ॥

साधनेऽभिहिते भ्रान्त्या साधनाभासतां वदेत् ।
अनुरूपानुमानाद्यैर्नोचेन्मन्येत तत्तथा ॥ ६१ ॥

अत एवात्र नो युक्ताः स्थेया दण्डधरादयः ।
छलजात्यादयो दूरं निग्रहोपि न कश्चन ॥ ६२ ॥

वाद एव भवेज्जल्पश्छलजात्यादयः परम् ।
अनुषज्यन्ते यथायोगं स्थेयदण्डधरादयः ॥ ६३ ॥

जल्पे चादौ विधातव्या व्यवस्था तु जयाजये ।
अभ्युप्येत्य कृते पक्षेऽन्यतमस्यैकवस्तुनि ॥ ६४ ॥

पक्षीकृतं यदेवास्य दोषस्तत्रैव चिन्त्यते ।
तन्मतेनानुषङ्गस्तु परस्याज्ञानतावहः ॥ ६५ ॥

परपक्षस्थितस्यास्य स्वमतेनानुषञ्जनम् ।
परस्याज्ञानदोषेण निग्रहस्थानमावहेत् ॥ ६६ ॥

पक्षान्तरगमोप्यत्र तथा प्रश्नोत्तरान्तरा ।
विक्षेपोऽननुवादश्च तथानूद्याप्यदूषणम् ॥ ६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लुब्धे द्विष्टे त्वमध्यस्थे स्थेयदण्डधरादिके ।
न जल्पः प्रतिपक्षे वा मारणाद्युद्यमस्थिते ॥ ६८ ॥

प्रतिज्ञाहेतुदृष्यन्तदूषणेऽभिहिते परैः ।
समर्थः साधयेत्तानि दोषाभासा इति ब्रुवन् ॥ ६९ ॥

छलादिना विपक्षस्य शक्तः कुर्यान्निराकृतिम् ।
इतरो वादिनः कुर्यात्स्वपक्षमुद्भावयन् ॥ ७० ॥

न स्थेयादिव्यवस्थेह वितण्डायां न निग्रहः ।
नावयवव्यवस्थापि छलादिस्तु न वार्यते ॥ ७१ ॥

न येष्वस्त्यविनाभावो हेत्वाभासास्त एव हि ।
सम्बन्धग्रहणायोग्यं ज्ञातमज्ञातमेव हि ॥ ७२ ॥

सत्त्वे चार्थक्रियाभावो न सिद्धोऽसिद्धता न किम् ।
सत्त्वं हेतुर्निराधारं साध्यं च साधनं न किम् ॥ ७३ ॥

प्रमाणलक्षणातीतं प्रमाणं भवतामदः ।
न साध्यसाधनं ज्ञातं न वादी न च दण्डभृत् ॥ ७४ ॥

प्रत्ययत्वादनालम्बः साधनं व्यभिचार्यदः
अभासनान्न बाह्योस्ति नैकान्तो न च सिद्धिभाक् ॥ ७५ ॥

अविनाभावसम्बन्धग्राहि मानं कुतो गतम् ।
क्षणिकोप्यर्थक्रियाकारी कुतो मानाद्विनिश्चितम् ॥ ७६ ॥

हेत्वन्तरानपेक्षा च विनाशे परवादिनाम् ।
न सिद्धा साधने हेतुः किं न साध्यसमो भवेत् ॥ ७७ ॥

चेतनावन्तमाश्रित्य कार्यकृद्यदचेतनः ।
अचेतनं तथाण्वादि सन्देहासिद्ध ईदृशः ॥ ७८ ॥

बुद्धिमत्पूर्वकं कार्यं घटादीव विनिश्चितम् ।
भूभूधरादिकार्यं च न सिद्धं परवादिनाम् ॥ ७९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वीन्द्रियग्राह्यमग्राह्यं बुद्धिमद्धेतुपूर्वकम् ।
आश्रयासिद्धता हेतोः बौद्धानभि न संशयः ॥ ८० ॥

एकान्तवादिपक्षोक्ता असिद्धाः सर्वहेतवः ।
विरुद्धा ज्ञातमप्येषां साध्यादिपरिवर्ज्जितम् ॥ ८१ ॥

नित्योयं कृतकत्वेन यथाकाशादिसम्मतम् ।
विरुद्धो हेतुराकाशे साधनं नास्ति तन्न सः ॥ ८२ ॥

बुद्धिमद्धेतुपूर्वं हि संस्थानं कुम्भगेहवत् ।
संस्थानं भूधरादीनां तस्मात्तद्बुद्धिपूर्वकम् ॥ ८३ ॥

संस्थानं यादृशं कुम्भे नास्ति तद्भूधरादिषु ।
भूधरादिगतं नैव तज्जन्यत्वेन निश्चितम् ॥ ८४ ॥

यादृशोऽभीष्यते कर्त्ता तादृक्कर्त्ता घटादिषु ।
न सिद्ध इष्टघाती च हेतुरेष न संशयः ॥ ८५ ॥

कालात्ययापदिष्टत्वं तथा सत्प्रतिपक्षता ।
साध्येन समता चैव साधनाभासमीदृशम् ॥ ८६ ॥

अतीतानागतौ कालौ स्मृतिकारविवर्ज्जितौ ।
कालत्वात्तद्यथा कालो वर्त्तमानो न किं भवेत् ॥ ८७ ॥

शब्दो नित्यः प्रमेयत्वादेष साधारणो मतः ।
श्रावणत्वादनित्योयमसाधारण ईदृशः ॥ ८८ ॥

चाक्षुषत्वादनित्योद्रिर्घटादिरिव निश्चितः ।
अनन्वयादनैकान्तो हेतुरेष न संशयः ॥ ८९ ॥

कृतकत्वादनित्योयं स्तम्भकुम्भादिवद्ध्वनिः ।
अदर्शितान्वयत्वेन हेतुरेष न साधकः ॥ ९० ॥

अनित्यत्वात्कृतकोऽयं विपरीतान्वय ईदृशः ।
प्रवक्तृत्वादसर्वज्ञः सन्दिग्धान्वय ईदृशः ॥ ९१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रागादिमानसर्वज्ञः सन्दिग्धोभय ईदृशः ।
प्रवक्तृत्वादसर्वज्ञः सन्दिग्धव्यतिरेकवान् ॥ ९२ ॥

यत्सत्तत् क्षणिकं ज्ञेयं यथा दीपशिखादयः
साध्येन विकलं ज्ञातं षट्क्षणस्थायिनो ह्यमी ॥ ९३ ॥

नित्यं नार्थक्रियाकारि वान्ध्येयादिवदिष्यताम् ।
हेतुशून्यमदो ज्ञातं वस्तुधर्मो हि नित्यता ॥ ९४ ॥

कृतकत्वादनित्योऽयमाकाशादिवदिष्यताम् ।
साध्यसाधनशून्यो हि दृष्यन्तोयमुदाहृतः ॥ ९५ ॥

रागादिमांश्च वक्तृत्वात् यथायं पुरुषोऽग्रतः ।
साध्यं सन्दिह्यते ज्ञाते ज्ञातमेतन्न तन्मतम् ॥ ९६ ॥

रागादिमान्न सर्वज्ञो यथायं पुरुषो मतः ।
सन्दिग्धं साधनं साध्यं ज्ञातमेतन्न तन्मतम् ॥ ९७ ॥

रागादिमान् जिनो ज्ञेयो वक्तृत्वात् गौतमादिवत् ।
सन्दिग्धासिद्धता हेतोर्ज्ञातं सन्दिग्धसाधनम् ॥ ९८ ॥

अविनाभावसंवित्तिः व्यतिरेकादियं मता ।
साध्याभावे निवर्त्तेत साधनं नियमादतः ॥ ९९ ॥

यन्नानित्यं न तत्कृतकं घटव्योमतडिच्छटाः ।
विपक्षे ज्ञातमुद्दिष्टं कृतकः शब्द इहोदितः ॥ १०० ॥

सर्वज्ञत्वादवक्तायं यथा बुद्धः शिशुर्भवः ।
वक्ता जिनेश्वरोभीष्टः सन्दिग्धव्यतिरेकिता ॥ १०१ ॥

प्रतिपाद्यानुरोधेन पक्षो वाच्यः स नेदृशः ।
शब्दो ह्यश्रावणः सत्त्वात्प्रत्यक्षेण निवारितः ॥ १०२ ॥

अनुमाननिरस्तोपि नानुमानं प्रमेति च ।
स्वप्रतीतिनिरस्तोपि न चन्द्रः शशलाञ्छनः ॥ १०३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोकप्रतीतिदुष्टोपि मनुष्याऽस्थि न दुष्यति ।
प्राण्यङ्गत्वाद्यथा शङ्खः शुक्तिका वा त्वयेष्यते ॥ १०४ ॥

माता वन्ध्या मदीयेति स्ववाक्येन निराकृतः ।
निग्रहस्थानमेतद्धि हेत्वाभासादि दर्शितम् ॥ १०५ ॥

प्रतिज्ञा ह्यग्निरत्रेति धूमाद्धेतुरुदाहृतः ।
यत्र धूमोस्ति तत्राग्निः क्वचिद्देशे यथा तव ॥ १०६ ॥

धूमश्चात्रोपनयनं निगमो वह्निरित्यतः ।
पञ्चानां शुद्धयो वाच्याः पक्षहेत्वादिदोषहाः ॥ १०७ ॥

पक्षोऽनिराकृतःकार्यो हेत्वाभासास्ततोऽपरे ।
दृष्टान्ते दूषणोक्तेश्च तच्छुद्धिः किं न कीर्तिता ॥ १०८ ॥

अधिकारोपसंहारः शास्त्रे यदि च सम्मतः ।
हेतोः कृतान्वयस्यैनं कथं नेच्छन्ति वादिनः ॥ १०९ ॥

क्षणिकत्वे यदा साध्ये विवादोऽवयवाश्रितः ।
निग्रहस्थानमासक्तं प्रमेयान्तरसङ्गतेः ॥ ११० ॥

किं दुरुपनीतं नैवैतत्पक्षधर्मत्वसिद्धितः ।
प्रमाणफलव्याजेन निगमनं किं न वो मतम् ॥ १११ ॥

प्रतिज्ञातार्थसंसिद्धिः शुद्धिर्निगमगोचरा ।
दशावयमेवं तु वाक्यमिच्छन्ति तद्विदः ॥ ११२ ॥

............................................

हेतुरेव क्वचिद्वाच्य इत्यादि गदितं पुरः ॥ ११३ ॥

शब्दादसन्निकृष्टयर्थप्रतिपत्तिः प्रमा परा ।
सर्वविद्वीतरागोक्तः सोपि तस्या निबन्धनम् ॥ ११४ ॥

दानादेरविनाभावः स्वर्गाद्यर्थेन केन वः ।
चक्षुरादिधियो वृत्तिर्नैवातीन्द्रियगोचरा ॥ ११५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नानुमाध्यक्षपूर्वत्वात् स्वातन्त्र्ये वा न च प्रमा
अन्योन्याश्रयोऽनवस्था तत्पूर्वा चेदसौ मता ॥ ११६ ॥

उपमादेरमानत्वान्नाभावो भावसाधकः ।
स्वर्गाद्यर्थं च दानादौ वृत्तिः किं स्वस्थचेतसः ॥ ११७ ॥

तत्रागमः प्रमाणं तु नापरं तस्य गोचरम् ।
सर्वविद्वीतरागस्य वचनं नापरोऽप्यसौ ॥ ११८ ॥

गणभृतो जिनेन्द्राणामानन्तर्यव्यवस्थिताः ।
तद्गीतवाचिमानत्वं तत्कृतं हि तथापि च ॥ ११९ ॥

छद्मस्थानां वचो मानं स्वातन्त्र्येण न युज्यते ।
अत एवादिसूत्रेषु ह्यनुवादविधिर्मतः ॥ १२० ॥

छद्मस्थानामनाभोगस्तादृशामपि सम्भवी ।
अत एवावधिज्ञाने गौतमः क्षमयत्यलम् ॥ १२१ ॥

यस्तु तत्रानभिज्ञोपि देशनां कुरुतेऽधमः ।
उत्सर्गादिगतां नूनं दीर्घसंसारको ह्यसौ ॥ १२२ ॥

देशं कालं बलं सूत्रमाश्रित्य गदितो विधिः ।
जिनानाशातयेत्पापस्तदुल्लङ्घनतामितः ॥ १२३ ॥

अत एवाधिकारित्वं यत्र सूत्रं न दर्शितम् ।
सर्वज्ञोक्तं न तत्सूत्रं व्यभिचारो न तत्कृतः ॥ १२४ ॥

निर्ग्रन्थता जिनैरुक्ता निमित्तं मोक्षशर्मणः ।
कुतः परिग्रहस्तस्यां तस्मिन् वा सा कथं ननु ॥ १२५ ॥

धर्मार्थं स न तां हन्ति हस्त्यश्वरथशालिनाम् ।
राजादीनां कथं सा न को विशेषोऽपरत्र वः ॥ १२६ ॥

कैषा निर्ग्रन्थता वीरैरुक्ता वस्त्राद्यभावतः ।
गवादीनां न सा केन कथं वा भवतामसौ ॥ १२७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आन्तरत्यागतः सैषा हन्त सा नास्ति केन नः ।
भावाभावौ समौ हन्त परोक्षत्वाद् द्वयोरपि ॥ १२८ ॥

वस्त्रादीनामभावे च जीवरक्षा कथञ्च वः ।
ग्लानस्य रोगिणोर्थायौषधाद्यानयनं कथम् ॥ १२९ ॥

निर्णीतसाहसा ह्यासन् जैनकल्पं समाश्रिताः ।
उज्झितं भक्तमादद्युरज्ञातेष्वेव गोचरः ॥ १३० ॥

नाग्निसेवां तथा कार्षुः पुस्तकादेर्न सङ्ग्रहम् ।
स्थाविरं कल्पमाश्रित्य परदीक्षाविधिर्मतः ॥ १३१ ॥

न चाल्पं बहु वा न स्यात् कुण्डिकादि न चापरम् ।
धर्मोपकारितां नैति वृथा शुष्काभिमानिता ॥ १३२ ॥

ततो विप्लव एवायं न सर्वज्ञस्य शासनम् ।
नन्वागमः स एवायं निश्चयस्तत्र केन वः ॥ १३३ ॥

प्रत्यक्षदृष्टसंवादादेशकालान्तरादिषु ।
सोयमित्यवसातव्यः किमिवात्र मुधा श्रमः ॥ १३४ ॥

सन्ति चानन्ददातारः सूरयो वीतकल्मषाः ।
अव्यवच्छिन्नसन्तानो यैरानीतोयमागमः ॥ १३५ ॥

वेदेपि तुल्यतामेति वितथानयने विधिः ।
तापादिशुद्धयो ह्युक्ताः सार्वेण निजभाषिते ॥ १३६ ॥

बालाङ्गनादिसिद्धेपि शब्दार्थस्यावधारणे ।
कुधियो नाभिमन्यन्ते केन शब्दस्य मानता ॥ १३७ ॥

वाच्यवाचकभावस्तु सम्बन्धोऽत्र परिस्फुटः ।
लिखितादर्थसंवित्तिर्न स्यादुच्छन्नकर्तृकात् ॥ १३८ ॥

नित्योपयोगतः शास्ता विकल्पातीत इष्यते ।
विवक्षाजन्यता तन्न तच्छब्दस्योपपद्यते ॥ १३९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घटादिरूपताया तु मुखभङ्गादिसम्भवः ।
नैव चानुपलम्भोपि विधेरपि च साधनात् ॥ १४० ॥

न चैकज्ञानसंसर्गस्तस्य केन चिदस्ति वः ।
निश्चितो न विरोधोपि प्रत्यक्षानुपलम्भतः ॥ १४१ ॥

कारणानुपलम्भोपि व्यापकानुपलम्भनम् ।
न शब्दो विधिरूपेण ततोऽर्थप्रतिपत्तितः ॥ १४२ ॥

मरीचिकाजलज्ञानं भ्रान्तं सर्वमपीदृशम् ।
हेत्वाभासजविज्ञानं भ्रान्तं सर्व्वं तु तादृशम् ॥ १४३ ॥

एकत्र दृष्टसंवादमक्षजाद्यविगानतः ।
प्रमाणमेवमत्रापि साध्यः संवाद एव हि ॥ १४४ ॥

सूर्योपरागमुष्ट्यादौ दृष्टसंवाद एकदा ।
सर्वत्राप्यविगानेन प्रामाण्यं प्रतिपद्यते ॥ १४५ ॥

अखिलातीन्द्रियज्ञानः पुरस्तादुपपादितः ।
आयातोऽच्छिन्नसन्तानः तत्प्रणीतोऽयमागमः ॥ १४६ ॥

संवादादुत्तरं ज्ञानं कमर्थं पोषयिष्यति ।
सर्वज्ञः केन वोऽभीष्टस्तद्वचश्चेन्न ते प्रमा ॥ १४७ ॥

वैभाषिकादिना सार्द्धं विवादोप्यागमाश्रितः ।
तस्याप्रमाणतायां तु न युक्तः किं मुधा श्रमः ॥ १४८ ॥

द्वयं प्रतीत्यविज्ञानं तायिना कथितं कथम् ।
वैभाषिकैः समाख्याते योगाचारैः किमुच्यते ॥ १४९ ॥

उच्छेददृष्टिनाशाय नैवं शास्त्रा प्रकाशितम् ।
अन्यथा शून्यतासूत्रे कथं नीयेत देशना ॥ १५० ॥

वचसां प्रतिबन्धो वा को बाह्येष्वस्ति वस्तुषु ।
वाच्यवाचकभावोऽयं सम्बन्धोत्र परिस्फुटः ॥ १५१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यभिचारस्तथाध्यक्षे दृष्टस्तन्मानमस्तु किम् ।
तादात्म्यं नैव चार्थेन युज्यतेऽध्यक्षचेतसः ॥ १५२ ॥

ज्ञानस्य जननायोगादर्थस्य ज्ञानताप्तितः ।
विरुद्धधर्मयोगे च भेद एवानुषज्यते ॥ १५३ ॥

ज्ञानस्य जडतायोगे जगदन्धं प्रसज्यते ।
घटयन्नहि पटे, ज्ञप्तिरनवस्थापि किं न वः ॥ १५४ ॥

पूर्वापरविवेकेन वर्त्तमानक्षणं मनः ।
सत्यं संवेदनात्सिद्धं सन्ततिस्तु कथं नु वः ॥ १५५ ॥

संवित्त्या सिद्ध्यतां कल्पः सोऽनेकाक्षरसङ्गतः ।
एकस्यानेकता नेति घटनेह कथं नु वः ॥ १५६ ॥

परसंविन्न संवित्त्या सिध्यतीति कथं नु सा ।
सन्तानान्तरसिद्धिर्वः केन केन विवादिता ॥ १५७ ॥

तदुत्पत्तिस्ततोऽन्यस्मान्नातः पूर्वमसत्त्वतः ।
सत्ताकाले च नोत्पत्तिर्नान्यतो विषयत्वतः ॥ १५८ ॥

तदाकारतयोत्पत्तिः सर्वथा जडता न किम् ।
एकदेशो निरंशस्य नेति व्यालूनमीदृशम् ॥ १५९ ॥

अर्थाभावे भवेच्चेतः कथं स्यात्तन्निमित्तकम् ।
शक्तिभेदोपि भावेषु देशकालादितो भवेत् ॥ १६० ॥

रूपादिचेतसोऽवश्यमर्थसम्बन्ध इष्यते ।
शब्देप्येवमनिष्टो वा निमित्तमभिधीयताम् ॥ १६१ ॥

अर्थं विनापि शब्दस्य जायमानस्य दर्शनात् ।
व्यभिचारनिमित्तस्य प्रामाण्यं किं मुधा ननु ॥ १६२ ॥

मरीचिकादिविज्ञानविवेकादन्यचेतसः ।
सम्बन्धोभ्युपगन्तव्यो न प्रमाणमदोऽन्यथा ॥ १६३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनुमानं च तत्पूर्वं तद्विना न प्रवर्त्तते ।
अन्योन्याश्रयदोषोपि स्वातन्त्र्ये वाऽनवस्थितिः ॥ १६४ ॥

अथ स्वलक्षणं जातिस्तद्योगो जातिमांस्तथा ।
बुद्ध्याकारो न शब्दार्थो घटामञ्चति तत्त्वतः ॥ १६५ ॥

उच्यते शब्दतो नार्थप्रतिपत्तिरभविष्यत् ।
यदि तस्यार्थसम्बन्धो न कश्चिदपि विद्यते ॥ १६६ ॥

भ्रान्तं यद्यनुमानं च प्रमाणं किं मुधा श्रमः ।
सारूप्यादर्थसंवादि प्रत्यक्षं च त्वयेष्यते ॥ १६७ ॥

स्वलक्षणाद्यभावेन वाच्यं किं वा व्यवस्थितम् ।
अन्यथा व्यर्थमेवेदं सर्वमारटितं त्वया ॥ १६८ ॥

देशकालस्वभावानां भेदो वस्तुषु भेदकः ।
एकमुत्सृज्य शेषासु व्यावृत्तेः किं न गोचरः ॥ १६९ ॥

व्यावृत्तेस्तु स्वरूपत्वादतुच्छा जातिरेव सा ।
व्यावृत्तोपि च नान्वेति वाच्यं वाच्यं त्वयापि नः ॥ १७० ॥

एकप्रत्यवमर्षस्य हेतवः केचिदेव हि ।
भेदेपि नियताश्चैव स्वभावेनेन्द्रियादिवत् ॥ १७१ ॥

स्वभावो न च भावानां प्रेरणाविषयः क्वचित् ।
अग्निर्दहति नाकाशं कोऽत्र पर्यनुयुज्यते ॥ १७२ ॥

भिन्नं चानुगतं चैव गवादिभ्योऽभिजायते ।
ज्ञानं द्विधापि तेनायं व्यवहारः प्रवर्त्तते ॥ १७३ ॥

किं येनैव स्वरूपेण भावो व्यावृत्तचेतसः ।
जनको ह्यन्वयिनोपि तेनैवाथ परेण वा ॥ १७४ ॥

ज्ञानस्यैकत्वमापन्नं कारणाभेदतोऽथवा ।
भाव एव द्विधा प्राप्तो विरुद्धाध्यासयोगतः ॥ १७५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वरूपग्रहणे साऽस्तु तां विना न च तद्ग्रहः ।
अन्योन्याश्रयदोषोऽयं कथं वो नानुषज्यते ॥ १७६ ॥

स्वस्वभावस्थिता भावा गृह्यन्ते च स्वरूपतः ।
अन्यथा वृत्तिरन्योन्या नेतरेतरदूषणम् ॥ १७७ ॥

सन्तु भावाः स्वभावस्थाः कुम्भः कुम्भान्तरेण तु ।
भिन्नरूपोपि तुल्योपि विरूपोपि पटादिभिः ॥ १७८ ॥

द्विस्वभावास्ततो भावाः समानेतररूपिणः
समानेतररूपस्य चेतसो विषयत्वतः ॥ १७९ ॥

एकस्यानेकरूपत्वं कीर्त्तिनैव समर्थितम् ।
कुलालवार्तिके कल्पो भेदवान् घटना कथम् ॥ १८० ॥

रक्ते च भाग एकस्मिन्सर्वं रज्येत रक्तवत् ।
इत्यादि गदितं मोहाद्वस्तुरूपमजानता ॥ १८१ ॥

किं येनैव स्वरूपेण परमाणुरपरं प्रति ।
आभिमुख्यं भजेतासौ तेनैवान्यस्य तत्र तु ॥ १८२ ॥

एकदिग्भागिताणूनां न समुच्चयरूपता ।
यद्यन्येन स्वभावस्य भेदाद् भेदोऽनुषज्यते ॥ १८३ ॥

इत्यादि गदितं सर्वमसम्बद्धं न केन वः ।
एकस्यानेकरूपत्वं यत्त्वयैव समर्थितम् ॥ १८४ ॥

उच्छेददृष्टिनाशाय घटनामनुधावता ।
न चित्रप्रतिभासोऽपि नानात्वे संविदां ननु ॥ १८५ ॥

तत्रैकाल्यपरीक्षार्थं मुधैवारटितं त्वया ।
स्याद्वादसिद्धिभङ्गोऽपि तवोन्मादानुमापकः ॥ १८६ ॥

आश्रयासिद्धता हेतोःस्वतन्त्रे साधने मते ।
अनैकान्तिकता हेतोः प्रसङ्गेऽप्यभिधित्सिते ॥ १८७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रमाणविषयातीतं तारापथसरोजवत् ।
नैव सद्व्यवहर्त्तव्यं स्याद्वादो न प्रमाश्रयः ॥ १८८ ॥

असिद्धं च विरुद्धं च व्यभिचारि च साधनम् ।
कालात्ययापदिष्टं स साध्येन समतामितम् ॥ १८९ ॥

स्वदेशे सत्त्वमन्यत्र तस्यासत्त्वं न चापरम् ।
नन्वेवमेकता प्राप्ता तयोरेषाऽविभागतः ॥ १९० ॥

परदेश इवासत्त्वं स्वदेशे तस्य किं न वः ।
सत्त्वं स्वदेशवत्प्राप्तं परदेशेऽविगानतः ॥ १९१ ॥

नाभावः कश्चिदन्योस्ति भाव एव स्वनिष्ठितः ।
अभावव्यवहारस्तु कल्पनाशिल्पिनिर्मितः ॥ १९२ ॥

अभावाभावतो ह्येवं भावाः सङ्कीर्णरूपिणः ।
स्वस्वभावास्थिता भावा अपराभाव इष्यताम् ॥ १९३ ॥

तच्चेद्भिन्नं घटादिभ्यः सङ्कीर्णत्वमवारितम् ।
अभिन्नत्वे तु भावस्य शून्यताप्यविशेषतः ॥ १९४ ॥

धर्मभेदेऽप्यभेदोपि धर्मिणो भवतां मतः ।
क्रमभाव्यक्षरोल्लेखिविकल्पैकत्वसाधनात् ॥ १९५ ॥

स्याद्वादभङ्गहानिश्च त्वयैव प्रतिपादिता ।
विचित्रज्ञानमप्येकमिच्छता स्पष्टभासि यत् ॥ १९६ ॥

सर्वं संवेदने स्पष्टमभ्रान्तमिह सम्मतम् ।
नीलाकारो न चेदर्थो न ज्ञानं वेदनं कुतः ॥ १९७ ॥

प्रामाण्यं परतश्चैवं प्रसक्तं भवतां ननु ।
न च स्वतोऽसती शक्तिः कर्त्तुमन्येन पार्यते ॥ १९८ ॥

अप्रामाण्यनिमित्तापि शक्तिर्नान्यनिमित्तका ।
स्वतोऽसती यतो नासौ कर्त्तुमन्येन शक्यते ॥ १९९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

को वा ज्ञाने समुत्पन्ने पश्चाच्छक्तिं व्यवस्यति ।
किन्तु तत्र स्थिताप्येषा निमित्तात्सम्प्रतीयते ॥ २०० ॥

तस्मादर्थक्रियाज्ञानमन्यद्वा समपेक्षते ।
निश्चयायैव नो तस्या आधानाय विषादिवत् ॥ २०१ ॥

शक्तयः सर्वभावानां कार्यार्थापत्तिसाधनाः ।
वदता परतो हन्त त्वयैव ह्युपपादितम् ॥ २०२ ॥

अनपेक्षत्वमेवैकमप्रामाण्यनिबन्धनम् ।
इत्यादि वदतां नैव मुखभङ्गादिसम्भवः ॥ २०३ ॥

आत्मलाभे हि भावानां कारणापेक्षिता भवेत् ।
लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव तु ॥ २०४ ॥

अन्यत्र युज्यते चैतन्न ज्ञाने क्षणनाशिनि ।
नाशादुत्तरकालं हि तस्य वृत्तिः कथं भवेत् ॥ २०५ ॥

कारणेषु गुणज्ञानं नापेक्ष्येतानवस्थितेः ।
एकत्र दृष्टसंवादे शुद्धिः किं नानुमीयते ॥ २०६ ॥

संवादेनापि संवादो नैव मृग्यो न तद्यतः ।
अर्थक्रियाभिनिर्वृत्तेः साशङ्का न तदर्थिनः ॥ २०७ ॥

आशङ्क्येत हि यो मोहादजातमपि बाधकम् ।
भवतेत्यादि गदितं तत एव प्रशस्यते ॥ २०८ ॥

अप्रामाण्यं स्वतो नेति प्रामाण्यं स्वत इष्यते ।
को विशेषस्त्वया दृष्ट्ये नानवस्था तवापि किम् ॥ २०९ ॥

परायत्तेपि चैतस्मिन्नानवस्था प्रसज्यते ।
प्रमाणाधीनमेतद्धि स्वतस्तच्च व्यवस्थितम् ॥ २१० ॥

तत्रापि त्वपवादस्य स्यादपेक्षा पुनः क्वचित् ।
जाताशङ्कस्य पूर्वेण साप्यल्पेन निवर्त्तते ॥ २११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बाधकान्तरमुत्पन्नं यद्यस्यान्विच्छतोऽपरम् ।
ततो मध्यमबाधेन पूर्वस्यैव प्रमाणता ॥ २१२ ॥

अथानुरूपयत्नेन सम्यगन्वेषणे कृते ।
मूलाभावान्न विज्ञानं भवेद्बाधकबाधकम् ॥ २१३ ॥

ततो निरपवादत्वात् तेनैवाद्यं बलीयसा ।
बाध्यते तेन तस्यैव प्रमाणत्वमपोद्यते ॥ २१४ ॥

एवं परीक्षकज्ञानत्रितयं नातिवर्त्तते ।
ततश्च जातबाधेन नाशङ्क्यं बाधकान्तरम् ॥ २१५ ॥

यद्येवमनवस्थैषा ममाप्येवं न युज्यते ।
समानन्यायमारूढावावां हन्ताविशेषतः ॥ २१६ ॥

एकार्थमथ भिन्नार्थं प्रमाणत्वावधारकम् ।
एकार्थमप्रमाणं तु गृहीतग्रहणादपि ॥ २१७ ॥

भिन्नार्थं यदि विज्ञानमन्यदन्यस्य साधकम् ।
द्विचन्द्रादिधियोप्येवमस्तु तारादिगोचरम् ॥ २१८ ॥

कश्चायं हन्त संवादस्तत्प्राप्यार्थक्रियामतिः ।
श्रोत्रधीरप्रमाणं स्यादितराभिरसङ्गतेः ॥ २१९ ॥

पूर्वज्ञानममानं किं प्रमाणं केन चोत्तरम् ।
स्वसन्ततिसमुत्थं वा सन्तानान्तरवर्त्ति वा ॥ २२० ॥

न चान्यदीयविज्ञानमसिद्धं साध्यसाधकम् ।
प्रथमोत्तरयोः स्वस्य चेतसोः किं विशिष्यते ॥ २२१ ॥

उच्यते संशयज्ञानं विपर्यासानुषङ्गि वा ।
मन्ये न जातु वो ज्ञानं तेनैवमभिधीयते ॥ २२२ ॥

तत्रापूर्वार्थविज्ञानं निश्चितं वदता त्वया ।
परतो निश्चयेप्यत्र नानवस्थेति साधितम् ॥ २२३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संवादाद्धेतुशुद्धेर्वा ज्ञानं बाधविवर्जितम् ।
तत्रानवस्थितौ यद्वः समाधानं तदेव नः ॥ २२४ ॥

तस्माद्वक्तृगुणाधीनं शब्दे प्रामाण्यमिष्यताम् ।
वेदे कर्त्तुरभावश्च निःप्रमाणः कथं स वः ॥ २२५ ॥

सर्वादृष्टिस्तवासिद्धा स्वादृष्टिर्व्यभिचारिणी ।
विपक्षवृत्ति कालत्वं तदभावं न साधयेत् ॥ २२६ ॥

आनुपूर्वी नराधीना भारतादौ विनिश्चिता ।
कालात्ययापदिष्टं तदशेषं तत्र साधनम् ॥ २२७ ॥

याज्ञवल्क्य इहोवाच वेदवाक्यश्रुतेरपि ।
नाकर्त्तृकत्वमेतस्य खाण्डिकीयविधानतः ॥ २२८ ॥

क्रियाप्रज्ञादयोप्येते गुणाः सत्यत्वहेतवः ।
पुंसि धर्मिणि वर्त्तन्ते तदभावे सत्यता कथम् ॥ २२९ ॥

वितथार्थाभिधायी च नित्यत्वान्नेति का प्रमा ।
वायुर्गन्ता स्थिरा भूमिरमूर्त्तं चाम्बरं तथा ॥ २३० ॥

दोषाभावेपि वेदस्य नैव सत्यार्थता कुतः ।
अनर्थकत्वमप्यस्ति यस्मात्पक्षान्तरं परम् ॥ २३१ ॥

नित्यं ज्ञानप्रसूतिश्च नित्यं वेदे व्यवस्थिते ।
सहकारिव्यपेक्षापि न नित्ये युक्तिसङ्गता ॥ २३२ ॥

सङ्केताधीन एवायमर्थमाह ध्वनिर्यतः ।
सङ्केतपौरुषेयत्वे दोषस्तत्रापि तादृशः ॥ २३३ ॥

नित्यसम्बन्धसद्भावे व्याख्यादीनामसम्भवः ।
आगमो वर्णनित्यत्वे सर्वो नित्यः प्रसज्यते ॥ २३४ ॥

आनुपूर्वी यदा नित्या नियता स्यादथाखिला ।
नाखिला सर्वशास्त्राणां प्रमाणत्वप्रसङ्गतः ॥ २३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नियता को विशेषोऽस्या दृष्यन्यापि विषापहा ।
सापि तदंशभूतेति तेऽपि विप्रा इवासताम् ॥ २३६ ॥

तस्या अप्यर्थसम्बन्धः पौरुषेयो वृथा श्रमः ।
नित्यो व्याख्याश्रमो व्यर्थो नित्यं श्रवणचेतसः ॥ २३७ ॥

प्रसूतिरन्यथा नित्यः स वा सा वा प्रसज्यते ।
नित्यस्य चैकरूपत्वान्न संस्कारविधिर्मतः ॥ २३८ ॥

सर्वेषां तुल्यमाकाशं तच्चेच्छ्रोत्रं श्रुतिः समा ।
यदीयादृष्टसंस्कारस्स शब्दं प्रतिपद्यते ॥ २३९ ॥

पराभ्युपगमो मानं सर्वथा भवतो यदि ।
परेण पौरुषेयत्वं वेदस्येष्टं न केन वः ॥ २४० ॥

दिशोपि नित्यतायोगे संस्कारो नोपपद्यते ।
श्रोत्रदृष्टवशान्नैव संस्कार उभयोरपि ॥ २४१ ॥

तवापि पौद्गलो नादः कर्णपूरणमायतेत् ।
विना प्रयत्नमेतस्य निर्गमोपि कथं हि वः ॥ २४२ ॥

वर्णस्यावरणापाये विभुत्वे च श्रुतिर्न किम् ।
सर्वेषामविशेषेण वर्णनानात्वमन्यथा ॥ २४३ ॥

कादिजातिसमावेशो व्यक्तीनां नित्यताक्षतिः ।
श्रोत्रनानात्वपक्षोपि नाकाशैकत्वहानितः ॥ २४४ ॥

न वर्णपदवाक्यानां वैसदृश्यं हि किञ्चन ।
एकत्रादृष्टसंवादो वेदेऽप्याशङ्क्यते न किम् ॥ २४५ ॥

न ह्यतो वचनादर्थं सन्दिग्धं वेत्ति कश्चन ।
इत्यादि भक्तलोकानां पुरतो ननु राजते ॥ २४६ ॥

यागात्प्राणिवधस्तस्मादपायः पारलौकिकः ।
इत्यत्र दृश्यते बाधा न काचिदपि सम्प्रति ॥ २४७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बाधा सम्भाव्यतेऽत्रार्थे वेदे सा केन वार्यते ।
यद्वा लोकविरुद्धेपि प्रामाण्यं कथमिष्यते ॥ २४८ ॥

धारणाध्ययनेत्यादि नाक्रोशः फलवानिह ।
अज्ञैरज्ञाततत्त्वोपि पण्डितैरवसीयते ॥ २४९ ॥

तस्मादतीन्द्रियार्थेषु सर्वज्ञगदितागमः ।
मानमभ्युपगन्तव्यो न वेदस्तात्त्विको यतः ॥ २५० ॥

सर्वज्ञे सति तद्वाक्यं प्रमाणत्वं प्रयास्यति
तत्सत्तासाधनं मानं नाध्यक्षादीह किञ्चन ॥ २५१ ॥

सदुपलम्भकमानस्य गोचरो नेह सर्ववित् ।
अभावसाधको भावः सा सत्ता तस्य दुर्ल्लभा ॥ २५२ ॥

चक्षुरादिधियो ग्राह्या परसंविन्नेष्यते यत् ।
अनुमानं च तत्पूर्वं तदभावेन वर्त्तते ॥ २५३ ॥

अन्योन्याश्रयदोषो वा तत्पूर्वत्वेऽनवस्थितिः ।
आगमोपि न तद्गीतस्तं विना सिद्धिमृच्छति ॥ २५४ ॥

न चापरं परैरिष्टं प्रमाणं न ततो गतिः ।
तत्कथं तद्वचो मानं सम्भवत्यनघं ननु ॥ २५५ ॥

धर्मज्ञत्वनिषेधश्च केवलोऽत्रोपयुज्यते ।
सर्वमन्यद्विजानानः पुरुषः केन वार्यते ॥ २५६ ॥

समस्तावयवव्यक्तिविस्तरे ज्ञानसाधनम् ।
काकदन्तपरीक्षावत् क्रियमाणमनर्थकम् ॥ २५७ ॥

एकस्यापि शरीरस्य यावन्तः परमाणवः ।
केशरोमाणि यावन्ति कस्तान्विज्ञातुमर्हति ॥ २५८ ॥

साक्षात्प्रत्यक्षदर्शित्वाद्यस्याशुचिरसादयः।
स्वसंवेद्याः प्रसज्यन्ते को नु तं कल्पयिष्यति ॥ २५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येपि विच्छिन्नमूलत्वाद्धर्मज्ञत्वे हते सति ।
सर्वज्ञान् पुरुषानाहुः तैः कृतं तुषकण्डनम् ॥ २६० ॥

क्व च बुद्धादयो मर्त्त्याः क्व च देवोत्तमं त्रयम् ।
देवा यदि च सर्वज्ञा बुद्धादेर्मानुषस्य किम् ॥ २६१ ॥

उपदेशो हि बुद्धादेरन्यथाऽप्युपपद्यते ।
स्वप्नादिदृष्टव्यामोहाद्वेदाद्वा वितथश्रुतात् ॥ २६२ ॥

यद्यसौ वेदमूलः स्याद्वेदवादिभ्य एव तम् ।
उपदेशं प्रयच्छेयुर्यथा मन्वादयस्तथा ॥ २६३ ॥

उच्यते तदभावोपि न प्रमाणात्कुतोपि वः ।
आश्रयासिद्धता नापि शब्दे धर्मिणि युज्यते ॥ २६४ ॥

सर्वज्ञवीतरागोक्तमाचारादिवचः स्फुटम् ।
तदुक्तार्थाविसंवादात्प्रत्यक्षेणैव कुत्रचित् ॥ २६५ ॥

एकत्र दृष्टसंवादं सर्वत्रापि तथेष्यते ।
नान्यन्निमित्तमत्रास्ति तद्विसंवादकल्पने ॥ २६६ ॥

अनुमानेपि नैव स्यान्निश्चयः साध्यधर्मिणि ।
यदि नामैकदा दृष्टः सर्वत्रापि कुतो गतिः ॥ २६७ ॥

अविनाभावसम्बन्धनिश्चयादनुमा प्रमा ।
आगमे त्वविनाभाव निश्चयः केन वो ननु ॥ २६८ ॥

समानमेतदन्यत्र सममस्तु द्वयं ततः ।
सर्वत्रामानमध्यक्षं यद्येकत्रान्यथा क्वचित् ॥ २६९ ॥

तदुत्पत्त्याऽविनाभावो वाच्यवाचकतेह च ।
शब्दार्थयोरसम्बन्धे कथं सापि समं द्वये ॥ २७० ॥

धर्मज्ञत्वनिषेधोपि भवतामनिबन्धनः ।
प्रत्यक्षादेरिहावृत्तिः पुरस्तादुपपादिता ॥ २७१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकं जानन् समस्तानि सर्वं जानंस्तथैककम् ।
ततश्च निष्फलारम्भः केन तत्साधने हि नः ॥ २७२ ॥

क्षायोपशमिका भावाः क्षयमायान्ति कुत्रचित् ।
क्षायोपशमिकाश्चैता विज्ञानावृतयः स्फुटम् ॥ २७३ ॥

सन्दिग्धेपि च धर्मज्ञे भव्यजन्तोर्न कर्कशः ।
अधिक्षेपस्य दायिन्यो वाचः पाप यथा तव ॥ २७४ ॥

इन्द्रियार्थोपभोगश्च नानक्षेणेति शासितम् ।
स्वप्नेन चाप्यनक्षेण तवापि रससंविदः ॥ २७५ ॥

देवोत्तमत्रयं त्वं वा सर्वज्ञं कथमिच्छसि ।
साधनं तत्किमन्यत्र व्याघातं प्रतिपद्यते ॥ २७६ ॥

उपदेशो हि बुद्धादेरित्यादि विफलं वचः ।
त्रयेप्यस्य समानत्वात् को विशेषोऽपरत्र वः ॥ २७७ ॥

एकतः सर्वपापानि मद्यं मासं च एकतः ।
इत्यादि गदितं मोहान्नारदादिभिरञ्जसा ॥ २७८ ॥

यथा यथाऽपनीयन्ते ज्ञानावरणमस्य तु ।
तथा तथा च संवित्तौ विशेषः सम्प्रतीयते ॥ २७९ ॥

यच्चापचीयमानं तु सर्वथाऽप्यपचीयते ।
नारकादेर्यथैवायुः सर्वथैवापचीयते ॥ २८० ॥

ज्ञस्वभावे स्वतः पुंसि तारतम्यविशेषतः ।
तपसापचयो दृष्टो ज्ञानावृतिषु कश्चन ॥ २८१ ॥

अबन्धयोगमापन्ने सर्वथाऽपचयो मतः ।
साक्षात्तस्य ततो ज्ञानमशेषार्थेषु जायते ॥ २८२ ॥

अशेषावरणापाये ज्ञानं सर्वार्थगोचरम् ।
ज्ञस्वभावत्वतः पुंसः को नु तं वारयिष्यति ॥ २८३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादि गदितं पूर्वं तद्दोषाणामपाकृतेः ।
तत्र तत्रैव चोक्तानामभावापत्तितः स्फुटम् ॥ २८४ ॥

युगपत्परिपाट्या वा सर्वं वैकस्वभावतः ।
जानन्यथाप्रधानं वा शक्त्या वेष्येत सर्ववित् ॥ २८५ ॥

नानारूपसमाकारमेकं चेतः कथं नु ते ।
अनाकारे व्यवस्था तु नियतार्थे कथं तव ॥ २८६ ॥

भाव्यर्थानामनन्तत्वान्न क्रमोऽप्युपपद्यते ।
जात्याश्रयं च विज्ञानमस्मदादेर्न किं मतम् ॥ २८७ ॥

यथा प्रधानमन्येपि राजादीश्चँ विदन्ति हि ।
सर्वज्ञतायामेवं तु स्युः सर्वज्ञास्तवाखिलाः ॥ २८८ ॥

एकदैकमनेकार्थं वेत्ति स्याद्वादवादिनः ।
क्रमभाव्यक्षरोल्लेखिविकल्प इव मे मनः ॥ २८९ ॥

यस्य ज्ञेयप्रमेयत्ववस्तुसत्त्वादिलक्षणाः ।
निहन्तुं हेतवः शक्ताः को नु तं कल्पयिष्यति ॥ २९० ॥

एवं ज्ञेयप्रमेयत्ववस्तुसत्त्वादि यत्परैः ।
साधनं तदसिद्धादिदोषदुष्टमुदाहृतम् ॥ २९१ ॥

सर्वज्ञे सति युज्येते युगपत् क्रमशोपि वा ।
तस्य ज्ञानं विजानाति भावान्विश्वगतानिति ॥ २९२ ॥

सिद्धे तवापि चैतस्मिन् प्रेरणापि समा तव ।
न सिद्धः किं विकल्पेन प्रेरणा तां विना शृणु ॥ २९३ ॥

एतदत्रोदितं पूर्वं नैव चातोऽपरा प्रमा ।
दानादेरविनाभावग्राहिकेति निवेदितम् ॥ २९४ ॥

वेदस्यासत्त्वतो नैव तस्मादर्थविनिश्चयः ।
प्रत्यक्षादेरिहावृत्तिः पुरस्तादुपपादिता ॥ २९५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केवलागमगम्यत्वं लप्स्यते पुण्यपापयोः ।
पौरुषेयः स चाभीष्टस्तत्प्रणेता च सर्ववित् ॥ २९६ ॥

अतीन्द्रियार्थद्रष्टृत्वमावृतीनां परिक्षयात् ।
नष्टचित्तोपरागादिज्ञानलिङ्गादवस्थितम् ॥ २९७ ॥

परेभ्यो ज्ञातवस्तूनामुपदेशो न दुष्यति ।
आद्योपदेष्टा सर्वज्ञ इत्यत्रोक्तं न किञ्चन ॥ २९८ ॥

एवं दोषापवादेन सर्वज्ञत्वे व्यवस्थिते ।
तत्स्थाने क्लिश्यते लोकः संरम्भारम्भवादयोः ॥ २९९ ॥

सर्वज्ञेषु च भूयस्सु विरुद्धार्थोपदेशिषु ।
इत्यादावुदितं पूर्वं यथा नान्योस्ति सर्ववित् ॥ ३०० ॥

चोदनैव परोक्षेर्थे प्रमाणमिति निश्चयः ।
कुतो मानात्तवापीह नाविनाभाववेदकम् ॥ ३०१ ॥

तद्दूषणान्यसंरम्भाः बुद्धसर्वज्ञसाधने ।
जैना यानि वदन्त्येवं नैवं शक्ता हि भिक्षवः ॥ ३०२ ॥

वेदवादिमुखस्थैवं युक्तिर्वैदिकलौकिकी ।
उपहासपदं याति सर्वा सा चारुचेतसः ॥ ३०३ ॥

तेनैव सर्वविद्वाक्यप्रामाण्यमुपगच्छताम् ।
दानादौ स्वर्गमोक्षार्थं प्रवृत्तिर्युक्तिसङ्गता ॥ ३०४ ॥

विषयश्चास्य तत्त्वानि नवैतानि जिनागमे ।
एतेभ्योऽभ्यधिकं नान्यद्विद्यते हि जगत्त्रये ॥ ३०५ ॥

जीवाजीवौ च पुण्यं च पापं चाश्रवसंवरौ ।
निर्जराबन्धमोक्षौ च नवैतानि समासतः ॥ ३०६ ॥

परिणामी तनुव्यापी कर्त्ता भोक्ता च चेतनः ।
संसारी बन्धयोग्यस्तु मोक्षयोग्यश्च कश्चन ॥ ३०७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विश्वव्यापी न वाध्यक्षान्नाकर्त्ता नाप्यचेतनः ।
एको नाभौ न चाङ्गुष्ठपर्वमात्रो न सूक्ष्मकः ॥ ३०८ ॥

तत्पूर्वकमनुमानं स्वातन्त्र्ये न प्रमा तथा ।
अन्योन्याश्रयदोषोपि तच्चेत्तत्पूर्वकं मतम् ॥ ३०९ ॥

तस्मादागमगम्योयं विभागः परिकल्पितः ।
परैर्मुधा यतो नैव सर्वज्ञजिनभाषितः ॥ ३१० ॥

तद्गदितेन ये भावाः शिष्यस्तेषु न युज्यते ।
प्रमाणव्याहतिर्यद्वदेषु पक्षेषु दृश्यते ॥ ३११ ॥

यदि प्रत्यक्षगम्यश्च सत्यतः पुरुषो भवेत् ।
तत् किमर्थं विवादोऽयं तत्सत्तादौ प्रवर्त्तते ॥ ३१२ ॥

इष्टघाति निराधारमन्वयेन विवर्जितम् ।
प्रमाणमस्य संसिद्धौ विशेषेषु विशेषतः ॥ ३१३ ॥

निर्युक्तौ साधनं यच्च जीवसंसिद्धये कृतम् ।
तद्वादे इष्टघातादिदोषो जल्पेऽनुषज्यते ॥ ३१४ ॥

तस्माच्च निग्रहस्थानं शासनस्य पराभवः ।
तस्मादतीन्द्रियार्थानां वचनमेव प्रमा परा ॥ ३१५ ॥

चिद्रूपता मनस्काराददाकारो नानिमित्तकः ।
नाविद्यालम्बनं बुद्धेस्तत्त्वज्ञेऽभेदिनी मतिः ॥ ३१६ ॥

विषयाधिगतिश्चात्र प्रमाणफलमिष्यते ।
एतान्येव प्रमाणानि नापरं विषयादृते ॥ ३१७ ॥

अयमेवेति यो ह्येष भावे भवति निर्णयः ।
नैष वस्त्वन्तराभावसंवित्त्यनुगमादृते ॥ ३१८ ॥

गां दृष्ट्वाऽयमरण्येऽन्यं गवयमीक्षते यदा ।
भूयोऽवयवसामान्यभाजं वर्त्तुलकण्ठकम् ॥ ३१९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गवा सदृशरूपोऽयं पशुरित्येतदिष्यते ।
अक्षव्यापारसद्भावे जातेः प्रत्यक्षमिष्यते ॥ ३२० ॥

तत्र यद्यपि गां स्मृत्वा तज्ज्ञानमुपजायते ।
सन्निधेर्गवयस्थत्वात् भवेदिन्द्रियगोचरम् ॥ ३२१ ॥

सामान्यवद्धि सादृश्यं प्रत्येकं च समाप्यते ।
प्रतियोगिन्यदृष्टेपि तस्मात्तदुपलक्ष्यते ॥ ३२२ ॥

सादृश्यस्य च वस्तुत्वं न शक्यमपबाधितुम् ।
भूयोऽवयवसामान्ययोगो जात्यन्तरस्य तत् ॥ ३२३ ॥

तस्यामेव त्ववस्थायां यद्विज्ञानं प्रजायते ।
पशुनैतेन तुल्योसौ गोपिण्ड इति सोपमा ॥ ३२४ ॥

तस्माद्यत्स्मर्यते तत्तु सादृश्येन विशेषितम् ।
प्रमेयमुपमानस्य सादृश्यं वा तदाश्रितम् ॥ ३२५ ॥

प्रत्यक्षेणावबुद्धे च सादृश्ये गवि च स्मृते ।
विशिष्टस्यान्यतो भावे उपमायाः प्रमाणता ॥ ३२६ ॥

प्रत्यक्षेपि यथा देशे स्मर्यमाणे च पावके ।
विशिष्टविषयत्वेन नानुमानाप्रमाणता ॥ ३२७ ॥

न हि प्रत्यक्षता तस्य विज्ञानस्योपपद्यते ।
इन्द्रियत्वाभिसम्बन्धव्यापारविरहात्तदा ॥ ३२८ ॥

त्रैरूप्यानुपपत्तेश्च न च तस्यानुमानता ।
पक्षधर्मादि नैवात्र कथञ्चिदपि युज्यते ॥ ३२९ ॥

नासमानेषु सामान्यं समाना नापि तद्भिना ।
पिण्डेभ्यो भिन्नसामान्ये दोषोऽयमितरेतरः ॥ ३३० ॥

पिण्डेभ्यो यदि सामान्यं भिन्नमभ्युपगम्यते ।
सर्वात्मनैकदेशेन तेषु तद्वर्त्तते ननु ॥ ३३१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वानुगे च सामान्ये पिण्डवद् दृश्यतेष्यताम् ।
तददृष्टवदृश्यत्वं पिण्डानामनुषज्यते ॥ ३३२ ॥

अत्रोच्यते नु सादृश्यमेकनिष्ठं द्वयाश्रितम् ।
नान्वयज्ञानसम्भूतिरेकनिष्ठं यदा हि तत् ॥ ३३३ ॥

द्वयनिष्ठे तु सामान्ये गोपिण्डे गवयेपि वा ।
गृहीते तद्गृहीतं नु नोपमानमिहापरम् ॥ ३३४ ॥

एवं लिङ्गावसाये च उपमातो न चान्यतः ।
दृष्टान्तान्वेषणं केन तत्र वः सम्मतं ननु ॥ ३३५ ॥

प्रत्यक्षेणावसीयन्ते हेतवः साध्यधर्मिणि ।
सम्बन्धग्राहिगानं नो ज्ञात एव प्रतीयते ॥ ३३६ ॥

प्रत्यक्षबलसम्भूतस्मरणं नापरा प्रमा ।
प्रत्यक्षगोचरातीतगोचरान्तरहानितः ॥ ३३७ ॥

कीदृग्गवय इत्येवं पृष्टो नागरकैर्यदा ।
ब्रूयादारण्यको वाक्यं यथा गौर्गवयस्तथा ॥ ३३८ ॥

श्रुतातिदेशवाक्यस्य समानार्थोपलम्भने ।
संज्ञासम्बन्धविज्ञानमुपमा कैश्चिदिष्यते ॥ ३३९ ॥

आदेशश्रवणे तस्य संज्ञासम्बन्धनिश्चयः ।
गवयस्योपलम्भे च कोपमेह त्वयोच्यते ॥ ३४० ॥

अन्यथा किं विजानीते समानपशुदर्शने ।
सोयं यस्य मया संज्ञा संश्रुतेति तदा ननु ॥ ३४१ ॥

न ह्यविज्ञातसम्बन्धः शक्त एवं विवेचितुम् ।
सोयं यस्य पुरा नाम शबरेण निवेदितम् ॥ ३४२ ॥

सूत्रे यच्चोपमा नाम न नन्द्याख्य उदिता किल ।
वादकाले फलं तस्य नान्यदेति विदुर्बुधाः ॥ ३४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवन् ।
अदृष्टं कल्पयत्यन्यं सार्थापत्तिरुदाहृता ॥ ३४४ ॥

तत्र प्रत्यक्षतो ज्ञाताद् दाहाद् दहनशक्तिता ।
वह्नेरनुमिताद्यानात्सूर्ये तच्छक्तियोगिता ॥ ३४५ ॥

शक्तयः सर्वभावानां कार्यार्थापत्तिसाधनाः ।
अपूर्वास्ताश्च गम्यन्ते सम्बन्धग्रहणादृते ॥ ३४६ ॥

न चाऽसां पूर्वसम्बन्धो न चाऽन्यो गम्यतेऽधुना ।
कार्यैः सह यतस्तासां पक्षधर्मान्वयाविह ॥ ३४७ ॥

श्रोत्रादिशक्तिपक्षे च यावान् हेतुः प्रयुज्यते ।
सर्वोऽसावाश्रयासिद्धो धर्म्यसिद्धेः प्रसज्यते ॥ ३४८ ॥

पीनो दिवा न भुङ्क्तेऽथ एवमादिवचः श्रुतौ ।
रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते ॥ ३४९ ॥

न रात्र्यादिपदार्थश्च दिवावाक्येऽवगम्यते ।
न दिवादिपदार्थानां संसर्गो रात्रिभोजने ॥ ३५० ॥

न भेदो येन तद्वाक्यं भवेत्तत्प्रतिपादकम् ।
अन्यार्थव्यावृत्तत्वाच्च न द्वितीयार्थकल्पना ॥ ३५१ ॥

तस्माद्वाक्यान्तरेणायं बुद्धिस्थेन प्रतीयते ।
तेनानागमिकत्वेपि यत्तद्वाक्यं प्रतीयते ॥ ३५२ ॥

प्रमाणं तस्म वक्तव्यं प्रत्यक्षादिषु यद्भवेत् ।
न त्वनुच्चारिते वाक्ये प्रत्यक्षं व्यपदिश्यते ॥ ३५३ ॥

नानुमानं न हीदं हि दृष्टं तेन सह क्वचित् ।
यदि त्वनुपलब्धेपि सम्बन्धे लिङ्गतेष्यते ॥ ३५४ ॥

तदुच्चारणमात्रेण सर्ववाक्यगतिर्भवेत् ।
सम्बन्धरहितत्वेन नान्यतस्तद्विशिष्यते ॥ ३५५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गवयोपमिताया गोस्तज्ज्ञानग्रहशक्तता ।
उपमाबलसम्भूतसामर्थ्येन प्रतीयते ॥ ३५६ ॥

अभिधा नान्यथा सिद्ध्येदिति वाचकशक्तता ।
अर्थापत्त्यैव गम्येत तदनन्यगतेः पुनः ॥ ३५७ ॥

अर्थापत्त्यन्तरेणैव शब्दनित्यत्वनिश्चयः ।
अनित्यो हि न सङ्केतव्यवहारानुवृत्तिमान् ॥ ३५८ ॥

प्रमाणाभावनिर्णीतचैत्राभावविशेषितात् ।
गेहाच्चैत्रबहिर्भावसिद्धिर्यात्विह वर्णिता ॥ ३५९ ॥

तामभावोत्थितामन्यामर्थापत्तिमुदाहरेत् ।
पक्षधर्माद्यनङ्गत्वात् भिन्नैषाप्यनुमानतः ॥ ३६० ॥

बहिर्देशाविशिष्टेर्थे देशे वा तद्विशेषिते ।
प्रमेये यो गृहाभावः पक्षधर्मस्त्वसौ कथम् ॥ ३६१ ॥

जीवतश्च गृहाभावः पक्षधर्मोत्र कल्प्यते ।
तत्संवित्तिर्बहिर्भावं न चाबुद्धोपजायते ॥ ३६२ ॥

गेहाभावस्तु यः शुद्धो विद्यमानत्ववर्जितः ।
स मृतेष्वपि दृष्टत्वाद्बहिर्वृत्तेनं साधकः ॥ ३६३ ॥

अदृष्टं कल्पयेदन्यं दृष्टो वा यदि वा श्रुतः ।
तस्य तेनाभिसम्बन्धो मानतो निश्चितः क्वचित् ॥ ३६४ ॥

अनुमानेऽवतारोस्याः अन्यथा न प्रमाणता ।
अन्यथा ह्यविशेषेण गमयेदखिलं न किम् ॥ ३६५ ॥

किञ्चापरं पितृणां वा शक्तेर्वा श्राद्धकर्मणि ।
पिण्डः कस्योपकाराय पितृणां हि न युज्यते ॥ ३६६ ॥

शक्त्या पुत्रो यतो जातस्तस्या एवोपतिष्ठतु ।
अन्यथाऽतिप्रसङ्गोपि तत्सम्बन्धान्न सङ्गतम् ॥ ३६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तादात्म्यं न च भेदेन कार्यता न सहोद्भवात् ।
द्रव्ययोरेव संयोगः समवायो नानवस्थितेः ॥ ३६८ ॥

अभेदे शक्तिमानेव प्रत्यक्षेण स निश्चितः ।
भेदाभेदेपि ते दोषा न चास्मास्वपि तत्समम् ॥ ३६९ ॥

पिण्डदानक्रिया यस्मादनिष्टा जैनवादिनाम् ।
शक्तेः पिण्डे कथं तृप्तिं लभन्ते पितरस्तव ॥ ३७० ॥

यवैर्व्रीहितिलैर्माषैरद्भिर्मूलफलेन वा ।
दत्तेन मासं तृप्यन्ते पितरो विधिवन्नृणाम् ॥ ३७१ ॥

इत्यादि गदितं यस्मादानर्थक्यं प्रपद्यते ।
प्रत्यक्षाधिगते शक्ते कार्थापत्तिरिहापरा ॥ ३७२ ॥

सत्यं श्रोत्रादयो नाक्षाः शब्दज्ञानं न सर्वदा ।
निमित्तान्तरसापेक्षा कार्यात्तेषामतो गतिः ॥ ३७३ ॥

गन्तुः शक्तिर्न काप्यन्या पुरस्तादुपपादितम् ।
नानुमापूर्विका तस्मादर्थापत्तिरिहोचिता ॥ ३७४ ॥

पीनत्वं भोजने दृष्टं तदभावे न जातुचित् ।
दिवाभोजनवैकल्ये पीनोयं रात्रिभुक्तिमान् ॥ ३७५ ॥

दिवा न भुङ्क्त इत्यत्र रागिणो वचनं प्रमा ।
केनेष्टा भवता हन्त वेदे तद्वन्न किं मतम् ॥ ३७६ ॥

उपमायाः प्रमाणत्वे त्वर्थापत्तेर्निवारिते ।
तत्पूर्विके कथं स्यातामर्थापत्ती ततो ननु ॥ ३७७ ॥

प्रत्यक्षादिधियां ग्राह्ये भावे तद्ग्रहशक्तिता ।
संख्यातिरेकिणी तस्याः षट्प्रकारा मुधोदिता ॥ ३७८ ॥

शब्दादर्थप्रतीतौ च काऽपरा शक्तिरिष्यते ।
अभावोपि प्रमा नेति तत्पूर्वापि ततो न सा ॥ ३७९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गेहे चापश्यतश्चैत्रं प्रमाणं तस्य जीवने ।
नैव चार्वाग्दृशः किञ्चिद्बहिर्भावस्ततः कथम् ॥ ३८० ॥

गेहाभावोऽविनाभूतो जीवतोऽन्यत्र संस्थितेः ।
अनुमानादिदं सिद्धं कार्थापत्तिरिहापरा ॥ ३८१ ॥

प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते ।
साऽऽत्मनोऽपरिणामो वा विज्ञानं वान्यवस्तुनि ॥ ३८२ ॥

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥ ३८३ ॥

प्रमाभावाच्च वस्तूनामभावः सम्प्रतीयते ।
चतुर्द्धा च विभक्तोऽसौ प्रागभावादिभेदतः ॥ ३८४ ॥

न च स्याद् व्यवहारोऽयं कारणादिविभेदतः ।
प्रागभावादिभेदेन नाभावो भिद्यते यदि ॥ ३८५ ॥

क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते ।
नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम् ॥ ३८६ ॥

गवि योऽश्वाद्यभावश्च सोऽन्योन्याभाव उच्यते ।
शशशृङ्गादिरूपेण सोऽत्यन्ताभाव उच्यते ॥ ३८७ ॥

न चावस्तुन एते स्युर्भेदास्तेनास्य वस्तुता ।
कार्यादीनामभावः को योऽभावः कारणादितः ॥ ३८८ ॥

यद्वानुवृत्तव्यावृत्तबुद्धिग्राह्यो यतस्त्वयम् ।
तस्माद्गवादिवद्वस्तु प्रमेयत्वाच्च गम्यताम् ॥ ३८९ ॥

उच्यते पर्युदासोऽयं प्रसज्यो वा मतस्तव ।
स्वापमूर्च्छाद्यवस्थासु नार्थाभावोऽस्ति नान्तिमः ॥ ३९० ॥

पिशाचादेरभावोपि भूतलज्ञानवेदने ।
अथैकज्ञानसंसर्गि वस्तुज्ञानं तदिष्यते ॥ ३९१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकस्य कस्य संवित्तावित्यादि गदितं कथम् ।
ज्ञानं न वा प्रमाभावो मानमेतत्कथं मतम् ॥ ३९२ ॥

प्रमाभावोऽथ विज्ञानं प्रत्यक्षं हन्त तत्तथा ।
तेनैव वस्तु तद्ग्राह्यं प्रमेयाभावरूपकम् ॥ ३९३ ॥

एकवस्तुविनाशे हि सर्वस्यान्यस्य सम्भवः ।
किं नानुषज्यतेऽन्योन्याभावे हन्त समाश्रिते ॥ ३९४ ॥

शिरसोऽवयवा भिन्ना वृद्धिकाठिन्यवर्जिताः ।
अन्योन्याभाव एवायं किं मुधा भेदकल्पना ॥ ३९५ ॥

प्रमाणविषयो वस्तु पर्यायो नयगोचरः ।
कुनयोऽविषयो ज्ञेयः पर्यायो न ह्यगोचरः ॥ ३९६ ॥

विभिन्ननयसमारूढवादिनां हि परस्परम् ।
विरुद्धव्याप्तताहेतोरन्वयासिद्धिरेव च ॥ ३९७ ॥

एकनयसमारूढवादिना तुल्यबुद्धितः ।
प्रमाभासः प्रमाणत्वमियर्त्ति भ्रान्ततावशात् ॥ ३९८ ॥

प्रमाणाभाससंसाध्यां सिद्धिमिच्छन्नयो मतः ।
विपक्षक्षेपकृज्ज्ञेयः कुनयस्तु विपश्चिता ॥ ३९९ ॥

स्थूलं वस्तु समाश्रित्य व्यवहारानुपाति यत् ।
प्रमाणयन्ति चान्योन्यं नानानयसमाश्रिताः ॥ ४०० ॥

प्रमाणवादिनां तस्माद्वाद एव विचारणा ।
साधनाभासमन्यैस्तु वादिभिरभियुज्यते ॥ ४०१ ॥

तेनावधीरणाप्यत्र महता लक्ष्मशासने ।
परपक्षनिरासो हि साधनाभासतोऽप्यसौ ॥ ४०२ ॥

मिथ्यात्वध्वान्तभास्वन्तो जैनास्सन्ति महाधियः ।
यानाश्रित्य वयं पादरेणुतुल्या न जातुचित् ॥ ४०३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तैरवधीरिते यत्तु प्रवृत्तिरावयोरिह ।
तत्र दुर्जनवाक्यानि प्रवृत्तेः सन्निबन्धनम् ॥ ४०४ ॥

शब्दलक्ष्म प्रमालक्ष्म यदेतेषां न विद्यते ।
नादिमन्तस्ततो ह्येते परलक्ष्मोपजीविनः ॥ ४०५ ॥

श्रीबुद्धिसागराचार्यैर्वृत्तैर्व्याकरणं कृतम् ।
अस्माभिस्तु प्रमालक्ष्म वृद्धिमायातु साम्प्रतम् ॥ ४०६ ॥

महोपाध्यायश्रीधर्मसागरगणिविरचिता

## ॥ श्रीमहावीरविज्ञप्ति द्वात्रिंशिका ॥

श्रीमत्स्वर्गिजनार्च्चितक्रमयुगं संक्रान्तविश्वत्रयं,
विज्ञानं विलसद्वचः प्रतिवचःस्याद्वादमुद्राङ्कितम् ।
बिभ्राणं बत बाधवन्ध्यवचनं चापायवन्ध्यस्थिर्ति,
श्रीमद्वीरजिनेश्वर ! स्तुतिपथं नत्वा नये त्वामहम् ॥ १ ॥

ऐश्वर्यादिगुणैकलेशमपि ते वक्तुं न योगीश्वरः,
कोटी-कोटिनिजायुषापि विभवे जिह्वासहस्रैरपि ।
तन्मेऽपि स्पृहयालुता हितवती तत्राऽस्तु तद्वत्पुन,
र्विज्ञप्ताविति नोचिता तव पुरः प्रत्यर्थ्यसौ ज्ञप्तये ॥ २ ॥

तत्रापीश ! पुरा पुरातनमदीयाऽऽचार्यवर्यैः पुरः,
प्रज्ञप्ता यदमी द्विषः करकरग्राहं परित्यज्य यान् ।
वाचाऽऽज्ञां प्रतिपद्य ये त्वदरयस्तानेव वाग्गोचरी-
कुर्वे सर्वविदस्तवापि पुरतस्त्वद्भक्तिनुन्नोन्नतः ॥ ३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वामिन् सम्प्रति तेऽपि बहुशस्तत्र प्रसिद्धा दश,
शेषाः किञ्चिदकिञ्चिदेतदितरे त्वद्बोधबोध्याश्च ते ।
नामग्राहनिरूपिता हितममी तीर्थस्य ते स्युस्ततः,
प्रीतिर्गाढतरेप्सिता च सततं स्यादावयोस्तत् शृणु ॥ ४ ॥

श्रीमद्विक्रमतोऽङ्करामरजनीट्वर्षे वशामुक्त्यवाक्
राकाङ्कोऽङ्कतिथीन्दुके युगनभोर्के स्त्रीजिनार्चाद्विषन्,
विश्वारर्केऽम्बरपल्लवःषडनलार्के द्व्यर्द्धराकाग्रही
श्रीमच्छासनदेवतास्तुतिरिपुः खाक्षद्विचन्द्रे पुनः ॥ ५ ॥

अष्टाभ्रेष्ववनौ जिनप्रतिमया स्पर्द्धी पुनः साधुभि-
र्युग्माङ्गेष्ववनौ च सङ्करमतिर्व्योमाश्वबाणावनौ ।
बिम्बार्चाद्विमुखो द्विवाजिशरभूवर्षे बभूवाधमः,
सर्वेऽप्येवमिमे दशापि विदिशःस्वीयाऽऽग्रहाद् दुर्ग्रहात् ॥ ६ ॥

स्त्रीनिर्वाणनिराकृतौ च सिचयावृत्यङ्गतालिङ्गता,
द्वारं तत्कलकेवलानुदयता चेति प्रतिज्ञावतः ।
तस्मादेव मतिश्रुते कथमिति स्यातां सवस्त्रस्य मे,
प्रज्ञाशून्यहृदस्ततस्तदरुचेर्मानान्न ते मान्यता ॥ ७ ॥

मन्वानोऽपि जिनेशि तैजसतनुं नाहारहेतुस्थितिं,
धर्माराधनसाधनान्यपि मुधा बुद्ध्या परित्याजयन् ।
देहं प्रत्युत पालयन्निति विसंवादाद्यवित्सर्ववित् !
निर्वाच्यं च निदर्शयन् कुलवधूस्तेऽरिर्वरं चेष्टते ॥ ८ ॥

पक्षः पञ्चदशीमवाप्य सकलीस्यात्तत्र तत्पाक्षिकं,
युक्तं चेति विकल्प्य कल्पनपरः कुह्वादिकक्षाश्रितः ।
ही सांवत्सरिकादिवज्जिनपते ! सङ्केतमुन्मूलयन्,
भूतेष्यादिन एव पाक्षिकरवस्याऽरातिरेषः स्फुटम् ॥ ९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञानादीन्युपचारसाध्यशुचितानीष्टप्रदाऽनिष्टहृद्-
भावानीति तव प्रणीतसमये दृष्ट्वापि वाऽपेतदृग् ।
ज्ञानाऽऽचारहितोपचारमुपधानादीप्सिताऽसाधनं,
विद्वानेतदिति प्रभो ! प्रभुपुरः किं नो व्रजेन्निग्रहम् ॥ १० ॥

पावित्र्येण विवर्जितेति रमणी नाऽर्हत्सपर्योचिता,
मत्वा तां प्रतिषिद्धवान्किमु न च ज्ञानादिसम्पद्ग्रहम् ।
कादाचित्कमशौचमन्यसदृशं न ज्ञातवानज्ञराट्,
दुर्ज्ञेयस्त्वरयाऽरिेष भगवन् ! सम्प्रत्यमीषां नृणाम् ॥ ११ ॥

वृद्धौ मासतिथी प्रमाणमथवा ते न प्रमाणं किमु,
ब्रूहीत्येवमुदीरितः प्रतिवचोऽशक्तः कुकर्माऽरिजित् ! ।
वाचाऽऽज्ञाविमुखः प्रसिद्धिमगमत् श्रीवार्षिके पर्वणि,
प्राप्तानन्द इव स्मितं च कुरुते कृत्वा हि तत् श्रावणे ॥ १२ ॥

प्रायश्चित्तकृतिः प्रतिक्रमणसत्कृत्यं द्विशः प्रत्यहं,
प्रज्ञप्तं भगवंस्त्वया तदधिकं कुर्वीत कः काम्यधीः ।
तद्दृष्यान्तमुखेन संवरमयं सामायिकादीव यत्,
पर्वस्वेव नु पौषधं नियमयन्नस्ति त्वदाज्ञाबहिः ॥ १३ ॥

ईर्यां सामयिके सुचित्तजननीमन्ते प्रतिक्रामयन्,
सद्बीजाङ्कुरितक्षमामिव हलेनोल्लेखयन्नल्पधीः
दोषापौषधिनोऽन्त्ययामसमये सामायिकं शिक्षयन्,
दक्षंमन्यजनः कथं कथय मां स्वामिंस्त्वदाज्ञापरः ॥ १४ ॥

आयुःपर्यवसायिपञ्चयमवत् त्रिदण्डकोच्चारणं,
सम्यक् सामयिके जनेति मतिकृन्नो नन्दिपूर्वं तथा ।
प्रत्याख्यानविधावुभे इति विभो ! स्यात् सोऽनुकम्प्यः कथं ?
तद्यद्देव ! दिवाकरद्युतिततिः कुर्वीत किं पेचकम् ॥ १५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पीयूषद्विषतो विषादनमिव प्रीताशुमृत्योः पुन
र्भूपाज्ञापरिपन्थिनोऽलमटवीस्तेनैकनिश्राश्रमः ।
नद्याः साधनमस्य चाधममतेश्चामुण्डिकाराधनं,
युक्तं त्वेव तवाहितस्य हितकृत् ! खेदं वृथा मा कृथाः ॥ १६ ॥

किञ्चिद्धर्मवशेन वस्तु निखिलं साधर्म्यवैधर्म्यभा-,
गन्योऽन्यं प्रतिवस्तुविस्तरविभुज्ञानिन्नजानन्नयम् ।
श्रद्धालुर्मुखवस्त्रिकाग्रहणतः स्यात्साधुलिङ्गी ततो,
नो युक्तं तदिति प्रकल्पनपरः पापात्मराड् विश्रुतः ॥ १७ ॥

किञ्चारोपयता तुलां निलयिनः स्वात्मानमाप्तप्रभो !
तेनाऽऽनायि निजे गले दृढतरः पाशः स्वयं दुर्धिया ।
धान्याऽऽहारजलोपचारशुचिता-वस्त्रावृताऽवाच्यप-
न्यासार्हन्नति-जैनशासनमतिश्रद्धानसद्ध्यानतः ॥ १८ ॥

हत्वाऽऽवश्यकभूपतिं जिनपते ! तत्कण्ठहारोपमं !
द्विः सङ्ख्यानियमं समत्वनृपतेस्सत्संवरैकात्मनः ।
कण्ठे पाशमधीश ! पुश्य पुरतः कुर्वन्नुपादाय वै,
षड्जीवेष्वघृणो घृणास्पदमसौ स्यात्ते कथं संवरेट् ! ॥ १९ ॥

प्रायस्तुल्यकदाग्रही शरमितश्चक्षुर्मितेन प्रभो !,
सभ्यान्तस्तदयं पुरस्तव तिरस्कार्यस्त्वनार्यप्रभुः ।
तद्वत्त्रिस्तुतिकोऽपि कोपदहनः काम्यः कुकर्मात्मनां,
कोप्यस्त्वद्वचनामृतैकरसिकैर्बाह्यातिबाह्यो यतः ॥ २० ॥

स्वामिंश्चित्रकृदश्रुतं तव रिपोरेकं चरित्रं शृणु,
त्वत्तीर्थस्य नमस्कृतिं च वचसा स्वीकृत्य तन्मध्यगा ।
न स्तुत्या श्रुतदेवतेति वदति श्रुत्वापि तत्सन्निधे-
रौन्नत्यं जिनशासनस्य सततं श्रीहेमचन्द्रादितः ॥ २१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विश्वार्च्यक्रम ! हे महाजडजनव्यामोहकृद्दुर्गिरा,
त्वद्बिम्बार्चनदोषदर्शनपराऽपुण्याक्षराक्षूणया ।
षड्जीवेष्वनुकम्पयार्द्रहृदयोऽस्मीति ब्रुवाणो बहि-
र्विश्वास्य प्रतिघातको हतघृणः किंयोनिभावीभवेत् ॥ २२ ॥

नद्युत्तारपुरोविहारकरणं वाचंयमानां जिनाऽऽ-
देशः पेशलमुत्तरं विरचयन्नर्हन्नपीति प्रभो ! ।
पूजाऽणुव्रतिनोऽर्हतां न कुसुमैर्युक्ता जिनेत्यावदन्,
मद्याशीव तव द्विषन्नहह वै वैरूप्यभागीक्ष्यताम् ॥ २३ ॥

चार्वी चन्दनचम्पकादिकुसुमैर्नार्चा सदर्च्यक्रम !,
त्यागीशस्य दिशन्नहो ! जडसभाशृङ्गारभूतः स्वयम् ।
अर्थानर्थविवेकदृग्विरहितो वेश्याजनं पूजय-,
न्नर्थान्मूर्खजनं ह्यवातरदयं कालः कलिर्मूर्तिमान् ॥ २४ ॥

पेटा वज्रमयी रदैरिव महामुद्राङ्किता दुर्मते
रुन्मुद्रीकरणोद्यतस्य दशनव्यापत्तिहेतुर्हित ! ।
गम्भीरार्थमिदं तव प्रवचनं व्याख्योद्यतस्याऽऽत्मधी-
क्लृप्त्या वृत्तिपरम्पराद्यपमतेर्युक्तं द्विषोऽध्वच्युतेः ॥ २५ ॥

प्रायः प्राकृतसंस्कृताशनरतिः स्त्रीवस्त्रबाष्पानकृद्,
व्युच्छिष्टान्नविगानवानगपहन्नाम्नापि निन्द्यश्रुतिः ।
दुर्वेषी विमुखीह ते प्रवचनाच्चेन्नाऽभविष्यद् द्विषन्,
धर्माऽधर्मफलं फलेक्षणपरोऽद्राक्षीदमुत्रापि कः ? ॥ २६ ॥

ही हीनो गुरुणा गुरुप्रभुरणानध्वश्रवास्साश्रवा,
साधुश्रेणिरिति प्रकल्पितमतिः सम्प्रत्यसावीक्ष्यते ।
दुर्ल्लक्ष्या क्षितिमण्डले कटुफलैकासक्तिसेव्यः कटु-
र्युक्तस्तीर्थमपार्द्धमक्षिविषयं दुर्वावदन्नल्पधीः ॥ २७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पापात्मा प्रतिमाऽर्हतामभिनमस्कार्याऽथ पूज्या च तत्
प्रोच्याऽपि प्रतिपक्षतामभिदधन्मायाविमुख्यः क्षितौ ।
यद्यद्धर्ममवाप्य मुक्तिपदवीवीथी भवेत्पूजिता,
तं धर्मं प्रतिषेधयत्यधिपते ! साधुप्रतिष्ठात्मकम् ॥ २८ ॥

त्वद्‌बिम्बप्रतिबद्धशुद्धहृदयस्कन्धोर्णिकादण्डभृद्,
दृष्ट्वापि प्रतिमाश्रवः श्रवणभृद् बिम्बारिवद् विश्वराट् ! ।
साङ्कर्यं दधदेष वेषविषयं वैषम्यभाग्गुर्वनु-
क्रान्तेः क्रान्तिसमोपमः श्रुतिपथाऽनाकर्ण्यवैवर्ण्यभाग् ॥ २९ ॥

पूजाऽरिः प्रतिमाऽरिवज्जिनपते ! पूजाऽवसाने जने,
मिथ्यादुष्कृतमादिशन्नभिमतः पाशस्तपस्व्यङ्गिनः ।
पञ्चाऽऽचारगतामपीन ! न विधौ वादे वदेदर्चनां,
मूर्त्यादेः करणं तथा च कुमुनिर्मूर्तिप्रतिष्ठां पुनः ॥ ३० ॥

निद्रा साधुजनस्य जैनसमये नाऽऽज्ञा प्रमादो यतः,
प्रोच्येति प्रतिसेव्य तां च ससुखं स्वर्गापवर्गाध्वनि ।
भो लोकाः ! किल पश्यत स्फुटमहं सम्प्रस्थितोऽस्मीति वा-
गन्योक्त्या जिन ! शिक्षयंस्त्वदरितां विश्वोपमान् व्यंसकः ॥ ३१ ॥

इत्युद्भाव्य निबन्धितानधिकृतान् कक्षाऽम्बरग्राहकान्,
दीनान्दीनरवान्निरीक्ष्य भगवंस्त्वत्किङ्कराऽस्मत्पुरः ।
सद्राज्यं निजधर्मसागरशशी स्वीयेषु पीयूषदृग्,
भुञ्जन्नाऽऽरविचन्द्रमा जय जयिष्वस्माद्दृशेषु प्रभो ! ॥ ३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महोपाध्यायश्रीधर्मसागरगणिविरचितम्

# ॥ षोडश-श्लोकी ॥

(गुरुतत्त्वप्रदीपदीपिका)

श्रीमद्वीरजिनं नत्वा, तत्त्वाऽतत्त्वविवेकिनम् ।
सर्वांश्चोत्सूत्रविच्छेद-त्यक्ताऽऽलस्यान् बहुश्रुतान् ॥ १ ॥

श्रीवीरजन्मनक्षत्र-सङ्क्रातभस्मदुर्ग्रहात् ।
तीर्थाधिपत्यभीष्टस्य, तीर्थस्याऽऽपद्विधायकान् ॥ २ ॥

उद्धृत्य तत उत्सूत्र-भाषिणः कण्टकानिमान् ।
कुण्ठितास्यान् विधास्येऽहं पुनःपीडापराङ्मुखम् ॥ ३ ॥

उत्सूत्रं तत्त्रिधा वक्ष्ये, जघन्यादिकभेदतः ।
तत्त्यागोत्सुकमेधावि-मेधाऽऽदर्शैकसङ्क्रमम् ॥ ४ ॥

तत्राऽऽद्योऽवेत्य तान् लोके, किं ममेति विगीतवाक् ।
स्थिराऽस्थिरप्रभेदाभ्यां, द्वितीयोऽपि द्विधा भवेत् ॥ ५ ॥

स्थिरोत्सूत्र्याऽऽदिकृच्चाऽन्यो, द्विधा निह्नवसञ्ज्ञितः ।
आदिकृच्छिवभूत्यादि-रन्यस्तन्मार्गमाश्रितः ॥ ६ ॥

तीर्थाऽऽवासपरित्यागात्, तीर्थाऽऽभासप्रवर्त्तनात् ।
तीव्रद्वेषोदयादेव, भवेदाद्यः स्थिरात्मकः ॥ ७ ॥

अन्यस्तदुक्तमार्गानु-गामी च दृष्टिरागवान् ।
तत्त्वं विचिन्तयन्नन्तः खिन्नोऽतत्त्वाऽऽश्रयी ध्रुवम् ॥ ८ ॥

द्विधाप्ययं स्थिरोत्सूत्रं, सूत्रयेत्तीर्थनिर्भयः ।
तीर्थेन ताडितोऽपि द्राक्, तीर्थमेवाऽवहीलयेद् ॥ ९ ॥

तस्मादेवाऽऽदिकृच्चान्यो, गुरुर्गुरुतरः क्रमात् ।
उत्सूत्रकन्दकुद्दाले, तीर्थाऽस्पृक् सोऽप्यनेकभित् ॥ १० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्त्रीमुक्त्यावाक् च राकाङ्कः, स्त्रीजिनार्च्चारिरञ्चलः ।
सार्द्धराकारतश्चेति, षष्ठः त्रिस्तुतिको मतः ॥ ११ ॥

गुरुतत्त्वप्रदीपोक्ताः, षडेतेऽथ चतुष्टयी ।
चैत्यद्विड् गुर्व्वदृङ् मिश्रो जिनार्च्चानुपदेशवाक् ॥ १२ ॥

दिग्मितानाममीषां चेज्जिज्ञासा व्यक्तितो भवेत् ।
कुपक्षकौशिकाऽऽदित्यो, मत्कृतः क्रियतां पुरः ॥ १३ ॥

अस्थिरात्मा यथाच्छन्दो, नोत्सूत्रं भाषते स्थिरम् ।
तीर्थभीरुस्ततस्तीर्थाद्, बहिस्थः पार्श्ववर्त्यसौ ॥ १४ ॥

स्थिरस्तत्पक्षपाती य-स्तस्योत्सूत्रमिहाऽन्तिमम् ।
द्रव्यात्तदतिरिक्तस्य, जैनमार्गस्थितस्य च ॥ १५ ॥

तीर्थं च साम्प्रतं श्रीमान्, पारिशेष्यात्तपागणः ।
सूरीड्विजयदानाऽऽज्ञा-वर्ती ज्ञानादिरत्नभाक् ॥ १६ ॥

एवं हि षोडशश्लोकी, विश्वाऽऽप्तश्लोकधारिणी ।
गुरुतत्त्वप्रदीपस्य, दीपिका जयताच्चिरम् ॥ १७ ॥

पू.आ.श्री जिनवल्लभसूरिविरचितः

## ॥ सङ्घपट्टकः ॥

वह्निज्वालावलीढं कुपथमथनधीर्मातुरस्तोकलोक-
स्याग्रे सन्दर्श्य नागं कमठमुनितपः स्पष्टयन् दुष्टमुच्चैः ।
यः कारुण्यामृताब्धिर्विधुरमपि किल स्वस्य सद्यःप्रपद्य,
प्राज्ञैः कार्यं कुमार्गस्खलनमिति जगादेव देवं स्तुमस्तम् ॥ १ ॥

कल्याणाभिनिवेशवानिति गुणग्राहीति मिथ्यापथ-
प्रत्यर्थीति विनीत इत्यशठ इत्यौचित्यकारीति च ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दाक्षिण्यीति दमीति नीतिभृदिति स्थैर्यीति धैर्यीति स-
द्धर्मार्थीति विवेकवानिति सुधीरित्युच्यसे त्वं मया ॥ २ ॥

इह किल कलिकालव्यालवक्त्रान्तराल-
स्थितिजुषि गततत्त्वप्रीतिनीतिप्रचारे ।
प्रसरदनवबोधप्रस्फुरत्कापथौघ-
स्थगितसुगतिसर्गे सम्प्रति प्राणिवर्गे ॥ ३ ॥

प्रोत्सर्प्पद् भस्मराशिग्रहसखदशमाश्चर्यसाम्राज्यपुष्यन्,
मिथ्यात्वध्वान्तरुद्धे जगति विरलतां याति जैनेन्द्रमार्गे ।
संक्लिष्टद्विष्टमूढप्रखलजडजनाम्नायरक्तैर्जिनोक्ति-
प्रत्यर्थी साधुवेषैर्विषयिभिरभित: सोयमप्राथि पन्था: ॥ ४ ॥

यत्रौद्देशिकभोजनं जिनगृहे वासो वसत्यक्षमा,
स्वीकारोर्थगृहस्थचैत्यसदनेष्वप्रेक्षिताद्यासनम् ।
सावद्याचरितादर: श्रुतपथावज्ञा गुणिद्वेषधी:,
धर्म: कर्महरोऽत्र चेत्पथि भवेन् मेरुस्तदाब्धौ तरेत् ॥ ५ ॥

षट्कायान् उपमृद्य निर्दयमृषीनाधाय यत् साधितं,
शास्त्रेषु प्रतिषिध्यते यदसकृत् निस्त्रिंशताधायि यत् ।
गोमांसाद्युपमं यदाहुरथ यद् भुक्त्वा यतिर्यात्यध-
स्तत् को नाम जिघत्सतीह सघृण: सङ्घादिभक्तं विदन् ॥ ६ ॥

गायद्गन्धर्वनृत्यत्पणरमणिरणद्वेणुगुञ्जन्मृदङ्ग-
प्रेङ्खत्पुष्पस्रगुद्यन्मृगमदलसदुल्लोचचञ्चज्जनौघे ।
देवद्रव्योपभोगध्रुवमठपतिताशातनाभ्यस्त्रसन्त:,
सन्त: सद्भक्तियोग्ये न खलु जिनगृहेऽर्हन्मतज्ञा वसन्ति ॥ ७ ॥

साक्षाज्जिनैर्गणधरैश्च निषेवितोक्ता, निस्सङ्गताग्रिमपदं मुनिपुङ्गवानाम् ।
शय्यातरोक्तिमनगारपदं च जानन् विद्वेष्टिक: परगृहे वसतिं सकर्ण : ॥ ८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चित्रोत्सर्गापवादे यदिह शिवपुरदूतभूते निशीथे,
प्रागुक्ता भूरिभेदा गृहिगृहवसतीः कारणेऽपोद्य पश्चात् ।
स्त्रीसंसक्त्यादियुक्तेऽप्यभिहितयतनाकारिणां संयतानां,
सर्वत्रागारिधाम्नि न्ययमि न तु मतः क्वापि चैत्ये निवासः ॥ ९ ॥

प्रव्रज्याप्रतिपन्थिनं ननु धनस्वीकारमाहुर्जिनाः,
सर्वारम्भिपरिग्रहं त्वतिमहासावद्यमाचक्षते ।
चैत्यस्वीकरणे तु गर्हिततमं स्यान्माठपत्यं यते-
रित्येवं व्रतवैरिणीति ममता युक्ता न मुक्त्यर्थिनाम् ॥ १० ॥

भवति नियतमत्रासंयमः स्याद्विभूषा,
नृपतिककुदमेतल्लोकहासश्च भिक्षोः ।
स्फुटतर इह सङ्गः सातशीलत्वमुच्चै
रिति खलु न मुमुक्षोःसङ्गतं गब्दिकादि ॥ ११ ॥

गृही नियतगच्छभाग् जिनगृहेऽधिकारो यतेः,
प्रदेयमशनादि साधुषु यथा तथाऽऽरम्भिभिः ।
व्रतादिविधिवारणं सुविहितान्तिकेऽगारिणां,
गतानुगतिकैरदः कथमसंस्तुतं प्रस्तुतम् ॥ १२ ॥

निर्वाहार्थिनमुज्झितं गुणलवैरज्ञातशीलान्वयं,
तादृग्वंशजतद्गुणेन गुरुणा स्वार्थाय मुण्डीकृतम् ।
यद्विख्यातगुणान्वया अपि जना लग्जोग्रगच्छाग्रहा,
देवेभ्योऽधिकमर्च्चयन्ति महतो मोहस्य तज्जृम्भितम् ॥ १३ ॥

दुष्प्रापा गुरुकर्मसञ्चयवतां सद्धर्म्मबुद्धिर्नृणां,
जातायामपि दुर्लभः शुभगुरुः प्राप्तः स पुण्येन चेत् ।
कर्त्तुं न स्वहितं तथाप्यलममी गच्छस्थितिव्याहताः,
कं ब्रूमः कमिहाश्रयेमहि कमाराध्येम किं कुर्महे ? ॥ १४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षुत्क्षामः किल कोऽपि रङ्कशिशुकः प्रव्रज्य चैत्ये क्वचित्,
कृत्वा कञ्चन पक्षमक्षतकलिः प्राप्तस्तदाचार्यकम् ।
चित्रं चैत्यगृहे गृहीयति निजे गच्छे कुटुम्बीयति,
स्वं शक्रीयति बालिशीयति बुधान् विश्वं वराकीयति ॥ १५ ॥

यैर्जातो न च वर्द्धितो न च न च क्रीतोऽधमर्णो न च,
प्राग्दृष्टो न च बान्धवो न च न च प्रेयाण्ण च प्रीणितः ।
तैरेवात्यधमाधमैः कृतमुनिव्याजैर्बलाद्वाह्यते,
नस्योऽतः पशुवज्जनोयमनिशं नीराजकं हा !! जगत् ॥ १६ ॥

किं दिङ्मोहमिताः किमन्धबधिराः किं योगचूर्णीकृताः,
किं दैवोपहताः किमङ्ग ! ठगिताः किं वा ग्रहावेशिताः ।
कृत्वा मूर्ध्नि पदं श्रुतस्य यदमी दृष्टोरुदोषा अपि,
व्यावृत्तिं कुपथाज्जडा न दधतेऽसूयन्ति चैतत्कृते ॥ १७ ॥

इष्टावाप्ति तुष्ट-विट-नट-भट-चेटक-पेटकाकुलं,
निधुवनविधिनिबद्धदोहदनरनारीनिकरसङ्कुलम् ।
राग-द्वेष - मत्सरेर्ष्याघनमघपङ्केऽथ निमज्जनं,
जनयत्येव मूढजनविहितमविधिना जैनमज्जनम् ॥ १८ ॥

जिनमतविमुखविहितमहिताय न मज्जनमेव केवलं,
किन्तु तपश्चरित्रदानाद्यपि जनयति न खलु शिवफलम् ।
अविधिविधिक्रमाज्जिनाज्ञापि ह्यशुभशुभाय जायते,
किं पुनरिति विडम्बनैवाहित-हेतुर्न प्रतायते ॥ १९ ॥

जिनगृह-जिनबिम्बं जिनपूजन - जिनयात्रादिविधिकृतं,
दान-तपोव्रतादि गुरुभक्तिश्रुतपठनादि चादृतम् ।
स्यादिह कुमत-कुगुरु-कुग्राह-कुबोध कुदेशनांशतः,
स्फुटमनभिमतकारि वरभोजनमिव विषलवनिवेशतः ॥ २० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आकृष्टुं मुग्धमीनान्बडिशपिशितवद् बिम्बमादर्श्य जैनं,
तन्नाम्ना रम्यरूपानपवरकमठान् स्वेष्टसिद्ध्यै विधाप्य ।
यात्रास्नात्राद्युपायैर्नमसितक-निशाजागरादिश्छलैश्च,
श्रद्धालुर्नाम जैनैश्छलित इव शठैर्वञ्च्यते हा !! जनोऽयम् ॥ २१ ॥

सर्वत्रास्थगिताश्रवाः स्वविषयव्यासक्तसर्वेन्द्रियाः,
वल्गद्गौरवचण्डदण्डतुरगाः पुष्यत्कषायोरगाः ।
सर्वाकृत्यकृतोऽपि कष्टमधुनान्त्याश्चर्यराजाश्रिताः,
स्थित्वा सन्मुनिमूर्द्धसूद्धतधियः तुष्यन्ति पुष्यन्ति च ॥ २२ ॥

सर्वारम्भपरिग्रहस्य गृहिणोप्येकाशनाद्येकदा,
प्रत्याख्याय न रक्षतो हृदि भवेत्तीव्रोऽनुतापस्तदा ।,
षट्कृत्वस्त्रिविधं त्रिधेत्यनुदिनं प्रोच्यापि भञ्जन्ति ये,
तेषां तु क्व तपः क्व सत्यवचनं क्व ज्ञानिता क्व व्रतम् ॥ २३ ॥

देवार्थव्ययतो यथारुचिकृते सर्वर्तुरम्ये मठे,
नित्यस्थाः शुचिपट्टतूलिशयनाः सद्गब्दिकाद्यासनाः ।
सारम्भाः सपरिग्रहाः सविषयाः सेर्ष्याः सकांक्षाः सदा,
साधुव्याजविटा अहो !! सितपटाः कष्टं चरन्ति व्रतम् ॥ २४ ॥

इत्याद्युद्धतसोपहासवचसः स्युः प्रेक्ष्य लोकाः स्थितिं,
श्रुत्वान्येऽभिमुखा अपि श्रुतपथाद्वैमुख्यमातन्वते ।
मिथ्योक्त्या सुदृशोऽपि बिभ्रति मनः सन्देहदोलाचलं,
येषां ते ननु सर्वथाजिनपथप्रत्यर्थिनोऽमी ततः ॥ २५ ॥

सर्वैरुत्कटकालकूटपटलैः सर्वैरपुण्योच्चयैः,
सर्वव्यालकुलैः समस्तविधुराधिव्याधिदुष्टग्रहैः ।
नूनं क्रूरमकारि मानसममुं दुर्मार्गमासेदुषां,
दौरात्म्येन निजघ्नुषां जिनपथं वाचैष सेत्यूचुषाम् ॥ २६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतः-

दुर्भेदस्फुरदुग्रकुग्रहतमः स्तोमास्तधी - चक्षुषां,
सिद्धान्तद्विषतां निरन्तरमहामोहादहम्मानिनाम् ।
नष्टानां स्वयमन्यनाशनकृते बद्धोद्यमानां सदा,
मिथ्याचारवतां वचांसि कुरुते कर्णे सकर्णः कथम् ॥ २७ ॥

यत् किञ्चिद्वितथं यदप्यनुचितं यल्लोकलोकोत्तरो-
त्तीर्णं यद्भवहेतुरेव भविनां यच्छास्त्रबाधाकरम् ।
तत्तद्धर्म इति ब्रुवन्ति कुधियो मूढास्तदर्हन्मत-
भ्रान्त्या लान्ति च हा !! दुरन्तदशमाश्चर्यस्य विस्फूर्जितम् ॥ २८ ॥

कष्टं नष्टदृशां नृणां यददृशां जात्यन्धवैदेशिकः,
कान्तारे प्रदिशत्यभीप्सितपुराध्वानं किलोत्कन्धरः ।
एतत्कष्टतरं तु सोऽपि सुदृशः सन्मार्गगांस्तद्विद-
स्तद्वाक्याननुवर्तिनो हसति यत् सावज्ञमज्ञानि च ॥ २९ ॥

सैषा हुण्डावसर्पिण्यनुसमयहृसद्द्रव्यभावानुभावा,
त्रिंशश्चोग्रग्रहोऽयं खखनखमिति वर्षस्थितिर्भस्मराशिः।
अन्त्यं चाश्चर्यमेतज्जिनमतहतये तत्समा दुःषमा चे-
त्येवं दुष्टेषु पुष्टेष्वनुकलमधुना दुर्लभो जैनमार्गः ॥ ३० ॥

सम्यग्मार्गपुषः प्रशान्तवपुषः प्रीतोल्लसच्चक्षुषः,
श्रामण्यर्द्धिमुपेयुषः स्मयमुषः कन्दर्पकक्षप्लुषः ।
सिद्धान्ताध्वनि तस्थुषः शमजुषः सत्पूज्यतां जग्मुषः,
सत्साधून् विदुषः खलाः कृतदुषः क्षाम्यन्ति-नोद्यद्रुषः ॥ ३१ ॥

देवीयत्युरुदोषिणः क्षतमहादोषानदेवीयति,
सर्वज्ञीयति मूर्खमुख्यनिवहं तत्त्वज्ञमज्ञीयति ।
उन्मार्गीयति जैनमार्गमपथं सम्यग्पथीयत्यहो !,
मिथ्यात्वग्रहिलो जनः स्वमगुणाग्रण्यं कृतार्थीयति ॥ ३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सङ्घत्राकृतचैत्यकूटपतितस्यान्तस्तरां ताम्यत-
स्तन्मुद्रादृढपाशबन्धनवतः शक्तस्य न स्पन्दितुम् ।
मुक्त्यै कल्पितदानशीलतपसोप्येतत्क्रमस्थायिनः,
सङ्घव्याघ्रवशस्य जन्तुहरिणव्रातस्य मोक्षः कुतः ॥ ३३ ॥

इत्थं मिथ्यापथकथनया तथ्ययापीह कश्चिद्,
मेदं ज्ञासीदनुचितमथो मा कुपत् कोऽपि यस्मात् ।
जैनभ्रान्त्या कुपथपतितान् प्रेक्ष्य नृंस्तत्प्रमोहा-
पोहायेदं किमपि कृपया कल्पितं जल्पितं च ॥ ३४ ॥

प्रोद्भूतेऽनन्तकालात् कलिमलनिलये नाम नेपथ्यतोऽर्हन्-
मार्गभ्रान्तिं दधानेऽथ च तदभिमरे तत्त्वतोऽस्मिन्दुरध्वे ।
कारुण्याद् यः कुबोधं नृषु निरसिसिषुर्दोषसङ्ख्यां विवक्षे-
दम्भोम्भोधेः प्रमित्सेत् सकलगगनोल्लङ्घनं वा विधित्सेत् ॥ ३५ ॥

न सावद्याम्नाया न बकुशकुशीलोचितयति-
क्रियामुक्ता युक्ता न मदममताजीवनभयैः ।
न संक्लेशावेशा न कदभिनिवेशा न कपट-
प्रिया ये तेऽद्यापि स्युरिह यतयः सूत्ररतयः ॥ ३६ ॥

संविग्नाः सोपदेशाः श्रुतनिकषविदः क्षेत्रकालाद्यपेक्षा-
नुष्ठानाः शुद्धमार्गप्रकटनपटवः प्रास्तमिथ्याप्रवादाः ।
वन्द्याः सत्साधवोऽस्मिण्णियम-शम-दमौचित्य-गाम्भीर्य-धैर्य-
स्थैर्योदार्यार्यचर्या-विनय-नय-दया-दाक्ष्य-दाक्षिण्यपुण्याः ॥ ३७ ॥

विभ्राजिष्णुमगर्वमस्मरमनाशादं श्रुतोल्लङ्घने,
सज्ज्ञानद्युमणिं जिनं वरवपुः श्रीचन्द्रिकाभेश्वरम् ।
वन्दे वर्ण्यमनेकधाऽसुरनरैः शक्रेण चैनच्छिदं,
दम्भारिं विदुषां सदा सुवचसानेकान्तरङ्गप्रदम् ॥ ३८ ॥



For Private And Personal Use Only

जिनपतिमतदुर्गे कालतः साधुवेषै –
र्विषयिभिरभिभूते भस्मकम्लेच्छसैन्यैः ।
स्ववशजडजनानां शृङ्खलेव स्वगच्छे-
स्थितिरियमधुना तैरप्रथि स्वार्थसिद्धयै ॥ ३९ ॥

सम्प्रत्यप्रतिमे कुसङ्घवपुषि प्रोज्जृम्भिते भस्मक-
म्लेच्छातुच्छबले दुरन्तदशमाश्चर्ये च विस्फूर्जति ।
प्रौढिं जग्मुषि मोहराजकटके लोकैस्तदाज्ञापरै-
रेकीभूय सदागमस्य कथयापीत्थं कदर्थ्यामहे ॥ ४० ॥

पू.आ.श्रीजिनदत्तसूरिविरचिता

## ॥ चर्चरी ॥

नमिवि जिणेसरधम्मह तिहुयणसामियह
पायकमलु ससिनिम्मलु सिवगयगामियह ।
करिमि जहट्ठियगुणथुइ सिरिजिणवल्लहह
जुगपवरागमसूरिहि गुणिगणदुल्लहह ॥ १ ॥

जो अपमाणु पमाणइ छद्दरिसण तणइ
जाणइ जिव नियनामु न तिण जिव कुवि घणइ ।
परपरिवाइगइंदवियारणपंचमुहु
तसु गुणवण्णणु करण कु सक्कइ इक्कमुहु ? ॥ २ ॥

जो वायरणु वियाणइ सुहलक्खणनिलउ
सद्दु असद्दु वियारइ सुवियक्खणतिलउ ।
सुच्छंदिण वक्खाणइ छंदु जु सुजइमउ
गुरु लहु लहि पइठावइ नरहिउ विजयमउ ॥ ३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कव्वु अउव्वु जु विरयइ नवरसभरसहिउ
लद्धपसिद्धिहिं सुकइहिं सायरु जो महिउ।
सुकइ माहु ति पसंसहिं जे तसु सुहगुरुहु
साहु न मुणहि अयाणुय मइजियसुरगुरुहु ॥ ४ ॥

कालियासु कइ आसि जु लोइहिं वण्णियइ
ताव जाव जिणवल्लहु कइ ना अण्णियइ।
अप्पु चित्तु परियाणहि तं पि विसुद्ध न य
ते वि चित्तकइराय भणिज्जहिं मुद्धनय ॥ ५ ॥

सुकइविसेसियवयणु जु वप्पइराउकइ
सु वि जिणवल्लहपुरउ न पावइ कित्ति कइ।
अवरि अणेयविणेयहिं सुकइ पसंसियहिं
तक्कव्वामयलुद्धिहिं निच्चु नमंसियहिं ॥ ६ ॥

जिण कय नाणा चित्तइं चित्तु हरंति लहु
तसु दंसणु विणु पुण्णिहिं कउ लब्भइ दुलहु।
सारइं बहु थुइ-थुत्तइ चित्तइं जेण कय
तसु पयकमलु जि पणमहि ते जण कयसुकय ॥ ७ ॥

जो सिद्धंतु वियाणइ जिणवयणुब्भविउ
तसु नामु वि सुणि तूसइ होइ जु इहु भविउ।
पारतंतु जिणि पयडिउ विहिविसइहिं कलिउ
सहि ! जसु जसु पसरंतु न केणइ पडिखलिउ ॥ ८ ॥

जो किर सुत्तु वियाणइ कहइ जु कारवइ
करइ जिणेहि जु भासिउ सिवपहु दक्खवइ।
खवइ पावु पुव्वज्जिउ पर-अप्पह तणउं
तासु अदंसणि सगुणहिं ज्झूरिज्जइ घणउं ॥ ९ ॥



For Private And Personal Use Only

परिहरि लोयपवाहु पयट्टिउ विहिविसउ
पारतंति सहु जेण निहोडि कुमग्गसउ।
दंसिउ जेण दुसंघ-सुसंघह अंतरउ
वद्धमाणजिणतित्थह कियउ निरंतरउ ॥ १० ॥

जे उस्सुत्तु पयंपहि दूरि ति परिहरइ
जो उ सुनाण-सुदंसण-किरिय वि आयरइ।
गड्डुरिगामपवाहपवित्ति वि संवरिय
जिण गीयत्थायरियइ सव्वइ संभरिय ॥ ११ ॥

चेईहरि अणुचियइं जि गीयइं वाइयइ
तह पिच्छण-थुइ-थुत्तइं खिड्डुइ कोउयइ।
विरहंकिण किर तित्थु ति सव्वि निवारियइ
तेहिं कइहिं आसायण तेण न कारियइ ॥ १२ ॥

लोयपवाहपयट्टिहि कोऊहलपिइहि
कीरन्तइ फुडदोसइ संसयविरहियहि।
ताइं वि समइनिसिद्धइ समइकयत्थियहि
धम्मत्थीहि वि कीरहिं बहुजणपत्थियहि ॥ १३ ॥

जुगपवरागमु मण्णिउ सिरिहरिभद्दपहु
पडिहयकुमयसमूहु पयासियमुत्तिपहु।
जुगपहाणसिद्धंतिण सिरिजिणवल्लहिण
पयडिउ पयडपयाविण विहिपहु दुल्लहिण ॥ १४ ॥

विहिचेईहरु कारिउ कहिउ तमाययणु
तमिह अणिस्साचेइउ कयनिव्वुइनयणु।
विहि पुण तत्थ निवेइय सिवपावणपउण
जं निसुणेविणु रंजिय जिणपवयणनिउण ॥ १५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जहि उस्सुत्तुजणक्कमु कु वि किर लोयणिहि
कीरंतउ नवि दीसइ सुविहिपलोयणिहिं।
निसि न ण्हाणु न पइट्ठ न साहुहि साहुणिहि
निसि जुवईहिं न पवेसु न नट्टु विलासिणिहि ॥ १६ ॥

जाइ नाइ न कयग्गहु मण्णइ जिणवयणु
कुणइ न निंदियकंमु न पीडइ धम्मियणु।
विहिजिणहरि अहिगारिउ सो किर सलहियइ
सुद्धउ धम्मु सुनिम्मलि जसु निवसइ हियइ ॥ १७ ॥

जित्थु ति-चउरसुसावयदिट्ठउ दव्ववउ
निसिहिं न नंदि करावि कुवि किर लेइ वउ।
बलि दिणयरि अत्थमियइ जहि न हु जिणपुरउ
दीसइ धरिउ न सुत्तइ जहि जणि तूररउ ॥ १८ ॥

जहिं रयणिहि रहभमणु कयाइ न कारियइ
लउडारसु जहिं पुरिसु वि दिंतउ वारियइ।
जहि जलकोडंदोलण हुंति न देवयह
माहमाल न निसिद्धी कयअट्ठाहियह ॥ १९ ॥

जहि सावय जिणपडिमह करिहि पइट्ठ न य
इच्छाच्छंद न दीसहि जहि मुद्धंगिनय।
जहि उस्सुत्तपयट्टह वयणु न निसुणियइ
जहि अज्जुत्तु जिण गुरुहु वि गेउ न गाइयइ ॥ २० ॥

जहि सावय तंबोलु न भक्खहि लिंति न य
जहि पाणहि य धरंति न सावय सुद्धनय।
जहि भोयणु न य सयणु न अणुचिउ वइसणउ
